ISBN : 978-93-5281-225-7

चन्द्रालोकालङ्कारेषु व्यङ्ग्यानुशीलनम्

(तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य **विशिष्टाचार्योपाधये**
पाठ्यक्रमाङ्गतया समर्पितः लघुशोधप्रबन्धः)

परिष्कर्ता
डा. श्रिष्टि लक्ष्मीकुमारशर्मा
विश्रान्तसंस्कृतप्रवाचकः
श्रीगोरण्ट्ल वेङ्कन्नप्राच्यसंस्कृतकलाशाला, तिम्मसमुद्रम्

निबन्धकारः
डा. पठान् वलि साहेब्
अतिथ्यध्यापकः
आधुनिकविद्याविभागः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति

प्रकाशकः
श्रीवनमालीप्रकाशनम्
तिरुपति – ५१७ ५०१
आन्ध्रप्रदेशः
२०१४

चन्द्रालोकालङ्कारेषु व्यङ्ग्यानुशीलनम्

(तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य **विशिष्टाचार्योपाधये** पाठ्यक्रमाङ्गतया समर्पितः लघुशोधप्रबन्धः)

परिष्कर्ता : **डा. श्रिष्टि लक्ष्मीकुमारशर्मा**
विश्रान्तसंस्कृतप्रवाचकः
श्रीगोरण्ट्ल वेङ्कन्नप्राच्यसंस्कृतकलाशाला, तिम्मसमुद्रम्

निबन्धकारः : **डा. पठान् वलि साहेब्**
अतिथ्यध्यापकः, आधुनिकविद्याविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति
Phone : 88851 61850

© **सर्वेऽधिकाराः परिष्कर्त्रधीनाः।**

प्रथममुद्रणम् : २०१४
प्रतिलिपयः : २५०
मूल्यम् : रू. १२०/-
ISBN : 978-93-5281-225-7
Barcode :
9 789352 812257 >

प्रकाशकः : **श्रीवनमालीप्रकाशनम्**
तिरुपति - ५१७ ५०१, आन्ध्रप्रदेशः।

प्राप्तिसङ्केतः : **डा. पठान् महम्मद् वलि खान्**
गृहसङ्ख्या - ४-४-५४२, रामकृष्णडीलक्स् समीपे,
नेह्रूनगर्, तिरुपति - ५१७ ५०७, आन्ध्रप्रदेशः।
दूरवाणी - ८८८५१६१८५०
Email: mahammadvalipathan@gmail.com

टङ्ककः : **पठान् महम्मद् वलि,** वैदनग्रामः, बल्लिकुरवमण्डलम्,
प्रकाशम् जिल्ला, आन्ध्रप्रदेशः ५२३ ३०३

मुद्रणम् : प्रजाशक्तिदैनिकमुद्रणालयः, रेणिगुण्टरोड्, तिरुपति। दूरवाणी - 0877-2271997, 1998

ISBN : 978-93-5281-225-7

CANDRĀLOKĀLAṄKĀREṢU VYAṄGYĀNUŚĪLANAM

A Dessertation submitted for the Award of **M.Phil. in Sanskrit** of Rashtriya Sanskrit Vidyapeetha, Tirupati as part of Course Syllabus

Editor
Dr. Srishti Lakshmi Kumara Sarma
Retd. Reader in Sanskrit
Sri Gorantla Venkanna Oriental College, Timmasamudram

Author
Dr. Pathan Vali Saheb
Guest Lecturer
Modern Courses, S.V. Vedic University, Tirupati

Publisher
SRI VANAMALI PUBLICATIONS
TIRUPATI - 517 501
Andhra Pradesh
2014

CANDRĀLOKĀLAṄKĀREṢU VYAṄGYĀNUŚĪLANAM
(A Dessertation submitted for the Award of **M.Phil. in Sanskrit** of Rashtriya Sanskrit Vidyapeetha, Tirupati as part of Course Syllabus)

Editor : **Dr. Srishti Lakshmi Kumara Sarma**
Retd. Reader in Sanskrit
Sri Gorantla Venkanna Oriental College, Timmasamudram

Author : **Dr. Pathan Vali Saheb**
Guest Lecturer
Modern Courses, S.V. Vedic University, Tirupati
Phone : 88851 61850

© **All Rights Reserved by the Editor**

First Edition : 2014, Total Pages : xvi + xxxiv + 108 = 158

Copies : 250

Price : Rs. 120/-

ISBN : 978-93-5281-225-7

Barcode : 9 789352 812257 >

Published by : **Sri Vanamali Publications**
Nehru Nagar, Tirupati - 517 501 A.P.

Available Address : **Pathan Mahammad Vali Khan**
Door No. 4-4-542/H4,
Near Ramakrishna Delux Circle,
Nehru Nagar, Tirupati - 517 501 A.P.
Email: mahammadvalipathan@gmail.com

DTP & Page Setting :
Pathan Mahammad Vali, Vaidana Post, Ballikurava Mandal,
Prakasam District, Pin - 523303

Printed at : Praja Sakti Daily Printing Press, Tirupati. PH: 0877-2271997, 1998

डा. श्रिष्टि लक्ष्मीकुमारशर्मा
विश्रान्तसंस्कृतप्रवाचकः
देवालयरथ्या, रत्नगिरिनगरम्,
गुण्टूरु – ६ (आन्ध्रप्रदेशः)
दूरवाणी – ०९४४१४१०४७२



दिनाङ्कः – १२.११.२०१३

अभिनन्दनम्

अलङ्कारशास्त्ररङ्गे प्रधानतयाऽलङ्काराणां, तत्राप्यलङ्कारेषु व्यङ्ग्यस्पर्शः कथमस्तीति निरूपयितुकामेनायुष्मता **डा. पठान् वलि साहेब् (महम्मद् वलि खान्)** नाम्ना तिरुपतिराष्ट्रियसंस्कृतविद्यापीठीयभूतपूर्वशोधच्छात्रेण प्रकृते **श्रीवेङ्कटेश्वरवेदविश्वविद्यालये** आधुनिकविद्यासङ्काये साहित्यविभागेऽतिथ्यध्यापकपदमधितिष्ठता महता प्रयत्नेन कृतः परिश्रमः प्रकाममभिनन्दनीयः।

ध्वन्यालोक–काव्यप्रकाश–रसगङ्गाधरादिप्रबन्धेष्वलङ्कारशास्त्रीयेषु तत्र तत्र निरूपितोऽप्यलङ्कारेषु व्यङ्ग्यपरामर्शोऽतिविस्तृततत्वात् यद्यपि प्रयत्नेन विज्ञेयो भवति तथाप्यलङ्काराणां विषये प्राथमिकसम्पूर्णग्रन्थे शतालङ्कारनिरूपात्मके चन्द्रालोकेऽलङ्कारेषु व्यङ्ग्यस्थितिः किं प्राधान्येन अस्ति? उताप्राधान्येन अस्ति? आहोस्विदन्यादृशरूपेण अस्ति? इत्येतावत्पर्यन्तं न केनापि निरूपितम्। किन्त्वयं युवाऽऽलङ्कारिकः वेदवेदाङ्ग–साहित्यादि–तन्त्रनिष्णातॄणाम् **आचार्य सन्निधानं सुदर्शनशर्ममहोदयानां** मार्गनिर्देशकत्वे ग्रन्थेऽस्मिन् सर्वं सम्यक् न्यरूरुपत्।

जयदेवकृतस्य **चन्द्रालोकस्य** किञ्चित् परिष्करणरूपेण कुवलयानन्दस्थचन्द्रालोकः विराजते। तादृशचन्द्रालोकेऽलङ्काराणां स्वरूपसरण्या कीदृशः व्यङ्ग्यार्थः समुल्लसति? उदाहरणविशेषानुरोधेन कीदृशं व्यङ्ग्यवैभवं काव्यस्य प्राणभूतमात्मभूतं च समस्ति? इति स्पष्टमत्र सोदाहरणं निरूपितम्। सादृश्यगर्भ–विरोधगर्भ–शृङ्खलाबन्धमूलक–तर्कन्यायमूलक–वाक्यन्यायमूलक–गूढार्थप्रतीतिमूलकालङ्कारान् अवर्गीकृतान् पञ्चत्रिंशदलङ्कारांश्च इत्याहत्य शतालङ्कारान् स्वीकृत्य, व्यङ्ग्यवैभवनिरूपणाय अनेन महान् प्रयत्न आस्थितः।

कुत्र व्यङ्ग्यस्य ध्वनित्वम् ? इति सप्रमाणं ग्रन्थेऽस्मिन् निरूपितम्। अलङ्कारेषु हस्तपुस्तकायमानस्य चन्द्रालोकस्य लक्षणोदाहरणयोः निरूपणात्मकः विमर्शनात्मकश्च **चन्द्रालोकालङ्कारेषु व्यङ्ग्यानुशीलनम्** इत्ययं लघुशोधप्रबन्धो नूनमालङ्कारिकाणाम-लङ्कारविषयावगाहने व्यङ्ग्यसम्बन्धनिरूपणेऽलङ्कारशास्त्रदृष्ट्या अलङ्कारवाक्यशाब्दबोध-निरूपणे चात्यन्तमुपकरिष्यति, आलङ्कारिकलोकादरपात्रञ्च भविष्यतीति विश्वसिमि।

एतादृशस्य लघोरपि गुणगरिम्णाऽलघोः आलङ्कारिकच्छात्राणामत्यन्तोपकारिकस्य ग्रन्थस्य प्रधानसम्पादकाः श्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य कुलपतयः **आचार्य सन्निधानं सुदर्शनशर्माणः**, निबन्धकर्ता वर्धिष्णुः **पठान् वलि** च अभिनन्दनीयतां भजन्ताम्।

इत्थम्

विदुषामाश्रवः

– श्रिष्टि लक्ष्मीकुमारशर्मा

कृतज्ञताञ्जलिः

श्रीगोरण्ट्लवेङ्कन्नप्राच्यकलाशालायां प्रविष्टोऽहं **बि.ए.ओ.एल् संस्कृतम्** (B.A.O.L. Sanskrit) इत्युपाधिसम्पादनसमयेऽलङ्कारशास्त्रमभिमानविषयत्वेन आदृत्य कृताऽध्ययनोऽस्मि।

❊ काव्य-नाटकध्वनि, अपि च नित्यव्यवहारभाषायाञ्चालङ्कारविन्यासः तत्तत्सन्दर्भ-सौन्दर्यमधिकं पुष्णातीत्यत्र नास्ति संशीतिलेशः।

❊ यद्यप्यलङ्कारपथयियासवः लक्षणकाराः, तदध्ययनाध्यापनशीलाः वाच्यत्वमेव आमनन्ते, तथापि केषुचनालङ्कारेषु व्यङ्ग्यार्थवासना भावुकचेतांसि नरीनर्तयति नूनम्।

❊ ध्वनिप्रस्थानप्रवर्तकः राजानकानन्दवर्धनोऽपि आक्षेप-समासोक्ति-अप्रस्तुतप्रशंसा-द्यलङ्कारेषु ध्वनेः प्राधान्याप्राधान्यमुद्दिश्य मीमांसते।

एवंविधैश्चिरादलङ्कारेषु विन्यस्तबौद्धिकभावैः मनसि मध्यमाने, चन्द्रालोकालङ्कारेषु व्यङ्ग्यार्थसम्भावनमुद्दिश्य यत्किमपि परिशोधनं करणीयं इति निश्चप्रचहृदयोऽभवम् ।

चन्द्रालोकश्लोकानां तत्तदाकरेषु वैरुद्ध्यस्य प्रत्यक्षत्वात् स्वीकृतविषयस्य सुश्लिष्टत्वमाश्यकमिति मत्वा - **'कुवलयानन्दाधारभूतचन्द्रालोकाश्रितानां व्यङ्ग्य-सम्बद्धालङ्काराणामनुशीलनम्'** इति शीर्षकां स्वीकृत्य, राष्ट्रियसंस्कृतविद्यापीठे साहित्ये **विशिष्टाचार्य** (M.Phil. in Sahitya) इत्युपाधिसाधने यथाशक्तिप्रयतोऽस्मि। २००७ वत्सरे तदुपाधिञ्चाध्यगच्छम् ।

अथेदानीं भगवतः श्रीनिवासस्य कृपापारवश्यात् **श्रीवेङ्कटेश्वरवेदविश्वविद्यालय**पक्षतः ग्रन्थोऽयं **चन्द्रालोकालङ्कारेषु व्यङ्ग्यानुशीलनम्** इति नाम्ना प्रकाश्यते इति नरीनृत्यते मे मनोमयूरः। एतत्कार्यसाफल्यमहे, मम पुरोगामुकतायाः प्रोत्साहकान् अव्ययकीर्तिसान्द्रानुद्दिश्य कृतज्ञतामयीं कुसुमाञ्जलिं प्रविकिरामि।

तत्र मम जननी-जनकौ **पठान् नासर्वलिखान्-दरियाबीदम्पती** प्रथमवन्द्यौ। स्नेहार्द्रमानसौ तौ पूज्यगुरू स्वसन्तत्यामस्मासु सत्यधर्मादिगुणकदम्बं प्रोप्य (कदम्बस्य बीजावापं कृत्वा) जनिसार्थक्यं कल्पयामासतुः। अतस्तयोः पुण्यदम्पत्योश्चरणकमलेषु हार्दिकनमस्सुमाञ्जलिं समर्पयामि।

एवमस्य प्रबन्धस्य निर्माणे राष्ट्रियसंस्कृतविद्यापीठे साहित्यसंस्कृतिप्रमुखाः श्रीवेङ्कटेश्वरवेद-विश्वविद्यालयस्य कुलपतिचरा **आचार्य सन्निधानं सुदर्शनशर्ममहाशयाः** मार्गदर्शकत्वेनाङ्गीकृत्य मामनुगृहीतवन्तः । तदा एते चानेककार्येषु निमग्नाः सन्तोऽपि सानन्दं सादरञ्च सदा विविधपुस्तकानां विहङ्गवीक्षणमकारयन्। विषयसम्पादने शोधनिबन्धनिर्माणे चावश्यकज्ञानं मयि योजितवन्तः। अपि च तदानीं **श्रीवेङ्कटेश्वरवेदविश्वविद्यालय**पक्षतः ग्रन्थप्रकाशनायानुमतिं दत्त्वा मामुत्साहितवन्तः। अथ च पुरोवाग्रूपमभिनन्दनं स्वयं टङ्कयित्वैव मां प्रदायास्य ग्रन्थस्य प्रकाशनाय प्रोत्साहितवन्त एते सौहार्द्रमणयः। अत एभ्यः मार्गदर्शकसुधीभ्यः वेदरक्षणैकदृढव्रतेभ्यः वेदविश्वविद्यालयभूतपूर्व-प्रथमकुलपतिवर्येभ्यः **आचार्य सन्निधानं सुदर्शनशर्ममहाशयेभ्यः** मयि वात्सल्यं प्रदर्शितवतीभ्यः तेषां धर्मपत्नीभ्यः **श्रीमती अन्नपूर्णामहाभागाभ्यः** नूनमधमर्णोऽयं जनः।

प्राथमिकविद्यानन्तरं संस्कृतकलाशालायां प्रवेशात् प्रभृति मामत्यन्तादरेण पुत्रवात्सल्येन च संस्कृतसाहित्यसूक्ष्मांशान् उपदिश्यानुग्रहपात्रं कृतवद्भ्यः, श्रीकाञ्चीकामकोटिपीठाधिपतिभिः **'अद्वैतवेदान्तरत्न'** इति बिरुदेन सम्मानितेभ्यः, एवमस्य शोधप्रबन्धस्य परिष्करणेन ग्रन्थरूपं आनीतवद्भ्यः अलङ्कारशास्त्रमर्मज्ञेभ्यः मद्गुरुवर्येभ्यः **डा. श्रिष्टि लक्ष्मी कुमारशर्ममहाशयेभ्यः,** तेषां धर्मपत्नीभ्यः **शर्वाणीमहाभागाभ्यः** सविनयं सश्रद्धं सानन्दं चासीमप्रणतिततीः समर्पयामि।

एवमस्य ग्रन्थस्य लेखनदशायां सहायगुरुभ्यः भूयांसि नमांसि सन्तनोमि ।

एवं लघुशोधनिबन्धस्यास्य निर्माणे मुद्रणे च प्रत्यक्षतः उत परोक्षतः वा सहकृतेभ्यः सर्वेभ्यः भूयांसि नमांसि प्रकटयामि ।

एवञ्च ग्रन्थस्यास्य लोकार्पणाय विहितोऽयं यत्नः सहृदयपाठकाय, आलङ्कारिकच्छात्राय च उल्लासाय भवतु। यद्यत्र दोषास्ते मत्कृता एवेति, गुणास्तु गुरुकृपोपबृंहिता एवेति विनिवेदयन् विरमामि विस्तरात् ।

इत्थम्
विदुषामाश्रवः

(पठान् वलि साहेब्)

विषयसूची

भूमिका (i-xxxiv)

प्रथमोऽध्यायः (1-24)

सादृश्यगर्भेषु भेदाभेद–आरोपमूलकाभेद–अध्यवसायमूलकाभेदालङ्काराः

द्वितीयोऽध्यायः (25-50)

सादृश्यगर्भेषु गम्यौपम्याश्रयालङ्काराः

तृतीयोऽध्यायः (51-74)

विरोध–शृङ्खला–तर्कन्याय–लोकन्यायमूलकालङ्काराः

चतुर्थोऽध्यायः (75-96)

गूढार्थप्रतीतिमूलकाः अवर्गीकृतालङ्काराश्च

पञ्चमोऽध्यायः (97-102)

रसवदाद्यलङ्काराः, प्रबन्धोपसंहारश्च

परिशिष्टम् (103-106)

सङ्केताक्षरसूची

१.	अ.स.	— अलङ्कारसर्वस्वम्, रुय्यकः।
२.	उ.सं.	— उपनिषत्सङ्ग्रहः, भगवान् वेदव्यासः।
३.	का.ग्र.आ.	— कालिदासग्रन्थावलिः, डा. रेवाप्रसादद्विवेदिः।
४.	का.प्र.	— काव्यप्रकाशः, मम्मटाचार्यः।
५.	का.आ.	— काव्यादर्शः, दण्डी।
६.	का.अ.	— काव्यालङ्कारः रुद्रटः,भामहः।
७.	का.अ.सू.	— काव्यालङ्कारसूत्राणि, वामनः।
८.	कु.आ.	— कुवलयानन्दः, अप्पय्यदीक्षितः।
९.	कु.आ.अ.चं.	— कुवलयानन्दव्याख्या-अलङ्कारचन्द्रिका, वैद्यनाथतत्सत्।
१०.	कु.आ.र.रं.	— कुवलयानन्दव्याख्या-रसिकरञ्जनी, गङ्गाधरवाजपेयः।
११.	चं.आ.श.	— चन्द्रालोकव्याख्या-शरदागमः, प्रद्द्योतनभट्टाचार्यः।
१२.	चि.मी.	— चित्रमीमांसा, अप्पय्यदीक्षितः।
१३.	ज.सि.प.	— जगन्नाथसिद्धान्तपरिशीलनम्, डा. श्रिष्टिलक्ष्मीकुमारशर्मा।
१४.	ध्व.आ.	— ध्वन्यालोकः, आनन्दवर्धनाचार्यः।
१५.	ना.शा.	— नाट्यशास्त्रम्, भरतमुनिः।
१६.	न्या.सि.मु.	— न्यायसिद्धान्तमुक्तावली, विश्वनाथपञ्चाननः।
१७.	प्र.रु.	— प्रतापरुद्रीयम्, विद्यानाथः।
१८.	र.गं.	— रसगङ्गाधरः(गुरुमर्मप्रकाशसहितः), पण्डितराजजगन्नाथः।
१९.	सा.द.	— साहित्यदर्पणम्, विश्वनाथकविराजः।
२०.	स्व.वा.	— स्वप्नवासवदत्तम्, महाकविभासः।
२१.	H.S.P.	— History of Sanskrit Poetics, P.V. Kane.

भूमिका

इह हि वाङ्मये **कान्तासम्मितार्थप्रतिपादकं काव्यं** प्रभुसम्मितार्थप्रतिपादकात् वेदात्मकात् शब्दराशेः, सुहृत्सम्मितार्थप्रतिपादकात् पुराणात्मकात् शब्दराशेश्च अतिरिच्यत इति नाविदितं समेषाम्। तच्चह्नसिद्धार्थप्रतिपादकमपि सुन्दरतया सिद्धमर्थमुपदिशत् पुरुषार्थे प्रवर्तयति – इति शास्त्रमिव सप्रयोजनम्। अत एव आनन्द-कान्तासम्मितोपदेशात्मक-प्रयोजनद्वयमेकीकृत्य सहृदयाय सम्पादयत्, काव्यं कवेः जीवनेऽपि गुरुप्रसादं राजप्रसादम् अनन्तदेवताप्रसादञ्च विस्तारयत् कविसहृदययोरर्थवत् भवति।

१. काव्यस्वरूपम्

तस्यास्य काव्यस्य स्वरूपं किमिति जिज्ञासायां नैके आलङ्कारिकमूर्धन्याः नैकधा तत्स्वरूपमुदभासयन्। तद्यथा –

शब्दार्थौ सहितौ काव्यम्[१] इति भामहः।
इष्टार्थव्यवच्छिन्ना पदावली काव्यम्[२] इति दण्डी,
काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते[३] इति वामनः,
सहृदयहृदयाह्लादकारिशब्दार्थमयत्वमेव काव्यलक्षणम्[४] इति ध्वनिकारः,
वाक्यं रसात्मकं काव्यम्[५]ह्नइति विश्वनाथकविराजः,
रमणीयार्थप्रतिपादकः शब्दः काव्यम्[६] इति पण्डितराजो जगन्नाथश्च प्रावादिषुः।

मम्मटाचार्यस्तु – **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि**[७]ह्नइति काव्यलक्षणमाह। **अदोषौ सगुणौ क्वापि स्फुटालङ्काररहितौ शब्दार्थौ काव्यम्** इति तदीयलक्षणवाक्यार्थः। तदेवं काव्यं गुणालङ्कारशोभितं भवेत्।

---

१. का.आ., भामहः पृ. ४७ श्लो. १६
२. का.आ. पृ. १ श्लो. १०
३. का.अ.सू. पृ. ३
४. ध्व.आ. पृ. ८
५. सा.द. पृ. २०
६. र.गं. (मर्मप्रकाश-मधुमती-बालक्रीडासहितः) पृ. १३
७. का.प्र. (प्रदीप-उद्द्योत-प्रभासहितः) पृ. १४

२. गुणालङ्कारयोः सङ्क्षेपतो भेदनिरूपणम्

तत्र गुणालङ्कारयोः को वा भेदः? इत्युक्ते **'काव्ये गुणाः सामान्यतः काव्य-शोभाधायकाः, अलङ्कारास्तु गुणसम्पादितकाव्यशोभायाः संवर्धकाः'** इति वामनाचार्याः। गुणसम्पादिता शोभा स्वाभाविकी। यतः गुणः व्यक्तेः स्वभावः। अलङ्कारस्तु कृत्रिमाः। अत एव अलङ्कारः परिवर्तनक्षमः, तद्यथा- **चन्द्र इव मुखम्** इत्युपमा। इवशब्दनिष्कासे **मुखं चन्द्रः** इति रूपकम्, **मुखं चन्द्र इव** इति इवपदस्य चन्द्रपदाभिसम्बन्धे सम्भावनारूपा उत्प्रेक्षा। एवं परिवृत्तिक्षमः अलङ्कारः। गुणस्तु न तथा परिवृत्तिक्षमः। शब्दार्थविन्यासेन समं गुणानामनुस्यूतत्वात् गुणानां परिवृत्तिक्षमत्वाभावात्।

अत एव **पूर्वे नित्याः**[१] इति सूत्रयता वामनाचार्येण शब्दार्थरचनाकालादारभ्यानुस्यूततया वर्तमानत्वलक्षणं नित्यत्वमुक्तम्। अलङ्काराणान्तु शोभातिशयाधायकत्वमेवोक्तम्, न तु नित्यत्वमनिवार्यत्वं वा। समवायसम्बन्धेन वर्तमानानां - **स्वाभाविकत्वम्।** संयोगेन वर्तमानानान्तु - कृत्रिमशोभासम्पादकत्वमैच्छिकत्वञ्च इत्युद्भटस्मृतमतमप्युपपद्यते।

२.१. काव्येषु अलङ्काराणां स्वाभाविकत्व-कृत्रिमत्वविचारः

एतदभिप्रायं पर्यालोचयतैव मम्मटाचार्येण रसशोभाविरहिणि काव्ये अलङ्कारावश्यकतां सम्भाव्य च- **क्वाप्यनलंकृती** इति, **क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः**[२] इति च प्रत्यपादि। किन्तु पीयूषवर्षजयदेवःह्न

> **निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
> **सालङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक्।।**[३]

इति काव्यलक्षणमुक्त्वा-

> **अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती।**
> **असौ न मन्यते कस्मादनुष्णमनलंकृती।।**[४]

इति शब्दार्थयोरलङ्कारशालितां वह्नेरौष्ण्ययोगितामिव स्वाभाविकीं मन्यते। एवं सति काव्ये अलङ्काराणामस्वाभाविकत्वमित्युपरिष्टादावेदितम्, तर्हि अलङ्काराणाम् ऐच्छिकता

---

१. का.अ.सू. सं. ३.१.३ पृ. ८३ **तदतिशयहेतवस्त्वलङ्काराः**

२. का.प्र. (प्रदीप-उद्द्योत-प्रभासहितः) पृ. १५

३. चं.आ.श. पृ. ११

४. चं.आ.श. पृ. ११

प्रतिपादकमम्मटग्रन्थस्य जयदेवकृतं खण्डनं कथमिति चेत् उच्यते – केषुचित् सिद्धहस्तकवि-प्रयुक्तेष्वलङ्कारेष्वनुभूतस्य स्वाभाविकत्वस्यान्यत्राप्यारोपात्।

२.१.१. अलङ्काराणां प्रयोजनम्

अत्रेदं विचारणीयम् – अलङ्काराणां स्वाभाविकत्व-कृत्रिमत्वनिरूपणात् प्राक् **अलङ्काराणां किं प्रयोजनम् ?** इति मनाग्विचारणीयम्। सभासु वक्तृत्वेन सभारञ्जनार्थं, स्वयं प्रतिपिपादयिषितस्यार्थस्य परबुद्धिप्रवेशार्थं, प्राचीनकवीनां कवितायां सौन्दर्यास्वादनार्थं वा अलङ्काराणां स्वरूपपरिज्ञानमावश्यकम्। किं बहुना लोकेऽपि देशभाषासु अलङ्काराः जनसम्भाषणस्रवन्त्यां गाढं मिलिताः। तद्यथा –

१. **अनुभवज्ञवचनं प्रातराशसम्भारः** (पेद्दलमाट चद्दिमूट),

२. **तण्डुलकणानादाय तनूजपोतान्नो देहि स्वामिन्!**
(नूकलु तीसुकोनि मूकलु माकिव्वु स्वामी)

इत्यादिलौकिकान्ध्राभाणकवचनेषु रूपक-अनुप्रासाद्यलङ्कारप्रयोगाः दृश्यन्ते।

१. **उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्** (ऋग्वेदः),

२. **आत्मानं रथिनं विद्धि शरीरं रथमेव च**[1]

इत्यादिकठोपनिषदि च उपमा-रूपकादिप्रयोगाश्च अस्मान् चमत्कृतानादधति। एतादृशार्था-लङ्कारप्रयोगेषु आलोचनापूर्णेषु अलङ्कारप्रयोगः अपृथक् यत्ननिर्वर्त्यः स्वाभाविकश्च वरीवर्ति। स्वरूपाक्षरविन्यासलक्षणे शब्दालङ्कारे तु स्वाभाविकतानुभूयत एव। अत एव ध्वनिकारेणापि –

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः।।[2]

रसध्वनावलङ्काराणामपृथक् यत्ननिर्वर्त्यत्वमुक्तम्। एवञ्च अलङ्काराणामपृथग्यत्न-निर्वर्त्यत्वेन सिद्धहस्तकविप्रयुक्तानां सद्भावात्, उत्तमालङ्कारेषु विद्यमानां स्वाभाविकतां सामान्यालङ्कारेष्वपि संयोज्य वह्नेरौष्ण्यस्येव काव्ये अलङ्काराणां जयदेवेन स्वाभाविकता समुदघाटि। गुणालङ्कारयोः विविक्तं स्वरूपन्तु पश्चान्निरूपयिष्यते।

---

१. उ.सं. (कठ.) पृ. ७ २. ध्व.आ. पृ. १०४

अथ प्रथमाध्यायविचाराङ्गतया काव्यतत्त्वम् अत्यन्तसङ्क्षेपतः परामृश्यते।

३. काव्यप्रधानतत्त्वम्

एवं काव्ये अलङ्कारप्रामुख्यनिरूपणायैव मम्मटमतं जयदेवेनाखण्डि। एवमलङ्काराः काव्यशोभाकरधर्मत्वेन ख्यातिभाजोऽपि पायसे **भल्लातकीविदळा इव** (Just like the Peices of Cashue) कात्स्न्र्येन प्राधान्यं नार्हन्ति। किन्तु उपस्कारकतयैव। तर्हि प्रधानं काव्यतत्त्वं किम् ? इत्युक्ते **काव्यस्यात्मा ध्वनिः**[१] इति व्यवस्थापितमेव। स च ध्वनिः वस्तु-अलङ्कार-रसात्मना त्रिविधः। त्रिविधस्यापि ध्वनेः **रस एव** आत्मा। रसोपस्कारकतया गुणालङ्कारादयः यथायोगमपेक्ष्यन्ते।

तदिह प्रकृतेह्न- **कुवलयानन्दाधारभूतचन्द्रालोकाश्रितानां व्यङ्ग्यसम्बन्धाल-ङ्काराणामनुशीलनम्** इत्यनुसन्धानवेलायां गृहीते प्रबन्धे अलङ्कारेषु व्यङ्ग्यसम्बन्धानु-शीलनाय काव्यस्वरूपे ज्ञाते; काव्यविभागः, अलङ्कारसामान्यस्वरूपम्, ध्वनिगुणी-भूतव्यङ्ग्यविवेकः, अलङ्काराणां क्रमिको विकासः, अलङ्काराणां वर्गीकरणमृह्न-इत्यमी विषयाः; अनुसन्धानस्वरूपम्, अनुसन्धानोद्देश्यञ्च प्रथमाध्यायेऽस्मिन् परिशीलनीयतामर्हति। सर्वप्रथमतया च काव्यविभागः सङ्क्षेपतया अनुशीलनीयः।

४. काव्यविभागः

आनन्दवर्धनाचार्यः प्रथमोद्द्योते- **यत्रार्थः शब्दो वा...** इत्यारभ्य **ध्वनिसंज्ञितः प्रकारः काव्यस्य व्यञ्जितस्सोऽयम्**[२] -इत्यन्तं ध्वनिं निरूप्य ततः -

प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते।
यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत्।।[३]

इति द्वितीयं ध्वनिनिष्पन्दरूपं प्रभेदं न्यरूरुपत्[४]।

ततश्च - **प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।**
काव्ये उभे ततोऽन्यच्चित्रमित्यभिधीयते।।
चित्रं शब्दार्थभेदेन द्विविधञ्च व्यवस्थितम्।[५]

---

१. ध्व.आ. पृ. ३ २. ध्व.आ. पृ. २५५ ३. तत्रैव
४. ध्व.आ. पृ. २६३ तदयं ध्वनिनिष्पन्दरूपो द्वितयोऽपि महाकविविषयोऽतिरमणीयः लक्षणीयः।
५. ध्व.आ. पृ. २७५

इति ध्वनिगुणीभूतव्यङ्ग्यातिरिक्ततया चित्रात्मकः काव्यप्रभेदः ध्वनिकारेण न्यरूपि। **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्**[१] इति कथयता मम्मटाचार्येण अवरम् = अधमम् इति तृतीयः **चित्र**संज्ञितः काव्यप्रकारो निरूपितः।

५. चित्रलक्षणम्

किं नाम चित्रत्वमित्युक्ते चित्रमिति **गुणालङ्कारयुक्तम्**[२] इत्यपि तत्रैव व्यख्यातम्। अव्यङ्ग्यम्= अस्फुटव्यङ्ग्यम् इत्यर्थः। अप्पय्यदीक्षितेन चित्रमीमांसायामप्ययमेव विभागः समादृतः[३]। किं नाम चित्रत्वम्? किं त्रिविधप्रतीयमानार्थस्पर्शशून्यत्वम् ? उत 'रसभावादि-विवक्षारहितत्वे सति अलङ्कारनिबन्धशालित्वम्' इत्यनयोः सम्भावितयोः पक्षयोः द्वितीय-पक्षमेव सिद्धान्तयामास। तत्र च चित्रकाव्ये वस्त्वलङ्काररूपव्यङ्ग्यस्याभावेऽपि कवि-व्यापारविषयत्वव्यापकस्य रसात्मकव्यङ्ग्यस्य सद्भावेन रसात्मकव्यङ्ग्यशून्यत्वस्य काव्यसामान्ये एवाभावात्। **यस्मादवस्तु संस्पर्शिता काव्यस्य नोपपद्यते। वस्तु च सर्वमेव जगदद्भुतमवश्यं कस्यचिद्रसस्य चाङ्गत्वं प्रतिपद्यते।**[४] इति ध्वनिकारोक्तेः। तस्मात्–ह्**विवक्षोपारूढ एव काव्ये शब्दानामर्थः**[५] इति सैद्धान्तिकीं सरणिमाश्रित्य रसादिविवक्षां विना कविः यत्र शब्दालङ्कारमर्थालङ्कारं वा उपनिबध्नाति, तद्विवक्षाराहित्येन रसादिशून्यत्वमर्थस्य परिकल्प्यते। ततश्च 'रसभावादितात्पर्यशून्यत्वे सति रसादिनिबन्ध-शालित्वं चित्रत्वम्' –इति ध्वन्यालोकग्रन्थादायाति।

५.१. चित्र–अलङ्कारपदयोः भेदः

रसभावादिविषयविवक्षाविरहे सति।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः।।[६]

'रसादितात्पर्यविरहे अलङ्कारनिबन्धः चित्रविषयः' इति कथनेन सत्यपि रसादितात्पर्ये अलङ्कारनिबन्धः अस्तीति ज्ञायते। तेन च रसादितात्पर्यशालिनः अलङ्कारत्वम्। तदन्यस्य चित्रत्वमिति ज्ञायते। अत एव **अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्**[७] इति मम्मटोक्तमध्यमकाव्यलक्षणस्य वाच्यादनतिशायित्वस्य चित्रकाव्येऽपि सत्त्वात् अतिव्यप्तिवारणाय चित्रान्यत्वं विशेषणीयम् –इत्यूचिरे सारबोधिनीकाराः।

१. का.प्र. (प्रदीपोद्द्योतप्रभासहितः) पृ. २७ २. तत्रैव
३. चि.मी. (कम्भम्पाटि. आञ्जनेयुलु) पृ. ३०२ ४. ध्व.आ. पृ. २७६
५. ध्व.आ. पृ. २७७ ६. तत्रैव ७. का.प्र. (ज्योत्स्ना मोहन्) पृ. १३६

अतश्च चित्रमन्यत्, अलङ्कारश्चान्यः। परम्– **अर्धचित्रमीमांसा** इति स्वग्रन्थस्य नामकुर्वाणेन अप्पय्यदीक्षितेन अर्थालङ्कारसामान्य एव चित्रत्वाभ्युपगमात् काव्यप्रकाश-कारोक्तद्वितीयकाव्यलक्षणे, सारबोधिनीटीकाकारोक्तस्य चित्रान्यत्वस्य निवेशे पर्यायोक्त्यादिषु चित्रत्वस्य सम्मतत्वेन तत्र चित्रान्यत्वस्याभावात् मध्यमकाव्यलक्षणस्य अव्याप्तिं प्रतिपादयता पण्डितराजेन अपि दूषणाच्च[१] – तयोर्दृष्ट्या चित्रालङ्कारयोः भेदो नास्ति इति ज्ञायते। वस्तुतः जगन्नाथेन चित्रालङ्कारपरिधिं विस्तारयितुकामेन पर्यायोक्त्यादीनां चित्रत्वमपि स्वीकृतं स्यात्। तथा च तयोर्मते नास्ति चित्रालङ्कारयोर्भेदः। एवम् अलङ्कार-चित्रयोः भदे अभेदे च तत्तन्मतानुसारेण ज्ञाते इदानीं क्रमप्राप्तमलङ्कारसामान्यस्वरूपं जानीमः।

६. अलङ्कारसामान्यस्वरूपम्

'अलङ्क्रियते अनेन इत्यलङ्कारः' इति करणव्युत्पत्त्या अलंकृतिसाधनम-लङ्कारशब्दार्थः। **काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते**[२] इति प्राचीनेषु दण्डी सामान्यतः काव्यशोभाकरान् धर्मान् (मार्गव्यवस्थापकान्) अलङ्कारानाह। मार्गव्यवस्थापकं काव्यशोभासम्पादकं तत्त्वं तु गुणः। वामनस्तु– **काव्यशोभातिशयसम्पादकं तत्त्वमलङ्कारः**[३] इत्याह। ध्वनिकारस्तु–

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।।[४]

इति कथयन् रसाद्याश्रितं रसाद्युपस्कारकं तत्त्वं गुणः। वाच्यवाचकलक्षणाङ्गाश्रितः रसाद्युप-स्कारकस्तु अलङ्कार इत्याह।

लोचनकारस्तु रसवदाद्यलङ्कारनिरूपणसन्दर्भे **चन्द्रादिना वस्तुना यथा वस्त्वन्तरं वदनाद्यलङ्क्रियते तदुपमितत्वेन चारुतयावभासात्**[५] इत्यादिना उपस्कारकत्वमेवा-लङ्कारसामान्यलक्षणतया ध्वनयामास।

---

१. (अ) र.गं. पृ. २० 'यत्तु अतादृशि गुणीभूतव्यङ्ग्यम्' इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्वं टीकाकारैर्दत्तम्, तन्न। पर्यायोक्ति-समासोक्त्यादिप्रधानकाव्येष्वव्याप्त्यापत्तेः। तेषां गुणीभूतव्यङ्ग्यताया-श्चित्रतायाश्च सर्वालङ्कारिकसम्मतत्वात् ।'

(आ) का.आ. (द्वितीयपरिच्छेदः) पृ. १९९ 'काश्चिन्मार्गव्यवस्थार्थमुक्ताः प्रागप्यलङ्क्रियाः'

२. का. आ. (द्वितीयपरिच्छेदः) पृ. १९७

३. का.अ.सू. सं.३.१.३ पृ. ८३

४. ध्व.आ. (द्वितीयोद्द्योतः) पृ. ९५

५. ध्व.आ. लो. (द्वितीयोद्द्योतः) पृ. ८८

अप्पय्यदीक्षितस्तु– चित्रमीमांसायाम् अलङ्कारलक्षणस्य व्यङ्ग्यालङ्कारेष्वति-व्याप्तिमाशङ्क्य तत्तदलङ्कारलक्षणेषु अव्यङ्ग्यत्वं विशेषयति। अलङ्कारभूतोपमालक्षणन्तु एतदेवादुष्टाव्यङ्ग्यत्वविशेषितम्, तथा च दीक्षितः 'अव्यङ्ग्यत्वे सति अलंकृतिसाधनत्व-मित्यभिप्रैति'[१]। अलङ्कारचन्द्रिकाकारः वैद्यनाथतत्सत् पण्डितस्तु एवमाह – **अलङ्कारत्वञ्च रसादिभिन्न–व्यङ्ग्यभिन्नत्वे सति अलंकृतिसाधनत्वमित्यभिप्रैति**[२] इति।

अलङ्कारसामान्यलक्षणे उपस्कारकत्वं मुख्यं तत्त्वम्। तच्च सामान्यतः कं प्रतीति जिज्ञासायाम्– **रसादिकं प्रति** इति समाधानम्। यत्र रसः रसादिकं नास्ति तत्र कं प्रत्युपस्कारकत्वम् ? इत्युक्ते– **यत्र तु नास्ति रसः तत्र उक्तिवैचित्र्यमात्रपर्यवसायिनः**[३] इति कथयता मम्मटाचार्येण उक्तिवैचित्र्यमात्रपर्यवसायित्वमलङ्कारस्योक्तम्। किन्तु उपस्कारकस्यैव अलङ्कारत्वे दृष्टिं निदधता पण्डितराजेन तु उपस्कार्यपरिधिं विस्तार्य उपस्कारकत्वं समर्थितम्। अलङ्कारेणोपस्कार्यं किं तत्त्वम् ? इत्युक्तेह्न रस–वस्तु–अलङ्कारात्मकं त्रिविधं व्यङ्ग्यम्, वाच्यं वस्तु, वाच्यमलङ्कारश्चेत्युक्तम्। विवृतञ्च तेनैव–ह्न

नयने शिशिरीकरोतु मे शरदिन्दुप्रतिमं तवाननम्[४]

अत्र शरदिन्दूपमायाः नयनशिशिरीकरणोपस्कारकत्वम्। एवम्–ह्न

शिशिरेण यथा सरोरुहं दिवसेनामृतरश्मिमण्डलम्।
न मनागपि तन्वि! शोभते तव रोषेण तथेदमाननम्।।[५]

इति श्लोके शोभाभावात्मकधर्मैक्यरूपदीपकस्य वाच्योपस्कारकत्वम्। एवञ्च अलङ्कार-लक्षणान्तर्गतमुपस्कारकत्वं नाम त्रिविधव्यङ्ग्य–वाच्यवस्तु–वाच्यालङ्कारान्यतमोप-स्कारकत्वम्। तत्र च अलङ्कारसामान्यलक्षणे– 'सुन्दरत्वे सति' इत्यपि विशेषणीयम्। सौन्दर्यञ्च चमत्कृत्याधायकत्वम्। अस्य दलस्याभावे **अद्य देवदत्त इव यज्ञदत्तोऽपि अनुपस्थितः**[६] इत्यधिकारिगतव्यङ्ग्यलौकिक**कोप**प्रकाशकवाक्ये अतिव्याप्तिः। अतः सुन्दरत्वे सतीति। कोपस्य लौकिकत्वेन अचमत्कारित्वात् नातिव्याप्तिः। उपस्कारकत्वाभावे–

१. चि.मी. पृ. ७४ २. कु.आ.अ.चं. पृ. २
३. (अ) का.प्र. (झल्कीकर) पृ. ४६५
(आ) का.प्र.प्र. पृ. ११५ यत्र प्रधानं रसादिः तत्र ध्वनिः, यत्र त्वप्रधानं तत्रालङ्कारः
४. कु.आ.अ.चं. पृ. २२७ ५. र.गं. पृ. २२८ ६. ज.सि.प. पृ.

स्तनाभोगे पतन् भाति कपोलात् कुटिलोऽलकः।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः।।[1]

इति कुटिलोऽलके वर्ण्यमानोरगसादृश्ये शृङ्गारभयानकान्यतरानभिव्यञ्जकत्वेन अनुपस्कारके स्वतः सुन्दरे अतिव्याप्तिः। अतः उपस्कारकत्वे सतीति। एवञ्च **सुन्दरत्वे सत्युपस्कारकत्वम्**[2] इति पण्डितराजेनालङ्कारसामान्यलक्षणमुक्तम्। एवमुपस्कारकत्वतत्त्व-प्राधान्यादलङ्कारलक्षणे व्यङ्ग्योपमादिषु उपस्कारकत्वाभावेनातिव्याप्तिवारणसम्भवे, तद्वारणाय दीक्षितेन कृतः अव्यङ्ग्यत्वविशेषप्रयासः, वैद्यनाथकृतः रसादिभिन्नव्यङ्ग्यभिन्नत्व-प्रस्तावो वा अनावश्यकः। अस्तु प्रकृतमनुसरामः।

एवमलङ्कारसामान्यस्वरूपे ज्ञाते चन्द्रालोकस्थालङ्कारेषु व्यङ्ग्यस्वरूपानुशीलनाय आदौ जयदेव-दीक्षितयोः तदीयचन्द्रालोक-कुवलयानन्दयोः च प्रकृतोपयोगी परिचयः दीयते।

७. चन्द्रालोकस्य तत्कर्तुः जयदेवस्य च लघुपरिचयः

अलङ्कारशास्त्रे चन्द्रालोकः कश्चित् नातिविस्तृतः अपेक्षितालङ्कारशास्त्रीयसर्व-विषयसमन्वितः महत्त्वपूर्णो ग्रन्थः। कायेन लघुरपि गुणगरिम्णा अलघुतामातनोति। एकधा कथनीये चन्द्रालोकः अलङ्कारशास्त्रपाठकानां हस्तपुस्तकायमानः (Just like a Hand-Book) वरीवर्ति। दशमयूखात्मके ग्रन्थराजेऽस्मिन्ह्

१. **प्रथमो मयूखः** काव्यहेतु-काव्यलक्षण-शब्दभेद-पदवाक्यलक्षणनिरूपणात्मा।

२. **द्वितीयस्**तु दोषमयूखः।

३. **तृतीये** लक्षणमयूखे नाट्यशास्त्रे षोडशोऽध्याये[3] निरूपितेषु लक्षणसंज्ञितेषु अलङ्कारेषु अक्षरसंहतिप्रमुखाः कार्यान्ताः दश लक्षणालङ्काराः निरूपिताः।

४. **चतुर्थस्**तु गुणमयूखः।

५. **पञ्चमे मयूखे** तु अलङ्कारलक्षणमुक्त्वा छेकानुप्रासादयः चित्रालङ्कारान्ताः अष्टौ शब्दालङ्काराः निरूपिताः। ततस्तस्मिन्नेव मयूखे उपमालङ्कारमारभ्य अत्युक्तिपर्यन्तं जयदेवोक्तोपमादिषु अलङ्कारप्रभेदैः सह १०५ अर्थालङ्काराः, रसाद्यलङ्काराः सप्त चेति आहत्यह्व ८+१०५+७=१२० इति अलङ्काराः पञ्चममयूखे निरूपिताः।

१. र.गं. पृ. २०६ २. र.गं. पृ. ४२८ ३. भ.ना. पृ. २५५

६. ततः **षष्ठो मयूखस्**तु रस-तदाभासादिप्रभेदनिरूपणात्मा वृत्तिनिरूपणात्मा च।

७. **सप्तममयूखस्**तु व्यञ्जनास्वरूपनिरूपणात्मा ध्वनेः एकपञ्चाशत् भेदप्रतिपादकः, व्यङ्ग्यस्य विभागान्तरनिरूपणात्मा चेति ध्वनिमयूखः।

८. **अष्टममयूखस्**तु गुणीभूतव्यङ्ग्यमयूखः।

९. ततो **नवममयूखः** लक्षणावृत्तिनिरूपणात्मा।

१०. ततः **दशमः मयूखस्**तु अभिधानिरूपणात्मा शक्तिमयूखः।

एवं रूपकलक्षणशास्त्रपरिज्ञानं विहाय, प्रायशः सर्वेषामेव अलङ्कारशास्त्रीय-विषयाणामत्र नातिविस्तरेण निरूपणात् चन्द्रालोकः आलङ्कारिकाणाम् अत्यन्तोपकारकग्रन्थः। एवं ग्रन्थस्वरूपे ज्ञाते ग्रन्थकारजयदेवमधिकृत्य किञ्चिदुच्यते।

७.१. जयदेवपरिचयः

साहित्यप्रपञ्चे प्रधानतया त्रयः जयदेवाः सन्ति। एकः प्रसिद्धस्य **गीतगोविन्दस्य कर्ता** जयदेवः, यस्य पितरौ भोजदेवः रामादेवी च[१]। यश्च वङ्गप्रान्ते (Birbhum District) बिर्भुम् मण्डले **किन्दुबिल्व**नामकाभिजननिवासी[२]। यश्च कृत्स्नमेव जगत् स्वीयगीतिप्रधान-काव्यामृतलहर्यां परिप्लावितवान्। एतदन्यः एव प्रकृतचन्द्रालोकग्रन्थकर्ता **जयदेव**नामकः कश्चिदस्ति यश्च **पीयूषवर्षाभिधानः**। **चन्द्रालोकममुं स्वयं वितनुते पीयूषवर्षः कृती**[३] इति प्रथममयूखद्वितीयश्लोके, एवं प्रथममयूखान्तिमश्लोके-ह्व

महादेवः सत्रप्रमुखः मखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
अनेनासावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखस्सुमनसः।।[४]

इति दर्शनात् स्पष्टतया इदं ज्ञायते यत्- जयदेवस्य अपरं नाम **पीयूषवर्ष** इति, स एव **चन्द्रालोक**कर्ता इति, तस्य पितरौ महादेव-सुमित्रासंज्ञकौ पुण्यदम्पती इति।

---

१. चं.आ. आरम्भभाषणम्, (नन्दकिशोरशर्मा) पृ. ७

श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ।। (गीतगो. १२.११)

२. P.V. Kane, H.S.P p.291 ३. चं.आ.श. पृ. ५ (श्लो.२) ४. चं.आ.श. पृ. २२ (श्लो.१६)

किञ्च **प्रसन्नराघकनाटके** प्रथमाङ्कचतुर्थश्लोकेन इदं ज्ञायते यत्– तस्य नाटकस्य कर्ता महादेव–सुमित्रासुतः जयदेवः इति[१], स च अयञ्च एक एव इति च। यद्यपि P.V. Kane महाशयेन चन्द्रालोकरचयिता प्रायशः **पक्षधरजयदेवेन** अभिन्नः भवेत् इति काचित् अभ्यूहा कृता[२]। किन्तु पं.वटुकनाथशर्ममहोदयस्य आलोचनानुसारं तार्किकः पक्षधरजयदेवः अस्मादन्य एव। पक्षधरजयदेवश्च विष्णुपुराणप्रतिकृतिं A.D.1464 वर्षे लिलेख।

अतः मनमोहनचक्रवर्त्यनुसारं A.D.1278 वासित्वेन सम्भाव्यमानेन पीयूषवर्ष–जयदेवेन, वस्तुतः A.D.1464 मध्यवासी पक्षधरः कथमैक्यं भजेत् ? किञ्च पक्षधरजयदेवस्य मातापितरौ सुमित्रामहादेवश्चेति क्वापि न निर्दिष्टमस्ति। अतः केवलं तार्किकत्वसामान्यमात्रेण पीयूषवर्षजयदेवस्य पक्षधरजयदेवेन ऐक्यं सम्पादयितुं न शक्यते। तस्मात् अयमन्यः जयदेवः। अस्य च को वा कालः इत्युक्ते इदं विज्ञेयं भवति– A.D.1100-1150 समयवासिना अलङ्कारसर्वस्वकारेण उक्तस्य विकल्पालङ्कारस्य विचित्रालङ्कारस्य च चन्द्रालोके दर्शनात् निश्चयेन पीयूषवर्षजयदेवः अलङ्कारसर्वस्वकारात् अर्वाचीनः। निश्चयेन कोऽस्य समयः इति जिज्ञासायाम्–

'कदली कदली, करभः करभः, करिराजकरः करिराजकरः'[३]

इत्यादिप्रसन्नराघवस्थपद्यस्य क्रीस्तोःपरम् 1350-1450 समयवासिना विश्वनाथ–कविराजेन स्वीये साहित्यदर्पणे उदाहरणात्[४], प्रायशः अयं क्रीस्तोः परम् 1200-1300 मध्यवासी भवेदिति पं. बटुकनाथशर्ममहोदयानां निश्चयः[५]।

७.२. जयदेवचन्द्रालोकोपरि व्याख्याः

१. शरदागमःह्व प्रद्द्योतनभट्टाचार्यविरचितः एकः। बलभद्रतनयः प्रद्द्योतनभट्टः बुन्देलवंशावतंसस्य महाराजवीरभद्रदेवस्य १६२० वैक्रमवत्सरकालीनस्य राज्ञः सभायां पण्डितः बभूव[६]। अतः अयं प्रद्द्योतनभट्टः प्रायशः A.D. 1571 कालीनः इति ज्ञायते।

---

१. चं.आ. आरम्भभाषणम्, (नन्दकिशोरशर्मा) पृ. ९, १०
२. P.V. Kane, H.S.P p.291
३. प्रसन्नराघवनाटकम्, १.३७
४. सा.द. (चतुर्थपरिच्छेदः) पृ. ३६२
५. चं.आ.रा. पीयूषवर्षजयदेवः (बटुकनाथशर्मा) पृ. ७
६. तत्रैव पृ. ११

यद्यपि कुवलयानन्दोपसंहारे **चन्द्रालोको विजयतां शरदागमसम्भवः**[1] इति अप्पय्यदीक्षितेन उक्तस्य श्लोकार्धस्य शरदागमसंज्ञकश्चन्द्रालोकमूलभूतो ग्रन्थः **शरदागमः** इति कश्चित् ग्रन्थः विद्यते इति अभ्युपगतं भवति। तथापि स ग्रन्थः इदानीं न कुत्रापि दृश्यते। तस्य ग्रन्थस्य रचयितृनामापि वैद्यनाथेन नोट्टङ्कितम्। तथापि 'शरदागमं प्रति सम्भवः उत्पत्तिहेतुभूतः अयं चन्द्रालोकः, यस्य च टीका **शरदागम**नाम्नी प्रद्द्योतनभट्टेन रचिता' इति विज्ञेयं भवति। रसिकरञ्जनीटीकाकारेण अप्पय्यदीक्षितस्य शिष्यत्वमापन्नस्य कस्यचित् विदुषः सोदरस्य पौत्रेण गङ्गाधरवाजपेयिना अपि, शरदागमव्याख्या संस्कृतः चन्द्रालोक एव अप्पय्यदीक्षितविरचितकुवलयानन्दस्य मूलभूतो ग्रन्थ इति व्याख्यायि।

२. **रमा–** वैद्यनाथपायगुण्डे नाम्ना नागेशभट्टशिष्येण चन्द्रालोकोपरि विरचिता व्याख्या।

३. **राकागमः–** गागाभट्ट इति प्रसिद्धापरनामकेन विश्वेश्वरभट्टेन विरचितः टीकाग्रन्थः पं. बटुकनाथशर्ममहोदयेन संस्कृतः वि.सं.१९९५ मध्ये मुद्रितः।

श्रीनन्दकिशोरशर्ममहोदयः A.D.1995 वर्षे पौर्णमासी–कथाभट्टीयाख्यचन्द्रालोक–संस्कृतहिन्दीटीके चौखम्बासंस्थाद्वारा प्राकाशयन्। उपर्युक्तचन्द्रालोकप्राचीनव्याख्यात्रयातिरिकेन अन्याः प्राचीनाः पञ्चव्याख्याः परिगणितवान्।

१. **कुवलयानन्दः–** अप्पय्यदीक्षितस्य कुवलयानन्दस्थचन्द्रालोकव्याख्या (तस्याभि–प्रायेण कुवलयानन्दः चन्द्रालोकस्य व्याख्या भवति)। २. **वाजचन्द्रचन्द्रिका–** गागाभट्टेनैव कृता। ३. **शारदाशर्वरी–** विरूपाक्षेण विरचिता। ४. **चन्द्रालोकदीपिका–** ५. **निगूढार्थदीपिका–** एते द्वेऽपि व्याख्ये अज्ञातकर्तृके अमुद्रिते च।

एवं नन्दकिशोरशर्ममहोदयेन चन्द्रालोकस्य (८)अष्टौ प्राचीनव्याख्याः सङ्गृहीताः। अपि च **शरदागमटीकया** संवलितः **खिस्ते–**इत्युपाख्य–नारायणशास्त्रिभूमिकादिभिः सम्पादितः कश्चित् चन्द्रालोकग्रन्थः, यत्र च डा. गङ्गासागररायमहाशयेन विरचित **आलोकवर्धिनी** संस्कृत–हिन्दीटीकेऽपि दृश्यते। तदेवं विशिष्टस्यास्य चन्द्रालोकस्याधारेण कुवलयानन्दः, तद्गतः चन्द्रालोकश्च समुद्भूतः। अतः इदानीं कुवलयानन्दस्य तत्कर्तुः दीक्षितस्य च परिचयः दीयते–

---

१. कु.आ. पृ. २०३

८. अप्पय्यदीक्षितस्य (१५००–१६००) कुवलयानन्दस्य च परिचयः

चतुरधिकशतग्रन्थप्रणेता सर्वदर्शनशास्त्रपयःपारावारपारदृश्वा भरद्वाजगोत्रः पितृकृत**गणेश**नामा **अप्पय्यदीक्षितः** इति सुप्रसिद्धाभिधानः कुवलयानन्दस्य ग्रन्थस्य कर्ता।

अयञ्च श्रीमत्काञ्चीनगरनिकटे **अडयप्पलम्** इत्यग्रहारे निवसतः A.D. 1550-1578 मध्ये प्रशासकस्य चिन्नबोम्माराजस्य आस्थानविदुषः तत्सचिवस्य च श्रीरङ्गराजमखिनः, श्रीमत्याः मङ्गळाम्बायाश्च चिरजातः पुत्रः। दीक्षितपिता चत्वारिंशवर्षे अतीतेऽपि सन्तानाभावेन अनपत्यतया दोदूयमानः चिदम्बरक्षेत्रे नटराजमाराधितवान्। तस्य पुण्यवशादेव द्वौ पुत्रौ तेनासादितौ। तयोर्ज्येष्ठः अप्पय्यदीक्षितः। अप्पय्यदीक्षितेन लिखितेषु शताधिकग्रन्थेषु–

वेदान्तशास्त्रे– १. भामतीकल्पतरोः परिमलव्याख्या, २. सिद्धान्तलेशसङ्ग्रहः, ३. वेदान्तनक्षत्रवादावली, ४. माध्वतन्त्रमुखमर्दनम्, ५. माध्वमतविध्वंसनम्, ६. न्यायरक्षामणिः इत्येते प्रमुखाः ग्रन्थाः। **पूर्वमीमांसाशास्त्रे–** १.विधिरसायनम्, २. नक्षत्रवादावळी इत्येतौ ग्रन्थौ। **रामानुजमते–** १. नयनमयूखमालिका, २. वेदान्तदेशिक-विरचितपादुकासहस्रस्य व्याख्या इत्येवमादयः पञ्च ग्रन्थाः प्रसिद्धाः। **व्याकरणशास्त्रे–** १. नक्षत्रवादावळी इति ग्रन्थः प्रसिद्धः। किं बहुना शिवाद्वैते, विशिष्टाद्वैते, माध्वमते वा अनेन महानुभावेन अस्पृष्टं न किञ्चिद्वस्तु अस्ति।

अलङ्कारशास्त्रेऽपि– अस्य सेवा निरुपमा। १. वृत्तिवार्तिकम्, २. चित्रमीमांसा, ३. कुवलयानन्दः इत्येते प्रमुखाः ग्रन्थाः अलङ्कारशास्त्रस्य आदर्शभूताः। अप्पय्यदीक्षितस्य देश–काल–ग्रन्थरचनादिकमधिकृत्य विशिष्य पं. लक्ष्मीनारायणभट्टस्य **श्रीमदप्पय्य-दीक्षितसाहित्यशास्त्रीयकृतीनां विमर्शात्मकमध्ययनम्** इति शोधप्रबन्धात् विज्ञेयम्।

८.१. कुवलयानन्दः :ह्व

अलङ्कारशास्त्रीयरचनासु कुवलयानन्दः एका परिणता रचना। कुवलयानन्दे श्लेषालङ्कारप्रकरणे **एतद्विवेचनन्तु चित्रमीमांसायां द्रष्टव्यम्**[1] इति कथनात्, कुवलयानन्दः चित्रमीमांसायाः अनन्तरकालीना रचना इति स्पष्टतया ज्ञायते। कुवलयानन्दः स्नातकस्तरीय-च्छात्राणाम् अलङ्कारशास्त्रे अत्यन्तोपकारकः ग्रन्थः। कुवलयानन्दशैली प्रसन्नगम्भीरा भवति। अर्थात् पठनमात्रेण अध्येतॄणाम् आविष्कृताभिप्रायमिव आभाति। परन्तु एकैकस्य

१. कु.आ. पृ. ८२

वाक्यस्य विन्यासशैल्याः परिशीलनेन बह्वंशगर्भितत्वस्य नैकत्र दर्शनात्, यथा तस्य शैली प्रसन्ना तथा गम्भीरा च इति ज्ञायते। कुवलयानन्दं वेङ्कटपतिराजस्य नियोगात् अकरोदिति अप्पय्यदीक्षित एव आविष्करोति[1]। अयञ्च कुवलयानन्दग्रन्थराजः **शरदागमटीका** संस्कृतचन्द्रालोकस्य व्याख्यानात्मकः, चन्द्रालोकश्च व्याख्येयो मूलग्रन्थः। तत्र अप्पय्यदीक्षितेन–

इत्थं शतमलङ्काराः लक्षयित्वा निदर्शिताः।
प्राचामाधुनिकानाञ्च मतान्यालोच्य सर्वतः।।[2]

इति कथयता शतमलङ्काराः निरूपिताः। ततः कुवलयानन्दे स्वयं रसवदादयः भाव-शबलतान्ताः सप्तालङ्काराः, पश्चात् प्रत्यक्षादयः सङ्करसङ्करान्ताः (१६) षोडशा-लङ्काराश्च निरूपिताः। आहत्य कुवलयानन्दे १२३ अलङ्काराः निरूपिताः।

८.२. चन्द्रालोक–कुवलयानन्दस्थकारिकात्मकचन्द्रालोकयोः साम्यवैषम्यचर्चा

जयदेवस्य चन्द्रालोके **शतमलङ्काराः** सन्तीति लौकिकीप्रसिद्धिरस्ति। त एव अलङ्काराः कुवलयानन्देऽपि रसाद्यलङ्कारनिरूपणात् प्राक् प्रपञ्चिताः इति वक्ष्यमाण-कारणेन ज्ञायते।

येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।
प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते।।[3]

इत्यप्पय्यदीक्षितेन प्रारम्भे– चन्द्रालोकलक्ष्यलक्षणश्लोका एव प्रायशः गृह्यन्ते, इतरेषां तु अभिनवा विरच्यन्ते इत्युक्तत्वात्, **'इत्थं शतमलङ्काराः लक्षयित्वा निरूपिताः'** इति चोक्तत्वात् कुवलयानन्दः व्याख्यात्मकः इत्येकः पक्षः। किन्तु इदानीन्तनजयदेवचन्द्रालोक-पाठस्य अथवा **शरदागमसम्भवः** इति दीक्षितेन प्रमाणीकृतस्य कुवलयानन्दस्थ-चन्द्रालोकपाठस्य च भूयान् एव भेदः दृश्यते। अतः स्वतन्त्रग्रन्थः इति चापरः पक्षः। तदत्र पक्षद्वये किमत्र युक्तम् ? इति चेत् अत्रेदं बोध्यम्–

---

१. कु.आ. पृ. २०३ **अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।**
नियोगाद्वेङ्कटपतेः निरुपाधिकृपानिधेः ।। इति ।

२. तत्रैव पृ. १८२

३. तत्रैव पृ. २, (श्लोक.५)

कुवलयानन्दः व्याख्यानात्मकः इत्येव प्राप्तम्। ननु मूलस्य बाहुल्येन परावृत्तौ मूलव्याख्यासम्प्रदायस्य भग्नत्वात् कथमयं कुवलयानन्दः चन्द्रालोकव्याख्यात्मको भवितुमर्हति? इति चेत् अत्रोच्यते। अधिकाधिकमयं कुवलयानन्दग्रन्थः सचन्द्रालोकः नूनं **स्वतन्त्रग्रन्थ** एव। व्याख्यात्मकत्वन्तु अस्य नान्तरीयकतया अथवा अर्थात् सिद्धम्। यतः बहवः लक्ष्यलक्षणश्लोकाः अलङ्कारक्रमविपर्यासेऽपि **प्रायस्त एव** इति गृह्यन्ते। अत एवोक्तं दीक्षितेन **प्रायस्त एव तेषाम्** इति। एवञ्च एतादृशकारणानुरोधेन अस्य ग्रन्थस्य अर्थात् सिद्धं व्याख्यात्मकत्वं न निवारयितुं शक्यते।

८.२.१. कुवलयानन्दस्य तत्स्थचन्द्रालोकस्य च स्वतन्त्रग्रन्थत्वम्

किन्तु इदमत्र प्रधानतया अवधेयं कुवलयानन्दात्मा ग्रन्थः सचन्द्रालोकः स्वतन्त्र एव। तथा हि–

१. न ह्यप्पय्यदीक्षितः कुवलयानन्दे **चन्द्रालोकं व्याख्यास्यामि** इति श्रौतीं प्रतिज्ञामकरोत्। प्रत्युत–

अलङ्कारेषु बालानामवगाहनसिद्धये।
ललितः क्रियते तेषां लक्ष्यलक्षणसङ्ग्रहः।।[१]

इति लक्ष्यलक्षणसङ्ग्रहकरणमेव दीक्षितेन प्रतिज्ञातम्। अतः प्रतिज्ञाऽभावात् साक्षात् कुवलयानन्दस्य व्याख्यात्मकत्वं न सिद्ध्यति।

२. कुवलयानन्दे शतालङ्कारभागपर्यन्तं निरूपितानामलङ्काराणां चन्द्रालोके पञ्चममयूखे निरूपितानामर्थालङ्काराणाञ्च भूयो भेदः दृश्यते। तद्यथा– उपमारभ्य अत्युक्तिपर्यन्तं (रसवदाद्यलङ्कारनिरूपणात् प्राक्) १०५ अलङ्काराः चन्द्रालोके निरूपिताः, यत्र कुवलयानन्दस्थचन्द्रालोकत्वाभिमतभागे (रसवदाद्यलङ्कारनिरूपणात् प्राक्) **इत्थं शतमलङ्काराः** इति शतमेव अलङ्काराः निरूपिताः। अतश्च सङ्ख्यावैषम्यं स्पष्टमेव।

तदत्र जयदेवचन्द्रालोक–कुवलयानन्दयोः व्याख्याव्याख्येयत्वसम्बन्धे विवादग्रस्ते चन्द्रालोकस्थरसवदाद्यलङ्कारपर्यन्तालङ्काराणाम्, अन्येषामलङ्काराणाञ्च पार्थक्येन इदन्तानिर्णयाय, पाठसौकर्याय समनन्तरप्रवर्तिष्यमाणविचारणाय च उपयोगितया पृथक् पृथक्

१. कु.आ. पृ. २

पट्टिकाः दीयन्ते। चन्द्रालोक-कुवलयानन्दपीठिकासु अन्यकृतासु एतादृशपट्टिकाभावेन कश्चित् सन्देह एव अवशिष्टः। अतस्तत्पूरणाय अपि पट्टिका दीयते-

❋ जयदेवचन्द्रालोकपञ्चममयूखस्थाः शब्दालङ्काराः ८

१. छेकानुप्रासः	२. वृत्त्यनुप्रासः	३. लाटानुप्रासः	४. स्फुटानुप्रासः
५. अर्थानुप्रासः	६. पुनरुक्तिप्रतीकाशः	७. यमकम्	८. चित्रम्

❋ पञ्चममयूखस्थाः उपमादयः रसवदाद्यलङ्कारपर्यन्ताः अर्थालङ्काराः १०५

१. उपमा	२. अनन्वयः	३. उपमेयोपमा	४. प्रतीपोपमा
५. ललितोपमा	६. स्तबकोपमा	७. सम्पूर्णोपमा	८. रूपकम्
९. सोपाधिरूपकम्	१०. सादृश्यरूपकम्	११. आभासरूपकम्	
१२. रूपितरूपकम्	१३. परिणामः	१४. उल्लासः	१५. अपह्नुतिः
१६. पर्यस्तापह्नुतिः	१७. भ्रान्तापह्नुतिः	१८. छेकापह्नुतिः	१९. कैतवापह्नुतिः
२०. उत्प्रेक्षा	२१. गूढोत्प्रेक्षा	२२. स्मृतिः	२३. भ्रान्तिः
२४. सन्देहः	२५. मीलितम्	२६. सामान्यम्	२७. उन्मीलितम्
२८. अनुमानम्	२९. अर्थापत्तिः	३०. काव्यलिङ्गम्	३१. परिकरः
३२. परिकराङ्कुरः	३३. अक्रमातिशयोक्तिः	३४. अत्यन्तातिशयोक्तिः	
३५. चपलातिशयोक्तिः		३६. सम्बन्धातिशयोक्तिः	
३७. भेदकातिशयोक्तिः		३८. रूपकातिशयोक्तिः	
३९. प्रौढोक्तिः	४०. सम्भावना	४१. प्रहर्षणम्	४२. विषादनम्
४३. तुल्ययोगिता	४४. दीपकम्	४५. आवृत्तिः	४६. प्रतिवस्तूपमा
४७. दृष्टान्तः	४८. निदर्शना	४९. व्यतिरेकः	५०. सहोक्तिः
५१. विनोक्तिः	५२. समासोक्तिः	५३. खण्डश्लेषः	५४. भङ्गश्लेषः
५५. अर्थश्लेषः	५६. अप्रस्तुतप्रशंसा	५७. अर्थान्तरन्यासः	५८. विकस्वरः
५९. पर्यायोक्तिः	६०. व्याजस्तुतिः	६१. आक्षेपः	६२. गूढाक्षेपः
६३. विरोधः	६४. विरोधाभासः	६५. असम्भवः	६६. विभावना
६७. विशेषोक्तिः	६८. असङ्गतिः	६९. विषमम्	७०. समम्
७१. विचित्रम्	७२. अधिकम्	७३. अन्योऽन्यम्	७४. विशेषः

७५. व्याघातः	७६. कारणमाला	७७. एकावली	७८. मालादीपकम्
७९. सारः	८०. उदारसारः	८१. यथासङ्ख्या	८२. पर्यायः
८३. परिवृत्तिः	८४. परिसङ्ख्या	८५. विकल्पः	८६. समुच्चयः
८७. समाधिः	८८. प्रत्यनीकम्	८९. प्रतीपम्	९०. उल्लासः
९१. तद्गुणः	९२. पूर्वरूपम्	९३. प्रकारान्तरेण पूर्वरूपम्	
९४. अतद्गुणः	९५. अनुगुणम्	९६. अवज्ञा	९७. प्रश्नोत्तरम्
९८. पिहितम्	९९. व्याजोक्तिः	१००. वक्रोक्तिः	१०१. स्वभावोक्तिः
१०२. भाविकम्	१०३. भाविकच्छविः	१०४. उदात्तम्	१०५. अत्युक्तिः

❋ चन्द्रालोकस्थाः रसवदादयः सप्त अलङ्काराः **७**

१. रसवत्	२. प्रेयः	३. ऊर्जस्वित्	४. समाहितम्
५. भावोदयः	६. भावसन्धिः	७. भावशबलता	

❋ चन्द्रालोकतृतीयमयूखस्थाः लक्षणालङ्काराः **१०**

१. अक्षरसंहतिः	२. शोभा	३. अभिमानः	४. हेतुः
५. प्रतिषेधः	६. निरुक्तम्	७. मिथ्याध्यवसायः	८. सिद्धिः
९. युक्तिः	१०. कार्यम्		

१. एवं जयदेवचन्द्रालोके पञ्चममयूखे शब्दालङ्काराः ***८***

२. तत्रैव उपमादयः अत्युक्त्यन्ताः अर्थालङ्काराः १०५, जयदेवेन उपमारूपकादिभेदानां पृथगलङ्कारत्वेन परिगणितानां कुवलयानन्दस्थ(चन्द्रालोककारिकागत)अलङ्कार-सङ्ख्यादृष्ट्या २६ अलङ्काराणां न्यूनीकरणे (१०५-२६=७९) ***७९***

३. रसवदाद्यलङ्काराः ***७***

४. लक्षणालङ्काराः तृतीयमयूखे उक्ताः - ***१०***

आहत्य ह्न **१०४**

एवं लक्षणालङ्कारैस्सह जयदेवचन्द्रालोके १०४ अलङ्काराः, अन्यथा तु ९४ अलङ्काराः इति फलितम्। २६ अलङ्काराणां न्यूनीकरणपट्टिका तद्विवरणञ्च दीयते इदानीम्।

८.२.२. कुवलयानन्दकारिकागतशतालङ्कारात्मकचन्द्रालोकतुलनादृष्ट्या चन्द्रालोके पृथगलङ्कारत्वादिना पठितानाम् २६ अलङ्काराणां न्यूनीकरणपट्टिकाह्व

१. ललितोपमा	२. स्तबकोपमा	३. सम्पूर्णोपमा	४. प्रतीपोपमा
५. सोपाधिरूपकम्	६. आभासरूपकम्	७. सादृश्यरूपकम्	८. रूपितरूपकम्
९. पर्यस्तापह्नुतिः	१०. भ्रान्तापह्नुतिः	११. छेकापह्नुतिः	१२. कैतवापह्नुतिः
१३. गूढोत्प्रेक्षा	* अक्रमातिशयोक्तिः	१४. अत्यन्तातिशयोक्तिः	
१५. चपलातिशयोक्तिः		१६. सम्बन्धातिशयोक्तिः	
१७. भेदकातिशयोक्तिः		१८. रूपकातिशयोक्तिः	
* खण्डश्लेषः	१९. भङ्गश्लेषः	२०. अर्थश्लेषः	२१. गूढाक्षेपः
२२. विरोधः	२३. उदारसारः	२४. प्रकारान्तरेण पूर्वरूपम्	
२५. भाविकच्छविः	२६. अनुमानम्		

इतः परं कुवलयानन्दालङ्कारपट्टिका एव दातव्या, तथापि कुवलयानन्दसाम्यदृष्ट्या आयोजितायाः न्यूनीकरणपट्टिकायाः अध्ययनं न्याय्यमिति तदेवाविष्क्रियते। तदनन्तरमपि चर्चायां विचारयिष्यमाणतृतीयांशस्य अविच्छेदो न्याय्य इति, तदनन्तरांशानां चर्चाफलस्य च निरूपणानन्तरं कुवलयानन्दगतशतमितालङ्कारपट्टिका अप्पय्यदीक्षितस्य नूतनालङ्कार-पट्टिका च दास्यते।

८.२.३. षड्विंशति (२६) अलङ्काराणां पट्टिकाविवरणम्

एषु जयदेवेन उपमा-रूपक-अपह्नुति-उत्प्रेक्षा-अक्रमातिशयोक्ति-श्लेषादयः अलङ्काराः उक्ताः। किन्तु ग्रन्थद्वयतुलनादृष्ट्या १-४ उपमाभेदानाम्, ५-८ रूपकभेदानाम्, ९-१२ अपह्नुतिभेदानाम्, १३ उत्प्रेक्षातः गूढोत्प्रेक्षायाः, १४-१८ अतिशयोक्तिभेदानाम्, खण्डश्लेषात् (श्लेषस्थानीयात्) १९-२० श्लेषभेदयोः, २१ आक्षेपात् गूढाक्षेपस्य, २२ विरोधाभासात् विरोधालङ्कारस्य, २३ सारालङ्कारात् उदारसारालङ्कारस्य, २४ पूर्वरूपात् प्रकारान्तरेण पूर्वरूपस्य, २५ भाविकात् भाविकच्छवेः, २६ कुवलयानन्दे शताधिका-लङ्कारेभ्यः अनन्तरं पठितत्वेन चन्द्रालोके रसवदाद्यलङ्कारात् प्राक् पठितस्य तुलनादृष्ट्या, अनुमानालङ्कारस्य च न्यूनीकरणं भवति। आहत्य च षड्विंशत्यलङ्काराणां रसाद्यलङ्कारात् प्राग्वर्त्यलङ्काराणां चन्द्रालोक-कुवलयानन्दयोः तुलनादृष्ट्या न्यूनीकरणं भवति। पट्टिकायां

प्रधानातिशयोक्त्यर्थं चन्द्रालोके अक्रमातिशयोक्तिः सङ्ख्या निर्देशं विना पुष्पचिह्नेन निर्दिष्टा। एवमेव पट्टिकायां प्रधानश्लेषनिर्देशार्थं खण्डश्लेषस्य सङ्ख्या ग्रन्थतुलनादृष्ट्या न निर्दिष्टा। पुष्पचिह्नञ्च कृतम्।

तदेवं पूर्वोक्तचन्द्रालोकपट्टिकायाः वक्ष्यमाण(पृ. १५, २०) कुवलयानन्दस्थ-कारिकात्मकशतालङ्कारमितपट्टिकायाश्च तुलनादृष्ट्या परिशीलने द्वयोरपि चन्द्रालोकयोः प्रायः शतालङ्कारमितयोः महति वैषम्ये जाग्रति **प्रायस्त एव तेषाम्** इति दीक्षितोक्तिः कथं सङ्गच्छते?

चन्द्रालोको विजयतां शरदागमसम्भवः।
हृद्यः कुवलयानन्दो यत्प्रसादादभूदयम्।।

इति ग्रन्थोपसंहारे कुवलयानन्देन समं चन्द्रालोकस्य सङ्कीर्तनात्, स्वग्रन्थस्य चन्द्रालोक-व्याख्यात्वाभिप्रायकं दीक्षितवचनञ्च कथं सङ्गच्छते? इति।

३. अन्यच्च पूर्वोक्तचन्द्रालोकपट्टिकादृष्ट्या पञ्चममयूखे उपमादिरसवदलङ्कारपर्यन्तानां जयदेवोक्तानामलङ्काराणाम् १०५ प्रभेदवत्त्वेन, कुवलयानन्दस्थरसाद्यलङ्कारपर्यन्तवर्तिभिः अलङ्कारैस्सह तुलनादृष्ट्या जयदेवेन पृथगलङ्कारत्वेन उक्तानाम् २६ अलङ्काराणां न्यूनीकरणे चन्द्रालोकस्य उपमादिरसवदलङ्कारपरिमितभागे विद्यमानानाम् अलङ्काराणां सङ्ख्या ७९ भवति। उभयथापि चन्द्रालोकसङ्ख्यायाः अन्यथानिश्चितत्वात्, कुवलयानन्द-गतरसाद्यलङ्कारपर्यन्तचन्द्रालोकात्मकालङ्कारसङ्ख्यायाः शतत्वेन निश्चितत्वात् स्फुटमेव सङ्ख्यावैधर्म्यम्।

एवञ्च द्वयोः ग्रन्थयोः सङ्ख्याविमर्शनादपि चन्द्रालोक-कुवलयानन्दस्थितशत-मितालङ्कारात्मकचन्द्रालोकयोः भूयसि भेदे जाग्रति सति, न साक्षात् चन्द्रालोकव्याख्यानात्म-कत्वं युज्यते। न हि व्याख्याकारः मूलं सर्वं परावृत्य, व्युत्क्रमं कृत्वा व्याख्याति इति कथितुं शक्यते। न हि अलङ्कारचन्द्रिकाकारेण कुवलयानन्दः तथा व्याख्यातो दृश्यते। न वा पातञ्जलमहाभाष्यादयः प्रदीपटीकाकारादिभिः मूलक्रमविपरीतक्रमतया व्याख्यायमानाः दृश्यन्ते। तस्मात् **चन्द्रालोकविपरीतक्रमवत्त्वात् न कुवलयानन्दः व्याख्यारूपः**।

४. अन्यच्च क्वचित् अलङ्कारलक्षणभेदः, क्वचिल्लक्ष्यभेदः, क्वचिदुभयभेदः च चन्द्रालोकापेक्षया कुवलयानन्दे दृश्यते। यथा प्रारम्भालङ्कार एवह्न **हंसीव कृष्ण! ते**

कीर्तिः ... इति कुवलयानन्दे उपमोदाहरणम्, चन्द्रालोके तु **हृदये खेलतोरुच्चैस्तन्वङ्गी-स्तनयोरिव**[१] इति लक्ष्यभेदः। लक्षणभेदो यथा- **सम्भावना स्यादुत्प्रेक्षा ...** इति लक्षणं जयदेवेन उक्तमेव। एवम् **विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्** इति अभेदताद्रूप्यात्मक-भेदपरिकल्पनं लक्षणतया चन्द्रालोके न दृश्यते। न वा **अयं हि धूर्जटिः...** इत्युदाहरणञ्च।

५. अपि च कुवलयनन्दस्थचन्द्रालोके **पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम्** इति पदार्थवृत्तिनिदर्शनाम्- **त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः** इत्युदाहृत्य **इयं पदार्थवृत्तिनिदर्शना ललितोपमेति जयदेवेन व्याहृता**[२] इत्युक्तं कुवलयानन्दे। जयदेवेनापि **उपमाने तु लीलादिपदाढ्ये ललितोपमा**[३] इति ललितोपमां लक्षयित्वा- **त्वन्नेत्रयुगलं धत्ते...** इति पद्यमेव उदाहृतम्।

६. एवम् **गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता**[४] इति कुवलयानन्दे प्रतिपादिता गुणोत्कृष्टवर्णनात्मा तुल्ययोगिता, जयदेवेन तु-

सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये।
युवामेव हि विख्यातौ त्वं बलैर्जलधिर्जलैः।।[५]

इति सिद्ध्यलङ्कारत्वेन प्रतिपादिता। यत्र उभयत्रापि लक्षणोदाहरणसाम्येऽपि अलङ्कार-नामभेदः दृश्यते।

७. किञ्च कुवलयानन्दे युक्त्यलङ्कारः शतालङ्कारमध्यपठितः चन्द्रालोके तृतीय-मयूखे लक्षणालङ्कारेषु दृश्यते इत्यपि अन्यत् वैरूप्यम्।

एवं बहुधा वैधर्म्यात् मूलचन्द्रालोक-कुवलयानन्दस्थचन्द्रालोकयोः ऐक्यं वा कुवलयानन्दस्य चन्द्रालोकव्याख्यात्मकत्वसम्भावनं वा न युक्तियुक्तम्। अतः शरदागम-टीकया संस्कृतः चन्द्रालोकः कतिपयपाठभेदेन दीक्षितहस्तगतस्स्यात्, अथवा दीक्षित एव बालजनसुखबोधाय प्राचामाधुनिकानाञ्च मतानि सर्वतः आलोच्य, लक्ष्यलक्षणसङ्ग्रहात्मकं शतालङ्कारमितं कुवलयानन्दान्तर्गतं **चन्द्रालोकं स्वसम्भावितक्रमानुसारेण परिष्कृत्य व्याख्यातवान्** इति सम्भाव्यते।

१. चं.आ.श. पृ. ९३ २. कु.आ. पृ. ५९ ३. चं.आ.श. पृ. ९६
४. कु.आ. पृ. ५१ ५. (अ) कु.आ. पृ. ५९ (आ) चं.आ.श. (मयूखः.३) पृ. ७२

एवं सम्भावनमेव सर्वविधदोषपरिहारात्मकं भवति। सत्स्वपि बहुषु वैधर्म्येषु चन्द्रालोकस्थलक्षणोदाहरणयोः कुवलयानन्दस्थलक्षणोदाहरणयोश्च अधिकाधिकं साम्यात्, **प्रायस्त एव तेषाम्** इति, शतमितचन्द्रालोके इतरालङ्कारशास्त्रग्रन्थापेक्षया अधिकतया चन्द्रालोकादेव लक्षणोदाहरणस्वीकृतेः-

चन्द्रालोको विजयतां शरदागमसम्भवः।
हृद्यः कुवलयानन्दः यत्प्रसादादभूदयम्।।

इति दीक्षितस्य उपसंहारश्लोकश्च सङ्गच्छते, यतः चन्द्रालोकानुग्रहात् कुवलयानन्दस्य प्रसूतत्वमेव दीक्षितेनोक्तम्, न तु व्याख्यात्मकत्वम्। अन्यच्च चन्द्रालोके तृतीयमयूखे निरूपितानां लक्षणसंज्ञकानाम् अलङ्काराणां रसाद्यलङ्कारपूर्ववर्तिशतालङ्कारनिरूपणे दीक्षितेन उपयुक्तत्वात्, तन्निरूपितलक्षणसंज्ञकपञ्चविधालङ्कारानुग्रहोऽपि कुवलयानन्दे अस्तीति चन्द्रालोकाधारितत्वं कुवलयानन्दस्य, अस्तु प्रकृतमनुसरामः।

एवञ्च प्रघट्टकेऽस्मिन् निष्कर्षरूपेण चर्चाफलतया इदं सिद्धं यत्- कुवलयानन्दः जयदेवचन्द्रालोकस्य अर्थात् व्याख्यात्मक एव, न साक्षात् व्याख्यात्मकः अलङ्कार-सङ्ख्याभेदात् जयदेवोक्तक्रमवैपरीत्याच्च। अत एव जयदेवचन्द्रालोकः कुवलयानन्दस्थ-चन्द्रालोकः इति द्वावपि नैव ऐक्यं भजतः इति। तदिदानीं पूर्वोक्तरीत्या कुवलयानन्द-शतालङ्कारपट्टिका तत्रत्य रसवदलङ्कारपर्यन्तभागे नूतनालङ्कारपट्टिका च दीयते-

८.२.४. कुवलयानन्दस्थालङ्काराणां पट्टिका

१. उपमा	२. अनन्वयः	३. उपमेयोपमा	४. प्रतीपम्
५. रूपकम्	६. परिणामः	७. उल्लेखः	८. स्मृतिः
९. भ्रान्तिः	१०. सन्देहः	११. अपह्नुतिः	१२. उत्प्रेक्षा
१३. अतिशयोक्तिः	१४. तुल्ययोगिता	१५. दीपकम्	१६. आवृत्तिदीपकम्
१७. प्रतिवस्तूपमा	१८. दृष्टान्तः	१९. निदर्शना	२०. व्यतिरेकः
२१. सहोक्तिः	२२. विनोक्तिः	२३. समासोक्तिः	२४. परिकरः
२५. परिकराङ्कुरः	२६. श्लेषः	२७. अप्रस्तुतप्रशंसा	२८.अप्रस्तुताङ्कुरः
२९. पर्यायोक्तिः	३०. व्याजस्तुतिः	३१. व्याजनिन्दा	३२. आक्षेपः
३३. विरोधाभासः	३४. विभावना	३५. विशेषोक्तिः	३६. असम्भवः

३७. असङ्गतिः	३८. विषमम्	३९. समम्	४०. विचित्रम्
४१. अधिकम्	४२. अल्पम्	४३. अन्योऽन्यम्	४४. विशेषः
४५. व्याघातः	४६. कारणमाला	४७. एकावली	४८. मालादीपकम्
४९. सारः	५०. यथासङ्ख्या	५१. पर्यायः	५२. परिवृत्तिः
५३. परिसङ्ख्या	५४. विकल्पः	५५. समुच्चयः	५६. कारकदीपकम्
५७. समाधिः	५८. प्रत्यनीकम्	५९. अर्थापत्तिः	६०. काव्यलिङ्गम्
६१. अर्थान्तरन्यासः	६२. विकस्वरः	६३. प्रौढोक्तिः	६४. सम्भावना
६५. मिथ्याध्यवसितिः	६६. ललितम्	६७. प्रहर्षणम्	६८. विषादनम्
६९. उल्लासः	७०. अवज्ञा	७१. अनुज्ञा	७२. लेशः
७३. मुद्रा	७४. रत्नावली	७५. तद्गुणः	७६. पूर्वरूपम्
७७. अतद्गुणः	७८. अनुगुणः	७९. मीलितम्	८०. सामान्यम्
८१. उन्मीलितम्	८२. विशेषकम्	८३. उत्तरम्	८४. सूक्ष्मम्
८५. पिहितम्	८६. व्याजोक्तिः	८७. गूढोक्तिः	८८. विवृतोक्तिः
८९. युक्तिः	९०. लोकोक्तिः	९१. छेकोक्तिः	९२. वक्रोक्तिः
९३. स्वभावोक्तिः	९४. भाविकम्	९५. उदात्तम्	९६. अत्युक्तिः
९७. निरुक्तिः	९८. प्रतिषेधः	९९. विधिः	१००. हेतुः

इति शतमलङ्कारा: प्राचां नवीनानाञ्च अनुरोधात् दीक्षितेन रसवदाद्यलङ्कारनिरूपणात् प्राक् निरूपिताः। ततः रसवदाद्यलङ्काराः ७, प्रमाणमूलकालङ्काराः १०, संसृष्टिः १, सङ्करालङ्काराः ५, चेत्याहत्य २३, एवं त्रयोविंशत्यधिकशतालङ्काराः (१२३) निरूपिताश्च। तद्यथाह्व

❊ रसवदाद्यलङ्काराः ७

१. रसवत्	२. प्रेयः	३. ऊर्जस्वित्	४. समाहितम्
५. भावोदयः	६. भावसन्धिः	७. भावशबलता	

❊ प्रमाणमूलकालङ्काराः १०

१. प्रत्यक्षम्	२. अनुमानम्	३. उपमानम्	४. शब्दः
५. स्मृतिः	६. श्रुतिः	७. अर्थापत्तिः	८. अनुपलब्धिः
९. सम्भवः	१०. ऐतिह्यम्		

❊ **मिश्रालङ्कारौ** (१+५) ६

I. **संसृष्टिः** II. **सङ्करः**ह्न १. अङ्गाङ्गिभावसङ्करः २. समप्राधान्यसङ्करः
३. सन्देहसङ्करः ४. एकवचनानुप्रवेशसङ्करः ५. सङ्करसङ्करः

इत्याहत्य (७+१०+६=२३) त्रयोविंशतिः शताधिकालङ्काराः दीक्षितेन निरूपिताः।

८.२.५. दीक्षितोक्तनूतनालङ्कारपट्टिका

१. प्रस्तुताङ्कुरः	२. व्याजनिन्दा	३. अल्पम्	४. कारकदीपकम्
५. मिथ्याध्यवसितिः	६. ललितम्	७. अनुज्ञा	८. लेशः
९. मुद्रा	१०. रत्नावली	११. विशेषकम्	१२. सूक्ष्मम्
१३. गूढोक्तिः	१४. विवृतोक्तिः	१५. युक्तिः	१६. लोकोक्तिः
१७. छेकोक्तिः	१८. निरुक्तिः	१९. प्रतिषेधः	२०. विधिः २१. हेतुः

एषु अलङ्कारेषु **मिथ्याध्यवसितिः, युक्तिः, निरुक्तिः, प्रतिषेधः, हेतुः** इति पञ्चालङ्काराः जयदेवेन लक्षणालङ्कारेषु निरूपिताः। तेषां शतालङ्कारमध्ये अप्पय्य-दीक्षितेन संयोजनं कृतम्। **हेत्वलङ्कार**विषये तु अंशतः एव जयदेवेन संवादः। यतः लक्षणालङ्कारेषु जयदेवोक्तमुदाहरणं **हेतु**नाम्ना दीक्षितेन निरूपितस्य अलङ्कारस्य उदाहरणतया परामृष्टम्। **हेत्वलङ्कार**विषये दण्डिनः संवादोऽप्यस्ति। **सूक्ष्मलेशालङ्कारौ** तु परम्परायां तथा अदृष्टौ दण्डिनः गृहीतौ। **मुद्रालङ्कारस्**तु भोजराजात् गृहीतः इति अष्टानामलङ्काराणां प्राचीनैरेवोक्तत्वात्, परिशिष्ट (१३) त्रयोदश दीक्षितस्य नूतनालङ्कारतया कुवलयानन्दे अथवा तदीयचन्द्रालोके नूतनतया अवशिष्यन्ते।

एवं चन्द्रालोक-कुवलयानन्दयोः कुवलयानन्दस्थचन्द्रालोकस्य च तत्कर्त्रोश्च परिचये जाते प्रकृतनिबन्धप्रणाल्यङ्गतया अलङ्कारविकासवर्गीकरणादिकं प्रस्तूयते।

९. अलङ्काराणां विकासः तद्धेतवश्च

एवं कुवलयानन्दस्थचन्द्रालोकगतालङ्काराणां सङ्ख्यादर्शने अलङ्काराः कथं वा दिनदिनप्रवर्धमानाः इति ज्ञायते। तथापि स्पष्टप्रतिपत्त्यर्थं किञ्चिदुच्यते। अलङ्काराणां सङ्ख्या न इयत्तापरिच्छेद्या इति दण्डिना एव उक्तम्- **ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्र्येन वक्ष्यति**[१] इति। अत एव **भरतेन** उपमा-दीपक-रूपक-यमकाख्याः चत्वारः

१. का.आ. पृ. ७४

अलङ्काराः, (३६) षट्त्रिंशल्लक्षणसंज्ञकाः अलङ्काराश्च उक्ताः। **दण्डिना**–३६, **भामहेन**–३८, **उद्भटेन**–४१, **वामनेन**–३१, **रुद्रटेन**–६२, **भोजराजेन**–७२, **मम्मटेन**–६८, **रुय्यकेन**–८२[1], **पीयूषवर्षजयदेवेन** (प्रभेदैस्सह)–१३०, **अप्पय्यदीक्षितेन**–१२३ अलङ्काराः निरूपिताः। एतेषां सङ्ख्यायाः तत्र तत्र ह्रासविकासयोः कारणे तेषां सङ्क्षिप्तविस्तृतदृष्टिरेव। आश्चर्यकरतया अलङ्काराणां विकासे हेतवः प्रधानतया षट् सन्तीति अभिज्ञाः कथयन्ति।

१. स्वसम्भावितालङ्कारस्वरूपम्
२. अलङ्कारवर्गीकरणोपायानुसन्धानम्
३. फलवैचित्र्यम्
४. उपायान्तरमिश्रितं ज्ञानवैचित्र्यम्
५. कविव्यापारसम्बन्धेन शास्त्रान्तरपदार्थपर्यालोचनम्
६. व्यतिरेकप्रेरणा – इति।

एषु उपायेषु वर्गीकरणोपायानुसन्धानादेव रुद्रटेन नूत्नतया ३५ अलङ्काराः आविर्भाविताः। अलङ्काराणामध्ययने वर्गीकरणप्रकाराणाम् अध्ययनस्य भूयानुपयोगः अस्ति। अतः अलङ्कारवर्गीकरणम् अधिकृत्य किञ्चिदुच्यते।

१०. अलङ्काराणां वर्गीकरणम्

नवीनेष्वालङ्कारिकेषु **विद्यानाथेन** प्रतीयमानमर्थं पुरस्कृत्य इत्थमलङ्काराः चतुर्धा वर्गीकृताः।

१. प्रतीयमानवस्तवः, २. प्रतीयमानौपम्याः,
३. प्रतीयमानरसभावादयः, ४. अस्फुटप्रतीयमानाः – इति[2]।

आधुनिकविमर्शकेन **डा.भोळाशङ्करव्यास**महाशयेन कुवलयानन्दाध्ययनप्रारम्भे हिन्दीभूमिकायां प्रधानतया सप्तधा अलङ्काराः वर्गीकृताः तत्प्रकारश्चेत्थम्द्ब

I. सादृश्यगर्भाः, II. विरोधगर्भाः, III. शृङ्खलागर्भाः ,
IV. तर्कन्यायमूलकाः, V. वाक्यन्यायमूलकाः, VI. लोकन्यायमूलकाः,
VII. गूढार्थप्रतीतिमूलकाः[3] इति।

१. अ.स. भूमिका (डा. रेवाप्रसादद्विवेदी) २. प्र.रु. (विद्यानाथः) पृ. २४४
३. कु.आ. हिन्दीभूमिका (डा.भोळाशङ्करव्यास) पृ. ६७, ६८

I. तत्र **सादृश्यगर्भाः** इत्थं चतुर्विधाः। तेषु च अमी अलङ्काराः क्रमेण अन्तर्भवन्ति।

क. **भेदाभेदप्रधानाः**– उपमा, उपमेयोपमा, अनन्वयः, स्मरणम् ४

ख. **आरोपमूलकाभेदप्रधानाः**–

रूपकम्, परिणामः, सन्देहः, भ्रान्तिमान्, उल्लेखः, अपह्नुतिः ६

ग. **अध्यवसायमूलकाभेदप्रधानाः**– उत्प्रेक्षा, अतिशयोक्तिः २

घ. **गम्यौपम्याश्रयाः**– तुल्ययोगिता, दीपकम्(पदार्थगतम्), प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना (वाक्यार्थगतम्), व्यतिरेकः, सहोक्तिः(भेदप्रधानः), विनोक्तिः, समासोक्तिः, परिकरः (विशेषणविच्छित्त्याश्रयः), परिकराङ्कुरः (विशेष्यविच्छित्त्याश्रयः), श्लेषः (विशेषणविशेष्य-विच्छित्त्याश्रयः), अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, पर्यायोक्तिः, व्याजस्तुतिः, आक्षेपः १७

II. **विरोधगर्भाः**– विरोधः, विरोधाभासः, विभावना, विशेषोक्तिः, अतिशयोक्तिः, असङ्गतिः, विषमः, समः, विचित्रम्, अधिकम्, अन्योऽन्यम्, विशेषः, व्याघातः १२

III. **शृङ्खलाबन्धमूलकाः**– कारणमाला, एकावली, मालादीपकम्, सारः ४

IV. **तर्कन्यायमूलकौ**– काव्यलिङ्गम्, अनुमानम् २

V. **वाक्यन्यायमूलकाः**– यथासङ्ख्यम्, पर्यायः, परिवृत्तिः, परिसङ्ख्या, अर्थापत्तिः, विकल्पः, समुच्चयः, समाधिः ८

VI. **लोकन्यायमूलकाः**– प्रत्यनीकम्, प्रतीपम्, मीलितम्, सामान्यम्, तद्गुणः, अतद्गुणः, उत्तरः ७

VII. **गूढार्थप्रतीतिमूलकाः**– सूक्ष्मम्, व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः, भाविकम्, संसृष्टिः, सङ्करः ७

एवं वर्गीकृतेषु एकोनसप्तत्यलङ्कारेषु तर्कन्यायमूलकालङ्कारमध्ये पठितस्य **अनुमानस्य**, गूढार्थप्रतीतिमूलकालङ्कारेषु पठितयोः **संसृष्टिसङ्करयोश्च** शताधिका-लङ्कारत्वेन, तेषां त्रयाणां न्यूनीकरणे, अध्यवसायवर्गे विरोधवर्गे च अतिशयोक्तेः पठितत्वेन विरोधवर्गे पठितायाः अतिशयोक्तेः शतालङ्कारदृष्ट्या न्यूनीकरणे च आहत्य चतुर्णाम-लङ्काराणां न्यूनीकरणेन, शतालङ्कारेषु (४+६+२+१७+१२+४+२+८+७+७=६९)

६९–४=६५ पञ्चषष्ट्यलङ्काराणां वर्गीकरणं **भोळाशङ्करव्यास**महाशयदृष्ट्या कृतं भवति। अन्ये च तेन अवर्गीकृताः शतान्तर्वर्तिनः ३५ पञ्चत्रिंशदलङ्काराः इत्थं दृश्यन्ते–

१. आवृत्तिदीपकम्	२. प्रस्तुताङ्कुरः	३. व्याजनिन्दा	४. असम्भवम्
५. अल्पम्	६. कारकदीपकम्	७. विकस्वरः	८. प्रौढोक्तिः
९. सम्भावना	१०. मिथ्याध्यवसितिः	११. ललितम्	१२. प्रहर्षणम्
१३. विषादनम्	१४. उल्लासः	१५. अवज्ञा	१६. अनुज्ञा
१७. लेशः	१८. मुद्रा	१९. रत्नावली	२०. पूर्वरूपम्
२१. अनुगुणः	२२. उन्मीलितम्	२३. विशेषकम्	२४. पिहितम्
२५. गूढोक्तिः	२६. विवृतोक्तिः	२७. युक्तिः	२८. लोकोक्तिः
२९. छेकोक्तिः	३०. उदात्तम्	३१. अत्युक्तिः	३२. निरुक्तिः
३३. प्रतिषेधः	३४. विधिः	३५. हेतुः	

इत्थं शतालङ्कारेषु व्यासमहाशयरीत्या शतमलङ्काराः पर्यवस्यन्ति। वस्तुतः एषु वर्गेषु शोधकेन अनेन प्रतीपं सादृश्यगर्भेषु भेदाभेदप्रधानेषु अन्तर्भावितम्। सादृश्यगर्भे एव गम्यौपम्याश्रये **घ**वर्गे आवृत्तिदीपकम्, प्रस्तुताङ्कुरः, व्याजनिन्दा, विकस्करः, ललितम् इति पञ्चालङ्काराः नूतनतया योज्यन्ते। विरोधवर्गे च अल्पालङ्कारः योज्यते। वाक्यन्यायमूलकेषु कारकदीपकम्, लोकन्यायमूलकेषु लोकोक्तिः, गूढार्थप्रतीतिमूलकेषु उत्तरम्, पिहितम्, गूढोक्तिः, विवृतोक्तिः, युक्तिः, छेकोक्तिः इति षडलङ्काराः योज्यन्ते। एषु उत्तरम्, प्रतीपम् इति द्वयं व्यासमहाशयोक्तलोकन्यायमूलकेभ्यः आनीतम्। अतिशयोक्तेः विरोधमूलिकायाः अपि अध्यवसायमूलकालङ्कारनिरूपणे एव निरूपणमाद्रियते।

एवञ्च कुवलयानन्दक्रमेण प्रतीप–उत्तरालङ्कारौ विहाय अन्ये आवृत्तिदीपकादयः छेकोक्त्यन्ताः त्रयोदशालङ्काराः नूत्नतया निबन्धकारेण तत्तद्वर्गेषु योजिताः। एते च तत्तद्वर्गीयालङ्कारनिरूपणावसरे संयोज्य निरूपयिष्यन्ते। अपि च एतेषां त्रयोदशालङ्काराणाम् अवर्गीकृतपञ्चत्रिंशत् ३५ अलङ्कारेभ्यः न्यूनीकरणे २२ द्वाविंशतिः इमे साधारणवर्गीयाः अवर्गीकृताः अलङ्काराः शतालङ्कारेषु पर्यवस्यन्ति।

११. अवर्गीकृताः अलङ्काराः

१. प्रौढोक्तिः	२. सम्भावना	३. मिथ्याध्यवसितिः	४. प्रहर्षणम्
५. विषादनम्	६. उल्लासः	७. अवज्ञा	८. अनुज्ञा
९. लेशः	१०. मुद्रा	११. रत्नावली	१२. पूर्वरूपम्
१३. अनुगुणम्	१४. उन्मीलितम्	१५. विशेषकम्	१६. भाविकम्
१७. उदात्तम्	१८. अत्युक्तिः	१९. निरुक्तिः	२०. प्रतिषेधः
२१. विधिः	२२. हेतुः		

इह अलङ्कारेषु व्यङ्ग्यसम्बन्धानुशीलनाय आवश्यकः ध्वनिगुणीभूतव्यङ्ग्यविवेकः, अष्टविधगुणीभूतव्यङ्ग्यविवेकः सङ्क्षेपतः तद्भेदनिरूपणं च क्रियते।

१२. ध्वनिगुणीभूतव्यङ्ग्यविवेकः

१२.१. ध्वनिलक्षणम्

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।[१]

इति प्रसिद्धं ध्वनिलक्षणम्। यत्र वाच्यविशेषः अर्थः, वाचकविशेषः शब्दो वा लोकोत्तर-चमत्कारकारिणम् अर्थं **व्यञ्जनया** प्रतिपादयतः स काव्यविशेषः **ध्वनिः**। अविवक्षित-वाच्यध्वनिस्थले वाच्यार्थस्य अविवक्षितत्वात् तस्य प्राधान्येन व्यञ्जकत्वायोगात् तत्सहकृतः शब्दः व्यञ्जकः। अभिधामूलकध्वनिस्थले तु वाच्यस्य विवक्षितत्वात् तस्य प्राधान्येन व्यञ्जकत्वं सम्भवतीति शब्देन अर्थव्यञ्जने सहकारिता। **उपोढरागेण** इत्यादिसमासोक्तौ नायिकानायकव्यवहारस्य निशाशशिवृत्तान्ते समारोपानन्तरं तादृशवृत्तान्ताभिन्नस्य वाच्यस्यैव चमत्कारित्वात् वाच्यस्य उपसर्जनीभावाभावेऽपि ध्वनित्वप्रसक्त्या ध्वनित्वकारणाय अर्थे उपसर्जनीकृतस्वत्वं विशेषणम्।

एवञ्च दीपकापह्नुत्यादौ वाच्यसाधर्म्यनिषेधादिना साम्यव्यक्तावपि व्यङ्ग्यसाम्योप-स्कृतस्य वाच्यस्यैव चमत्कारित्वात् गुणीभूतव्यङ्ग्यत्वमेव न ध्वनित्वम्। अतश्च व्यङ्ग्यपरावेव शब्दार्थौ यत्र व्यङ्ग्यं बोधयतः तत्र ध्वनिः। तथा चोक्तम् ध्वनिकारेणह्-

१. ध्व.आ. पृ. ३८

तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।
ध्वनेस्स एव विषयः मन्तव्यो सङ्करोज्झितः।।[1] इति।

१२.२. ध्वनित्वप्रयोजकानि

१. व्यङ्ग्यस्य वाच्यापेक्षया प्राधान्ये एव ध्वनिः। २. शब्दार्थयोः व्यङ्ग्यं प्रति तात्पर्ये एव ध्वनिः। ३. व्यङ्ग्यस्य चारुत्वोत्कर्षनिबन्धनप्राधान्ये एव ध्वनिः -इति त्रीण्यपि समुच्चित्य ध्वनित्वप्रयोजकानि।

१२.३. गुणीभूतव्यङ्ग्यं तत्प्रयोजकानि च

यत्र व्यङ्ग्यं वाच्यं प्रति गुणीभूतं भवति, तद्गुणीभूतव्यङ्ग्यम्। यत्र तु वाच्यवस्तुनः वाच्यालङ्कारस्य वा व्यङ्ग्य-वस्तु-अलङ्कार-रसादिपरत्वं तत्र ध्वनिः[2]।

१. किन्तु अलङ्कारान्तरस्य प्रतीतावपि वाच्यस्य तत्परत्वं यत्र नास्ति नासौ ध्वनेर्मार्गः, अपि तु गुणीभूतव्यङ्ग्य एव[3]। अत एव दीपकादौ उपमायाः व्यङ्ग्यत्वेऽपि वाच्यसाधर्म्य नान्तरीयकतया व्यङ्ग्यौपम्यस्फूर्तेः वाच्यदीपकादेः व्यक्तस्य सादृश्यस्य व्यङ्ग्यत्वमेव, न ध्वनित्वम्।

२. शब्दशक्त्या अर्थशक्त्या उभयशक्त्या आक्षिप्तः व्यङ्ग्यः अर्थः यत्र कविना-ऽऽविष्कृतः, तत्र ध्वनेरन्यः गुणीभूतप्रकार एव। अथवा अलङ्कार प्रकारः। तथा चोक्तम् ध्वनिकारेण-

शब्दार्थशक्त्या वाक्षिप्तः व्यङ्ग्योऽर्थः कविना पुनः।
यत्राविष्क्रियते स्वोक्त्या साऽन्यैवालङ्कृतिर्ध्वनेः।।[4]

---

१. ध्व.आ. पृ. ५४

२. अ. **व्यज्यन्ते वस्तु मात्रेण यदालङ्कृतयस्तदा ।**
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ।।

आ. **अलङ्कारान्तरव्यङ्ग्यभावे ध्वन्यङ्गता (पुनः) भवेत् ।**
चारुत्वोत्कर्षतो व्यङ्ग्यप्राधान्यं यदि लक्ष्यते ।। ध्व.आ. पृ. १४४

इ. **वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम् ।**
रसादिपरता यत्र स ध्वनेर्विषयो मतः ।। ध्व.आ. पृ. ८२

३. ध्व.आ. पृ. १३२ ४. ध्व.आ. पृ. १२६

ननु स्वोक्त्याऽऽविष्कारे सति ध्वनिर्न भवति, गुणीभूतव्यङ्ग्य एव भवति इति कथने को वा अभिप्रायः ? अन्यच्च ध्वनिकारेण शब्दशक्तिमूलध्वनिस्थले आक्षिप्त एवालङ्कारः इत्यादिना वाच्यार्थान्तरयोः एकस्मादेव शब्दात् प्रतिपत्तौ, वाक्यस्य परस्परासम्बद्धार्थद्वयाभि-धायकत्वेन वाक्यभेदः असम्बद्धार्थाभिधायकत्वं वा मा भवतु इति धिया उपमालङ्कारध्वनिः इत्युक्तम्। वस्तुतः तथा समयकरणेऽपि को हेतुः इति चेत् उच्यते-

दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्टं मया
तेनैव स्खलितास्मि नाथ! पतितां किं नालम्बसे।
एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिः
गोप्यैवं गदितः सलेशमवतात् गोष्ठे हरिर्वश्चिरम्।।[१]

अत्र च प्रश्नविषयस्य दृष्ट्युपघातप्रयुक्तमार्गस्खलितदुर्बलवनिताकर्मकरक्षण-वृत्तान्तस्य रागभरितमनस्कमार्गस्खलितगोपीकर्मककृष्णकर्तृकरक्षणवृत्तान्तस्य च शब्दशक्त्या आवेद्यमानस्य शब्दशक्तिमूलध्वनिस्थल इव, अत्रापि सम्बन्धप्रकल्पनाय उपमा किमिति न व्यज्यते? इति प्रश्ने **गोप्यैवं गदितः सलेशमवतात्** इत्यत्र सलेशमिति स्वोक्त्या आविष्कारादिति समाधानम्।

गूढार्थस्त्वयम्- यत्र वाक्यीया समस्या शक्ति-लक्षणाभ्यां वाक्येन समाधातुं शक्यते तत्र नास्ति औपम्यादौ व्यञ्जनाकल्पनम्। यथा अत्रैव सलेशत्वस्य कीदृशोऽयं लेशविशेषः अभिप्रायविशेषः इत्याकाङ्क्षायां व्यङ्ग्यगोपिकाकर्मकालम्बनवृत्तान्तस्य वाच्ये सलेशत्वे अन्वयात्, वाच्यव्यङ्ग्ययोः असम्बद्धत्वशङ्कैव नोदेति इति वाच्यार्थान्तरवृत्तान्तयोः औपम्ये ध्वनित्वशङ्कायाः अवकाशः नास्ति। एवञ्च स्वोक्त्याऽऽविष्कारस्थले व्यङ्ग्यस्य वाच्यान्वयित्वेन गुणीभूतव्यङ्ग्यत्वमेव न ध्वनित्वम्।

एवं गुणीभूतव्यङ्ग्यत्वप्रयोजकयोः द्वयोः ज्ञातयोः इदानीम् अष्टविधगुणीभूतव्यङ्ग्य-क्रमनिरूपणेन कानिचित् गुणीभूतव्यङ्ग्यत्वप्रयोजकान्युच्यन्ते। तत्र मम्मटाचार्येण अष्टविधं गुणीभूतव्यङ्ग्यं परिगणितम्।

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम्।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम्।।[२]

१. ध्व.आ. पृ. ११९ २. का.प्र. (वासुदेवशास्त्री अभ्यङ्कर) पृ. १८७

१. अगूढम्, ४. अस्फुटम्ह्न

कामिनीकुचकलशवत् नातिगूढस्य नातिस्फुटस्य व्यङ्ग्यस्य चमत्कारित्वात् **अस्फुटे अगूढे वा नास्ति चमत्कार** इति तयोः गुणीभूतव्यङ्ग्यत्वम्। स्वोक्त्याऽऽविष्कारे गुणीभूत-व्यङ्ग्यत्वं प्रतिपादयता ध्वनिकारेण अगूढगुणीभूतव्यङ्ग्यम् एकधा प्रतिपादितमेव। यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन भासते इति कथयता ध्वनिकारेण अस्फुटगुणीभूतव्यङ्ग्यं प्रतिपादितमेव।

२. अपरस्याङ्गम्ह्न

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।।[1]

इति कथयता ध्वनिकारेण व्यङ्ग्य-वाच्य-वस्तु उपस्कारकरसभावादीनाम् अपराङ्गगुणीभूत-व्यङ्ग्यत्वमाविष्कृतमेव।

३.वाच्यसिद्ध्यङ्गत्वम्ह्न

वाच्यार्थस्य उपपादनाय उपस्करणाय वा यदङ्गं तत् वाच्यसिद्ध्यङ्गम्। असुन्दरगुणी-भूतव्यङ्ग्यस्य पृथक् सङ्कीर्तनेन वाच्यसिद्ध्यङ्गे व्यङ्ग्यस्यापि सौन्दर्यमपेक्ष्यत इति केचित्।

५. सन्दिग्धम् – ६. तुल्यप्राधान्यम् –

तत्परावेव शब्दार्थौ इति कारिकाव्याख्यानसन्दर्भात् प्राक् लोचनकारेण **समप्राधान्ये अस्फुटप्राधान्ये च**[2] इति कथनात् तुल्यप्राधान्य-सन्दिग्धप्राधान्यलक्षणगुणीभूतव्यङ्ग्यप्रकारौ स्पृष्टावेव।

७. काक्वाक्षिप्तम्ह्न

अर्थान्तरगतिः काक्वा या चैषा परिदृश्यते।[3]

इति कथयता ध्वनिकारेण काक्वाक्षिप्तलक्षणं गुणीभूतव्यङ्ग्यमुक्तम्।

---

१. ध्व.आ. पृ. ८६
२. ध्व.आ.लो. पृ. ५३
३. ध्व.आ. पृ. २६५

८. असुन्दरम्

वाणीरकुञ्जोड्डीन...[1] इत्यादिपद्यम् उदाहरता ध्वनिकारेण असुन्दरगुणीभूतव्यङ्ग्य-प्रभेदोऽपि स्पृष्ट एव। एतेषाञ्च गुणीभूतव्यङ्ग्यप्रभेदानां समनन्तरप्रवर्तिष्यमाणालङ्कार-सम्बन्धिव्यङ्ग्याध्ययने महानस्ति उपयोगः। इह शोधप्रबन्धनिर्माणे अनुसन्धातुः उद्देश्यं प्रकटयति।

१३. प्रकृतानुसन्धानोद्देश्यम्

आन्ध्रदेशे अन्येषु च बहुषु प्रान्तेषु अलङ्काराणां प्राथमिकाध्ययनाय चन्द्रालोके स्कीक्रियमाणे अप्पय्यदीक्षितपरिष्कृतः कुवलयानन्दस्थचन्द्रालोक एव आद्रियते। अत एव **आशाधरभट्टेन** कुवलयानन्दकारिकाभागस्य चन्द्रालोकस्यैव **अलङ्कारदीपिका**नाम्ना व्याख्यानं प्रावर्ति। एतच्च कुवलयानन्दगतचन्द्रालोकभागस्य महत्त्वं प्रख्यापयति।

* अतः 'अलङ्कारछात्राणां हस्तपुस्तकायमानः अयं **चन्द्रालोकग्रन्थः**' परिशीलयितुम् इष्यते।

प्रकृतानुसन्धाने अत्यन्तप्रधानतया उपयोक्ष्यमाणग्रन्थाः

- अलङ्कारविषये सामान्यविषयजिज्ञासूनां **डा.भोळाशङ्करव्यासमहाशयस्य** 'विस्तृतहिन्दीपीठिका',
- तत्तदालङ्कारिकैः कृतस्य नूतनालङ्काराविष्कारस्य रुय्यकपर्यन्तस्य परिज्ञानाय **डा. रेवा प्रसादद्विवेदीमहाशयस्य** 'अलङ्कारसर्वस्वहिन्दीभूमिका',
- नाट्यशास्त्रीयलक्षणालङ्कारविषयपरिज्ञानाय **डा.राघवन् महाशयस्य "Some concepts of Alankara Sastra"** ग्रन्थः,
- अलङ्काराणां विकासाध्ययनाय **डा.के.के.षैन्महाशयस्य 'अलङ्काराणां क्रमिको विकासः'** इति शोधप्रबन्धः,
- **कुवलयानन्दस्य** विमर्शनात्मकाध्ययनाय **'अप्पय्यदीक्षितसाहित्यशास्त्रीय-कृतीनां विमर्शात्मकमध्ययनम्'** इति डा.लक्ष्मीनारायणभट्टस्य शोधप्रबन्धश्च अत्यन्तम् उपकुर्वन्ति।

---

१. का.प्र. (वासुदेवशास्त्री अभ्यङ्कर) पृ. १८७

१४. प्रकृतानुसन्धानप्रधानबिन्दवः

अथ प्रधानतया अलङ्कारेषु व्यङ्ग्यसम्बन्धांशं केन्द्रबिन्दूकृत्य एतावत्पर्यन्तं लघुशोधनिबन्धः कुवलयानन्दस्थचन्द्रालोकाधारेण न दृष्टः। अतः नूतनतया अयं प्रयत्नः विधीयते।

- अन्यच्च **'वाच्यव्यङ्ग्ययोश्च प्राधान्याप्राधान्यविवेके परः प्रयत्नो विधातव्यः येन ध्वनिगुणीभूतव्यङ्ग्ययोः अलङ्काराणाञ्चासङ्कीर्णो विषयः सुज्ञातो भवति।'**[१] इति कथयता आनन्दवर्धनाचार्येण ध्वनिगुणीभूतालङ्कारविषये पार्थक्यविज्ञानाय **श्रमः कर्तव्यः** इत्युपदिष्टम्। अतस्तदादेशेन इयं गवेषणा।

- अपि च **'तस्मादत्र सविशेषणे हि इति न्यायोपन्यासे वाक्यमीमांसकानां शोभते नालङ्कारमीमांसकानाम्'**[२] इति कथयता अप्पय्यदीक्षितेन अलङ्कार-शास्त्रं प्रसिद्धमीमांसाशास्त्रवैलक्षण्येऽपि मीमांसाशास्त्रत्वेन सम्भावितम्।

  एवं सति अलङ्कारशास्त्रस्य वाक्यशास्त्रत्वात्, वाक्ये वाच्यस्य व्यङ्ग्यस्य अलङ्कारस्य च गतिः कथं प्रवर्तते इति अवश्यं विज्ञेयम्।

- अन्यच्च अनन्वय-उपमेयोपमादौ द्वितीयसदृशवस्तुव्यवच्छेदस्य तृतीयसदृशवस्तु-व्यवच्छेदस्य वा **किं ध्वनित्वम्** उत **गुणीभूतव्यङ्ग्यत्वम्** इति विचारे विद्यानाथेन - **उपमेयोपमा-अनन्वय... विशेषोक्तिषु प्रतीयमानं वस्तु काव्योपस्कार-कतामुपयाति**[३] इति काव्योपस्कारकत्वकथनात् वाच्यार्थोपस्कारकत्वलाभेन गुणीभूतव्यङ्ग्यत्वमेवाविष्कृतम्, न ध्वनित्वम्। वस्तुतः तादृशालङ्कारेषु व्यङ्ग्यस्य **अनुपमत्वादेः** प्राधान्येनास्वादपात्रत्वात् ध्वनित्वमेव यौक्तिकम्।

  एवं सति ध्वनित्वे समर्थ्यमाने कथं तत्र अलङ्कारत्वम् ? इति विचारणीयम्।

- एवं प्रतीपे व्यज्यमानस्य उपमानाधिक्यस्य परिणामे व्यज्यमानविकासादिधर्मस्य वाच्येन सह ताटस्थ्यम् अथवा अन्यादृशसम्बन्धः इति विचारणीयम्।

- तथा दीपक-तुल्ययोगितादावपि व्यङ्ग्येन वाच्यान्वये वाच्यव्यङ्ग्ययोः कीदृशः सम्बन्धः ?

---

१. ध्व.आ. पृ. २७० २. चि.मी. पृ. १५० ३. प्र.रु. (डा.वि. राघवन्) पृ. २४४

☛ तथा समासोक्तौ अप्रकृतवृत्तान्तस्य व्यङ्ग्यत्वे तस्य प्रकृतवृत्तान्ते अभेदेन अन्वये वाच्यस्य व्यङ्ग्यरूपेण भानात् प्रसक्तं ध्वनित्वं कथं वार्यतेह्न–इत्यपि अनुसन्धेयम्।

☛ एवं सूक्ष्म–पिहित–व्याजोक्तिप्रभृतिषु कतिपयालङ्कारेषु ध्वनित्वमेव प्रकाशित–मप्पय्यदीक्षितेन तादृशाः अन्येऽप्यलङ्काराः सन्ति वा, सन्ति चेत् क्व ध्वनित्वम् ? क्व गुणीभूतव्यङ्ग्यत्वम् ? इति सयुक्तिकं निर्णेयमस्ति।

☛ एवं प्रकृताप्रकृतश्लेषस्थले गूढश्लेषत्ववादः दीक्षितेन कथं समर्थितः –इत्यादिकं सर्वं विचारणीयमस्ति।

☛ अलङ्कारेषु गुणीभूतव्यङ्ग्यप्रभेदाः कथं सम्भवन्ति इत्यपि लक्ष्येषु परिशीलनीयम्।

☛ अन्यच्च वाच्यस्य अनुपपत्तौ लक्षणा स्वीक्रियते सामान्यतः शास्त्रकारैः, परं वाच्यस्य असम्भवत्वे लक्षणास्वीकारेऽपि न निस्तारः। तादृशस्थले वाच्यस्य व्यङ्ग्येन कीदृशी उपपत्तिः सम्भावनीया?

समेषामन्येषाञ्च प्रश्नानां समाधानतया निबद्ध्यतेऽयं लघुनिबन्धः।

१५. प्रबन्धनामौचित्यम्

प्रणिनिनीषितस्य लघुनिबन्धस्य **कुवलयानन्दाधारेण चन्द्रालोकाश्रितानां व्यङ्ग्यसम्बद्धालङ्काराणामनुशीलनम्** इति गैर्वाण्याम्, अङ्ग्लभाषायाञ्च **"A Survey of the suggestive Alankaras in Chandraloka based on Kuvalayananda"** इति च व्यपदेशो विहितः।

प्राक् प्रवर्तितविचाराधारेण जयदेवचन्द्रालोकापेक्षया कुवलयानन्दस्थ–चन्द्रालोकस्य अत्यन्तं विलक्षणतया तस्य बहूपकारकत्वेन तदाश्रितालङ्कारेष्वेव व्यङ्ग्यसम्बन्धानुशीलनं कर्तुमिष्यते। प्रायशः 'सर्वेष्वलङ्कारेषु व्यङ्ग्यसम्बन्धस्य दर्शनात्' निबन्धनाम्नि **व्यङ्ग्यसम्बद्ध** इति अलङ्कारविशेषणं किमर्थम् ? इति प्रश्नः आपतति, व्यङ्ग्यसम्बन्धस्य बहुत्र सद्भावेऽपि, व्यङ्ग्यविवक्षायां तारतम्यमूह्न–इत्यादिदृष्ट्या अलङ्कारेषु व्यङ्ग्यसम्बद्धत्वविशेषणं सार्थकम्।

व्यङ्ग्यसम्बन्धानुशीलनेऽपि अलङ्कारेषु व्यङ्ग्यार्थस्य किं लक्षणशरीरदृष्ट्या विचारः प्रवर्तते? आहोस्वित् उदाहरणमुखेन ? इत्युक्ते–

सर्वत्र लक्षणशरीरदृष्ट्या व्यङ्ग्यनिर्णयस्य कर्तुमशक्यत्वात् नैकत्र उदाहरणदृष्ट्याऽपि व्यङ्ग्यपरिशीलनं क्रियते। यत्र व्यङ्ग्यस्य ध्वनिस्थानीयत्वम्, तत्र अलङ्कारता इति सामान्यतो विज्ञेयम्। अलङ्कारेषु व्यङ्ग्यतत्त्वावगाहनाय क्वचित् क्वचित् वाक्यतात्पर्यनिर्णयाय च अयं प्रयत्नो विधीयते।

१६. अनुसन्धानस्वरूपम्

अस्मिन्निबन्धे पञ्च अध्यायाः सन्ति।

तत्र आदौ **भूमिकायां** काव्यप्रयोजन-काव्यस्वरूप-गुणालङ्कारभेद-अलङ्कार-सामान्यस्वरूपनिरूपणानन्तरं चन्द्रालोक-जयदेवयोः, चन्द्रालोकव्याख्यानानाम्, अप्पय्यदीक्षित-कुवलयानन्दस्थचन्द्रालोकयोः साम्यवैषम्यचर्चा, कुवलयानन्दशतालङ्कारपट्टिका, तदीय-नूतनालङ्काराविष्कारः, ततः अलङ्कारविकासहेतूनां निरूपणम्, अलङ्काराणां डा.भोला-शङ्करव्यासोक्तरीत्या सप्तधा वर्गीकरणम्, अवर्गीकृतालङ्कारसूची, ध्वनिगुणीभूतव्यङ्ग्य-विवेकः, प्रकृतानुसन्धानोद्देश्यम्, स्वरूपञ्च विव्रियते।

१. **प्रथमाध्याये–** तु भेदाभेदप्रधानाः उपमादयः प्रतीपान्ताः पञ्च अलङ्काराः, रूपकादयः षट् आरोपमूलकाभेदप्रधानाः, अध्यवसायप्रधाने उत्प्रेक्षाऽतिशयोक्ती आहत्य त्रयोदशालङ्काराः निरूप्यन्ते।

२. **द्वितीयाध्याये**– तुल्ययोगितादिषु ललितान्तेषु गम्यौपम्यप्रधानेषु द्वाविंशतिषु अलङ्कारेषु व्यङ्ग्यसम्बन्धविचारः कर्तुमिष्यते।

३. **तृतीयाध्याये**– विरोधाभासमारभ्य व्याघातान्तेषु त्रयोदशविरोधमूलकेष्वलङ्कारेषु विरोधोद्भावनपरिहारप्रकारौ सामान्यतः विरोधस्य संसर्गत्वमस्ति वा, न वा इत्यादयः विषयाः वाक्यार्थवर्णनापुरस्सरं व्याख्यातुमिष्यन्ते। एवमेव तत्रैव शृङ्खलाबन्धमूलकाः चत्वारः अलङ्काराः, तर्कन्यायमूलकौ द्वावलङ्कारौ, वाक्यन्यायमूलकाः नवालङ्काराश्च व्यङ्ग्यालोचनापुरस्सरं निरूप्यन्ते। ततः प्रत्यनीकादयः लोकोक्त्यन्ताः लोकन्यायमूलकाः षट् अलङ्काराः निरूप्यन्ते।

४. **चतुर्थाध्याये**–गूढार्थप्रतीतिमूलकाः द्वादशालङ्काराः, अवर्गीकृताः साधारण-वर्गीयाः द्वाविंशतिः अलङ्काराः निरूप्यन्ते।

५. **पञ्चमाध्याये**– तु रसवदादिषु व्यङ्ग्यस्थितिः, लघुशोधनिबन्धफलितोपसंहारश्च वक्ष्यते।।

प्रथमोऽध्यायः

भेदाभेद–आरोपमूलकाभेद–अध्यवसायमूलकाभेदालङ्काराः

अध्यायेऽस्मिन् सादृश्यगर्भेषुह्नह्नह्न १. भेदाभेदप्रधानाः, २. आरोपमूलकाभेदप्रधानाः, ३. अध्यवसायमूलकाभेदप्रधानाश्च निरूप्यन्ते। तत्रादौह्नह्नह्न

I. क. भेदाभेदप्रधानाः अलङ्काराः

सादृश्यसम्बद्धालङ्कारेषु भेदाभेदप्रधानाः उपमा–अनन्वयः–उपमेयोपमा–स्मरणम् इति पञ्च अलङ्काराः। **प्रतीपे** तु क्वचित्सादृश्यसम्बन्धः तेषु उपमा–अनन्वय–उपमेयोपमासु साक्षात् सादृश्यम् वाच्यमेव। **स्मरणे** तु सादृश्यम् आक्षेप्यम् अथवा व्यङ्ग्यम्। एषु उपमानोपमेययोः भेदः अभेदश्च समानतया स्फुरतः। यतः सादृश्यमत्र भेदघटितम्। समानधर्मं पुरस्कृत्य उपमानोपमेययोः सादृश्यनिर्वाहात्। समानधर्मप्रयुक्तम् ऐक्यमपि एकतः अनपह्नवनीयमेव।

अत एव **'उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा'**[1] इति अलङ्कारसर्वस्वे उपमायां भेदाभेदतुल्यत्वं स्पष्टम् उद्घोषितम्। अयञ्च धर्मः परिशिष्टालङ्कारचतुष्टयेऽपि समानः। अनन्वये तु धर्मिणः वस्तुतः ऐक्येऽपि परिकल्पितभेदमादाय भेदगर्भितसादृश्यं बोध्यम्। तत्रापि साधारणधर्मैक्यप्रयुक्ता अभेदः दुरपह्नव एव। एवम् एषां सादृश्यसम्बद्धानां भेदाभेदप्रधानता। तत्रादौ उपमा निरूप्यते।

१.१. उपमालङ्कारः

१ **उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते।।[2]

यत्र द्वयोः = उपमानोपमेययोः, सादृश्यलक्ष्मीः= चारुसादृश्यम् = सुन्दरं सादृश्यम्, उत् = उद्भूततया, लसति = व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्र उपमालङ्कारः। **'हंसीव कृष्ण ! ते कीर्तिः ...'** इत्युदाहरणे कृष्णकीर्तिवर्णनपरे – हे कृष्ण ! ते कीर्तिः

---

१. अ.स. (रुय्यकः) पृ.८० २. कु.आ. पृ.३

स्वर्गम् = स्वर्गलोकम्, गाम् (च) = भूमिञ्च, अवगाहते = प्रविशति। कथम् ? **हंसीव** इति सुन्दरौपम्यस्य वर्णनात् उपमालङ्कारलक्षणसमन्वयः। अत्र कृष्णकीर्तिः **उपमेयम्।** हंसी **उपमानम्।** इव इति **सादृश्यवाचकः शब्दः**। स्वर्गङ्गावगाहनम् **सङ्गानधर्मः।** तत्र उपमेयकृष्णकीर्तिपक्षे स्वर्गम्, गाञ्च अवगाहते इत्यर्थः। उपमानहंसीपक्षे तु आकाश-गङ्गामवगाहते इत्यर्थः। स्वर् गङ्गावगाहनत्वेन अध्यवसितं स्वर्गभूम्योरवगाहनम् अत्र गौणस्साधारणो धर्मः। एवं चतुर्णामत्र अंशानामुपादानात् पूर्णोपमालङ्कारः। स च कविगतकृष्णभक्तिभावाङ्गं भवति। कविनिष्ठकृष्णभक्तिभावोपस्कारकत्वात् उपमालङ्कारः।

एवम् उपमान-उपमेय-साधारणधर्म-उपमावाचकशब्दानां चतुर्णामुपादाने **पूर्णोपमालङ्कारः**। एतेषां मध्ये एकस्य द्वयोस्त्रयाणां वा लोपे **लुप्ता**। इवादिपदाभिधेयं **सादृश्यं** सुन्दरादिपदप्रतिपाद्य**साधारणधर्मात्** भिन्नम्। अत एव साधारणधर्मवाचक-घटितचतुर्भिः उपादाने पूर्णा इति, धर्मवाचकयोः द्वयोर्लोपे **धर्मवाचकलुप्ता** इति आलङ्कारिकाणां व्यवहारः। एवं दीपकतुल्ययोगितादिषु साधर्म्यं वाच्यमिति, सादृश्यं व्यङ्ग्यमिति आलङ्कारिकाः अभिप्रयन्ति। तस्मात् साधारणधर्मातिरिक्ततया सादृश्यम् आलङ्कारिकमते अवश्यमभ्युपगन्तव्यम्। तत्प्रकृतमनुसरामः। इदानीं लुप्तोपमाभेदाः निरूप्यन्ते।

१.२. लुप्तोपमा

१. वाचकलुप्ता २. धर्मलुप्ता ३. धर्मवाचकलुप्ता ४. वाचकोपमेयलुप्ता ५. उपमानलुप्ता ६. वाचकोपमानलुप्ता ७. धर्मोपमानलुप्ता ८. धर्मोपमानवाचकलुप्ता[1]। तत्र उपमानलोपरहिताः आद्याः चत्वारो भेदाः, तेषामन्येषाञ्च इमानि उदाहरणानि इत्थम्ह्णह्णह्ण

तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया।।
यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः।
तदेतत्काकतालीयमवितर्कितसम्भवम्।।[2] इति।

१. कु.आ. पृ.७ २. कु.आ. पृ.७

१.२.१. वाचकलुप्ताह्लह्लह्ल

'तडिद्गौरी तन्वी' इत्युदाहरणम्। अत्र **'तडिदिव गौरी'** इति विग्रहे **उपमानानि सामान्यवचनैः** (पा.सू.२.१.५५)' इति सूत्रेण उपमानवाचकसुबन्तस्य तटित्+सु इत्यस्य गौरी+सु इति साधारणधर्मवाचकप्रकृतिकसुबन्तेन समासे एकार्थीभावसामर्थ्यं सामान्यवाचकेनैव अस्तीति इवशब्देन नास्तीति इव शब्दस्य समासविधायकशास्त्रकृतः लोपः। तडिद्रूपस्य उपमानस्य गौरत्वधर्मस्य तन्वीरूपोपमेयस्य च उपादानात् इवेति वाचकशब्दस्य अनुपादानाच्च वाचकलुप्ता।

१.२.२. धर्मलुप्ताह्लह्लह्ल

'इन्दुतुल्यास्या' इत्यत्र इन्दोः उपमानस्य, आस्यरूपस्य उपमेयस्य, तुल्यात्मकस्य सादृश्यविशिष्टबोधकतया, अर्थतः सादृश्यवाचकस्य शब्दस्य उपादानात्, सादृश्यनिर्वाहकस्य धर्मस्य अनुपादानात् इयं धर्मलुप्ता। **'कान्त्या'** इति योजयितुं शक्यत्वात् अत्र धर्मलोपः ऐच्छिक एव न शास्त्रकृतः।

१.२.३. धर्मवाचकलुप्ताह्लह्लह्ल

'तन्वी कर्पूरन्ती दृशोर्मम' इत्युदाहरणम्। अत्र कर्पूरमिव आचरन्ती इत्यर्थे 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' (वा. १७२२) इति वार्तिकेन विकल्पतया 'क्विप्' प्रत्ययविधानात्, आचारात्मकसाधारणधर्मवाचकस्य क्विप् प्रत्ययस्य सर्वलोपित्वेन लोपात्, इवेत्यादिवाचकशब्दस्यापि कर्पूरन्ती इति वृत्तौ लोपात्, धर्मवाचकलोपः। अतः इयं धर्मवाचकलुप्ता। नायकस्य दृशोः कर्पूरवत् आनन्दसन्धायिनी इति भावः। कर्पूर–आचाराश्रयतन्व्योः उपमानोपमेययोस्तु अत्र उपादानमस्त्येव।

१.२.४. वाचकोपमेयलुप्ता ह्लह्लह्ल

'कान्त्या स्मरवधूयन्ती' इत्युदाहरणम्। अत्र 'स्मरवधूमिव आत्मानम् आचरन्ती' इति विग्रहे कर्मभूतोपमानवाचकात् स्मरवधूशब्दात् 'उपमानादाचारे' इति क्यच् प्रत्यये **स्मरवधूयन्ती** इति रूपं निष्पन्नम्। स्मरवधूः उपमानम्, आत्मा च उपमेयम्। सा च अत्र 'कान्त्या' इति उपात्तया कान्त्या स्वाश्रयमन्तरानुपपन्नया आक्षिप्यते। एवञ्च अत्र आत्मरूपस्योपमेयस्य, 'इव' इति वाचकशब्दस्य च लोपात् वाचकोपमेयलुप्ता। न चात्र तन्वी उपमेया इति वाच्यम्। 'स्मरवधूयन्ती' इत्यत्र स्मरवधूपदस्य द्वितीयान्तस्य प्रथमान्त–तन्वीपदेन सामानाधिकरण्यायोगात्।

१.२.८. धर्मोपमानवाचकलुप्ता। १.२.७. वाचकोपमानलुप्ता ह्नह्नह्न

'काकतालीयम्' इत्यत्र वृत्तिक्रमानुसारेण लुप्ताभेदयोः व्युत्क्रमेणोदाहरणम्। 'काकतालम्' इत्यत्र 'काक इव ताल इव' इति समासवृत्तिः। काकतालमिव काकतालीयम् – इति तद्धितवृत्तिः। तत्र समासवृत्तेः श्लोकस्थपदान्तरान्वयेन 'यत्तया मेलनम् तत्काकतालम्' इति अष्टम्याः लुप्तायाः उदाहरणात्। तत्र मेलनम् उपमेयम्। इवार्थे 'समासाच्च तद्विषयात्' इति ज्ञापकात् समासात् इवेति वाचकशब्दस्य लोपः।

एवं समासवृत्तौ काकतालशब्दयोः काकागमन-तालपतनलाक्षणिकत्वात् मेलनोपमानयोः लोपः। **अवितर्कितसम्भवम्** इति साधारणधर्मस्यापि लोपः। अतः धर्मोपमानवाचकलुप्ता। तादृशधर्मस्य उदाहरणवाक्ये योजने तु वाचकोपमानलुप्ता इति षष्ठी।

१.२.५. उपमानलुप्ता। १.२.६. धर्मोपमानलुप्ता ह्नह्नह्न

'लाभो मे यश्च तद्रतेः, तदेतत्काकतालीयम् अवितर्कितसम्भवम्' इति सङ्ग्रहकवाक्यम् उपमानलुप्तायाः। **'काकतालमिव काकतालीयम्'** इति छप्रत्ययार्थोपमायां छप्रत्ययस्य उपमावाचकत्वेन न वाचकलोपः। **'काकतालम्'** इति निष्पन्नवृत्तेः छप्रत्ययार्थ-विषयिण्याः लक्षणया काककृततालफलोपभोगार्थतया, तस्य च उपमानभूतस्य अनुपादानात् उपमानलोपः। **'लाभो मे यश्च तद्रतेः'** इति उपमेयस्य अवितर्कितसम्भवम् इति धर्मस्य च नास्ति लोपः। अतः उपमानलुप्ता। अत्रैव वाक्ये धर्मानुपादाने धर्मोपमानलुप्ता।

अत्रेदमनुसन्धेयम् – अष्टविधासु लुप्तोपमासु वाचकधर्मादीनां लोपदर्शनात्, लोपस्य च 'अदर्शनं लोपः' इत्युक्तनयेन वाचकधर्मादीनां लोपे तेषामदर्शनेन आक्षेपणीयतया धर्म-उपमान-उपमेय-वचकशब्दादीनां व्यङ्ग्यत्वमस्तीति यद्यपि वक्तव्यम्। उपमान-उपमेयादीनां सम्बन्धिपदार्थत्वेन अन्यतरस्य अन्यतरेण आकाङ्क्षितत्वेन, सादृश्यसाधारणधर्मयोरपि अन्यतरस्य अन्यतरेण आकाङ्क्षितत्वात्, उपमान-उपमेययोः उपादाने सति धर्मवाचकयोश्च आकाङ्क्षितत्वात् , तयोश्च आक्षेपो भवतीति अन्यतरेण अन्यतमेन वा अन्येषामाक्षेपात्, जात्या व्यक्तिरिव आक्षिप्यत ह्नह्नह्नइति तादृशाक्षेपविषये आकाङ्क्षितपदार्थाभिसम्बन्धविषयके अध्याहारलभ्ये व्यञ्जनायाः अप्रसारात्, अत्र लुप्तोदाहरणेषु लुप्तपदार्थानां लक्ष्यत्वम् अथवा अध्याहार्यत्वमेवेति **व्यञ्जनायाः नास्ति अवकाशः**।

एवं लुप्तोपमाशरीरदृष्ट्या व्यञ्जनाभावे ज्ञाते **'तडिद्गौरी तन्वी'**इत्यादिलुप्तासु एकैकशः व्यङ्ग्यार्थस्य सम्भावनायाः अवकाशाभावात् सामुदायिकरूपेण सर्वासामपि लुप्तानां शृङ्गाररसानुकूलविभावप्रकाशनमुखेन अतर्कितोपनतसमागमप्रकाशकत्वेन, शृङ्गाररसध्वनिः समुदायरूपेण अत्र व्यङ्ग्यः। प्रातिस्विकरूपेण तु लुप्तानां न कस्यापि व्यञ्जकत्वम्। अत एव अप्पय्यदीक्षितेनह्ह्ह

'एवमयं पूर्णा–लुप्ताविभागो वाक्यसमासप्रत्ययविशेषगोचरतया शब्दशास्त्र–व्युत्पत्तिकौशलप्रदर्शनमात्रप्रयोजनः नातीव अलङ्कारशास्त्रे व्युत्पाद्यतामर्हति'[१]।

इति चित्रमीमांसायां कथनेन लुप्ताभेदानां शब्दशास्त्रव्युत्पत्तिकौशलप्रदर्शनमात्रप्रयोजनकत्वात् व्यङ्ग्यप्रयोजनकत्वं नास्तीति अभिहितम्। किन्तु अत्र **'शृङ्गाररसध्वनिः** अथवा **शृङ्गाराभासः'** इति सूक्ष्मेक्षिकया विवेचने क्रियमाणे काकतालीयन्यायेन अत्र अतर्कितोपनतायाः, नायककृतनायिकावर्णनेन, तदानीमेव रहो मेलनेन च स्वाभिलषितत्वेन प्रतीतायाः **अन्यस्या एव कान्तायाः विभावत्वेन** अत्र प्रतीतेः **शृङ्गाररसाभास** एव ध्वन्यते। तदुपस्कारकत्वात् अत्र लुप्ताभेदानाम् अलङ्कारता। यदि चात्र स्वीयकान्तया एव बन्धुजनकृतकारणवशात् **'लब्धव्यः समागमः स्थगितः'**, तच्च रहस्यतया सम्पन्नम् – इति देवदत्तेन आवेदितम् इत्याभिप्रायः गृह्येत, तदा अयं शृङ्गाररस एवेति शृङ्गाररसध्वन्युपस्कारकत्वात् लुप्तोपमाभेदानाम् अलङ्कारत्वम् अनुसन्धेयम्।

२. अनन्वयालङ्कारः

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः।।[२]

यत्र एकस्मिन् एव वस्तुनि उपमानत्वम् उपमेयत्वञ्च निबध्यते तत्र अनन्वयालङ्कारः। **'न अन्वेतीति अनन्वयः'** इति व्युत्पत्त्या अनन्वितसादृश्यम् अनन्वयालङ्कारः। सामान्यतः सादृश्यं भेदनियन्त्रितं भवति। यतो हि 'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्'[३] अतः वस्तुनोः भेदः सादृश्यप्रयोजकः। किन्तु एकस्मिन् एव वस्तुनि सादृश्यम् अनन्वितम्= असम्बद्धं भवतीति अनन्वयालङ्कारः। किमेवं वर्ण्यमानस्य अनन्वितसादृश्यस्य फलम्? ह्ह्ह्इत्युक्ते ***द्वितीयसदृशवस्तुव्यवच्छेद एव*** इति आलङ्कारिकाणाम् ऐककण्ठ्येन निर्णयः।

१. चि.मी. (कालिकाप्रसादशुक्ल) पृ.१०८ २. कु.आ. पृ.९ ३. न्या.सि.मु. पृ.४३

तच्चात्र अनन्वये व्यङ्ग्यम्, ध्वनिस्थानीयञ्च। **'इन्दुरिन्दुरिव श्रीमान्...'** इत्याद्युदाहरणे एकस्मिन् एव चन्द्रे उपमानस्य उपमेयत्वस्य च **'चन्द्रेण अन्यत् सदृशं वस्तु नास्ति'** इति द्वितीयसदृशवस्तुव्यवच्छेदरूपफलध्वनये उपनिबन्धात् अनन्वयालङ्कारः।

अत्रेदं विचारणीयम् – अनन्वये व्यज्यमानः द्वितीयसदृशवस्तुव्यवच्छेदः व्यङ्ग्यः इति तु वास्तवम्। परं सः किं ध्वनिस्थानीयः उत गुणीभूतव्यङ्ग्यस्थानीयः? यतो हि विद्यानाथः प्रतापरुद्रीयेह्न **'समासोक्तिपर्यायोक्त्याऽऽक्षेपव्याजस्तुत्युपमेयोपमाऽनन्वयाऽतिशयोक्तिपरिकराप्रस्तुतप्रशंसाऽनुक्तनिमित्तविशेषोक्तिषु प्रतीयमानं वस्तु काव्योपस्कारकतामुपयाति।**[1]

इति कथयन् प्रतीयमानस्य काव्योपस्कारकताम् = शब्दार्थोपस्कारकतामभिप्रैति। वस्तुतः अनन्वये द्वितीयसदृशवस्तुव्यवच्छेदस्य, उपमेयोपमायां तृतीयसदृशवस्तुव्यवच्छेदस्य वा न शब्दार्थोपस्कारकत्वम्, अपि तु उपस्क्रियमाणत्वमेव। यतः कवेः अनन्वयालङ्कारे द्वितीयसदृशवस्तुव्यवच्छेदे तात्पर्यमस्ति। तस्य च व्यङ्ग्यत्वमस्ति, अनन्वितसादृश्यापेक्षया व्यज्यमाने अनुपमत्वे प्राधान्यमप्यस्ति। अतः तत्र अनुपमत्वस्य, उपमेयोपमादौ तृतीयसदृशवस्तुव्यवच्छेदस्य च ध्वनित्वमेव युक्तम्। अतश्च ध्वन्युपस्कारकत्वादेव अनन्वयस्य वा उपमेयोपमाया वा अलङ्कारत्वं न विद्यानाथोक्तदिशा काव्योपस्कारकत्वेन अनन्वयोपमेयोपमादेः अलङ्कारत्वमिति मन्तव्यम्। किञ्चानन्वये स्वस्य स्वेन सादृश्यं वर्ण्यमानमपि अनन्वितत्वात् – रजोऽन्तरं स्वरजश्च व्यवच्छिन्दत् कतकरज इव अन्येन सादृश्यम् स्वस्य स्वेनापि सादृश्यञ्च व्यवच्छिन्दत् **अनुपमत्वे** पर्यवस्यति।

३. उपमेयोपमालङ्कारः

पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि।।[2]

यत्र द्वयोः पर्यायेण उपमानोपमेयत्वं वर्ण्यते, तत्र उपमेयोपमालङ्कारः। एकधर्मप्रयुक्तं परस्परौपम्यमुपमेयोपमाह्नह्न इति तदर्थः। **'धर्मोऽर्थ इव पूर्णश्रीः'** इत्याद्युपमेयोपमायां तु धर्मस्य अर्थेन सह पूर्णश्रीमत्त्वरूपधर्मं पुरस्कृत्य सादृश्यवर्णनेनैव अर्थस्य श्रीमत्त्वरूपधर्मं पुरस्कृत्य धर्मेण सह सहृदयताबलात् सादृश्यसिद्धौ, पुनः 'अर्थो धर्म इव' इति सादृश्यवर्णनं

१. प्र.रु.पृ.२४४ २. कु.आ. पृ.१०

व्यर्थं सत् – 'अनयोः धर्मार्थयोः अन्यत् सदृशं तृतीयं वस्तु नास्ति' इति तृतीयसदृशवस्तु-व्यवच्छेदं ध्वनयति। एवञ्च तृतीयसदृशवस्तुव्यवच्छेदरूपध्वन्यमानार्थोपस्कारकत्वेन उपमेयोपमायाः अलङ्कारता।

४. प्रतीपालङ्कारः

यद्यप्यस्य अलङ्कारस्य प्रसिद्धपद्धतिप्रातिलोम्यात्मकलोकन्यायमूलकत्वेन लोकन्यायमूलकालङ्कारेष्वेव निवेशो न्याय्यः, तथापि बहुषु प्रतीपभेदेषु उपमितिक्रियानिष्पत्तेः दर्शनात्, कुत्रचित् सादृश्येनासम्बद्धत्वेऽपि प्रतीपस्य सादृश्यमूलकेषु अलङ्कारेष्वेव निरूपणं क्रियते। प्रतीपस्य **पञ्चप्रकाराः** निर्दिष्टाः। तत्र प्रथमस्य लक्षणोदाहरणे एवं स्तः।

१ प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।।[१]

यत्र उपमानस्य उपमेयत्वकल्पना क्रियते तत्प्रतीपम्। प्रसिद्धगुणम् अथवा उत्कृष्टगुणम् उपमानम्। अप्रसिद्धगुणम् अथवा अल्पगुणम् उपमेयम्। **त्वल्लोचनसमं पद्मम्** इत्याद्युदाहरणे उपमेयनायिकालोचनाभ्याम् उपमानपद्मस्य सादृश्यवर्णनात् प्रसिद्धौपम्यप्रातिलोम्यम् अत्र वर्णितं भवतीति प्रतीपालङ्कारः। सामान्यतः उपमेयस्य उपमानेन साम्यवर्णनम् ऋजुः पन्थाः। तदतिक्रम्य अत्र उपमेयेन उपमानस्य साम्यवर्णनात् अन्वर्थं प्रतीपत्वम्।

अत्र किं व्यङ्ग्यमिति विवक्षायाम् उदाहरणमुखेन विमर्शे क्रियमाणे सन्दर्भानुसारेण तात्पर्यविषयीभूतार्थपर्यालोचने च ***उपमानोपमेययोः समानकार्यकारित्वं ध्वन्यते।*** यतः प्रवासिनः कस्यचित् नायकस्य **'दूरदेशवेलायां कथं कालक्षेपः आसीत्'** इति नायिकया प्रश्ने कृते सति नायकः कथयति **'त्वल्लोचनसमं पद्मम् ....'** इत्यादि। एवञ्च नायिकानयनयुगलासमवधाने तत्सदृशेन पद्मेन विनोदः। एवं प्रियावक्त्रासान्निध्ये तत्सदृशेन चन्द्रेण विनोदः इति तत्कार्यकारितारूपः अर्थः ध्वन्यते। उपमानस्य उपमेयत्वकल्पनात्मा प्रतीपः तदुपस्कारकः। केवललक्षणदृष्ट्या पर्यालोचने तु उपमानस्य उपमेयत्वकल्पनेन वस्तुतः अधिकगुणस्यापि उपमानस्य उपमेयत्वसम्पादनेन न्यूनगुणत्वस्य वर्णनात् अर्थात् उपमेये उपमानत्ववर्णनेन आधिक्यमप्याविष्कृतं भवति। तादृशव्यङ्ग्योपस्कारकत्वाच्च प्रथमप्रतीपस्यालङ्कारत्वम्।

---

१. कु.आ. पृ.११

एवम् – १. उपमानस्य उपमेयत्वकल्पनात्मकं प्रथमं प्रतीपमुक्तम्।

२. अन्यस्य उपमेयत्वलाभेन वर्ण्यस्य अनादरात्मा द्वितीयः प्रतीपः।

३. वर्ण्यस्य उपमेयत्वलाभेन (अवर्ण्यस्य) अनादरात्मा तृतीयः प्रतीपः।

४. वर्ण्येण अन्यस्य औपम्यानिष्पत्तिप्रतिपादनात्मा चतुर्थः प्रतीपः।

५. उपमानस्य कैमर्थ्यात्मा (किमर्थ्वत्वम् इत्येवमात्मा) पञ्चमः प्रकारश्चेति आहत्य पञ्चप्रतीपप्रकाराः।

एषु प्रभेदेषु वर्ण्येन अन्यस्य उपमायाः अनिष्पत्तिवचनात्मके चतुर्थे प्रभेदे उपमिति–क्रियायाः अनिष्पत्तेः उपमालङ्कारलक्षणं तत्र न प्रवर्तते। अन्येषु प्रतीपप्रभेदेषु तु उपमालङ्कार–लक्षणं प्रवर्तत ह्रइति न तेषां प्रतीपालङ्कारत्वमिति चित्रमीमांसायाम् अप्पय्यदीक्षितैः व्यवस्थापितम्।[१]

२. **अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्।**
अलं गर्वेण ते वक्त्र ! कान्त्या चन्द्रोऽपि तादृशः।।[२]

यत्र = उपमानस्य अन्यस्य, उपमेयलाभेन = उपमेयत्वलाभेन = सादृश्याश्रयत्वलाभेन, वर्ण्यस्य अनादरः भवति, तत्र प्रतीपालङ्कारः। यथा '**अलं गर्वेण ते वक्त्र ...**' इत्याद्युदाहरणे अन्यस्य चन्द्रस्य '**कान्त्या चन्दोऽपि तादृशः**' इति कान्त्या कामिनी वक्त्रसादृश्याश्रयत्वस्य लाभात् उपमेयत्वलाभात्, '**अलं गर्वेण ते वक्त्र**' इति वर्ण्यस्य अनादरः क्रियते इति द्वितीयं प्रतीपम्। इदञ्च वाक्यं नायिका समीपं प्रति समागतस्यापि नायकस्य नायिकया कोपेन उपेक्षणात्, तद्गमनानन्तरं पश्चात्तप्तहृदयां नायिकां प्रति दूत्या उक्तम्। अतः तद्वाक्योन्मीलितमानविप्रलम्भोपस्कारकत्वात् वर्ण्यानादरात्मकप्रतीपस्य अलङ्कारत्वम्।

३. **वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः।**
कः क्रौर्यदर्पस्ते मृत्यो! त्वत्तुल्याः सन्ति हि स्त्रियः।।[३]

यत्र वर्ण्यस्य उपमेयत्वलाभेन अन्यस्यापि अनादरः क्रियते तत्र तृतीयं प्रतीपम्। यथा '**कः क्रौर्यदर्पस्ते मृत्यो !...**' इत्याद्युदाहरणे वर्ण्यानां स्त्रीणां क्रौर्यधर्मदृष्ट्या उपमेयत्वस्य लाभेन, अन्यस्य मृत्योः अनादरात् वर्ण्यानादरात्मकतृतीयं प्रतीपम्। उपमानमृत्योः अनादरेण

---

१. चि.मी. (कम्भम्पाटि सीतारामाञ्जनेयुलु) पृ.३१२
'आकर्ण्य सरोजाक्षि ... – इत्यादौ न तत्रातिव्याप्तिशङ्का उपमितक्रिया निष्पत्तिविरहात्'

२. कु.आ. पृ.१२ ३. कु.आ. पृ.१३

च तत्तुल्यानाम् **'स्त्रीणाम् अत्यन्तप्रमादकारित्वम्'** ध्वन्यते।

४. **वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्।**
मुधापवादो मुग्धाक्षि ! त्वन्मुखाभं किलाम्बुजम्।।[१]

यत्र वर्ण्येन = उपमेयेन, उपमानस्य = उपमायाः सादृश्यस्य अनिष्पत्तिः उच्यते, तत्र चतुर्थं प्रतीपम्। **'मुधापवादो मुग्धाक्षि...'** इत्याद्युदाहरणे उपमानस्य अम्बुजस्य उपमेयेन मुखेन सादृश्यानिष्पत्तेः, **'अम्बुजं त्वन्मुखाभम्** इति **मुधापवादः'** इति वचनेन प्रतिपादनात्, वर्ण्येन अन्यस्य औपम्यानिष्पत्तिवर्णनात्मकं प्रतीपम्। अत्र च अम्बुजे मुखसादृश्यानिष्पत्तेः वर्णनात् उपमेयस्य मुखस्य उत्कर्षः ध्वन्यते।

५. **प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते।**
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना।।[२]

यत्र उपमानस्य कैमर्थ्यम् = उपमेयेनैव उपमानकार्यसिद्धेः पुनरुपमानं किमर्थम् ? इति भावः वर्ण्यते, तत्र पञ्चमं प्रतीपम्। **'दृष्टं चेद्वदनं तस्याः'** इत्यादिप्रतीपे नायिकायाः वदनं दृष्टं चेत् तत्सदृशेन पद्मेन वा चन्द्रेण वा किं प्रयोजनम् ? तत्प्रयोजनस्य मुखेनैव निर्वृत्तत्वात्, इति उपमेयेन मुखेनैव कार्यसिद्धेः उपमानपद्मेन्द्वोः कैमर्थ्यं वर्णितम्। अत इदं कैमर्थ्यात्मकपञ्चमं प्रतीपम्। अत्र च पद्मचन्द्रयोः वैयर्थ्यस्य प्रतिपादनात् तत्कार्यकारित्वं मुखे व्यङ्ग्यम्। व्यङ्ग्यञ्च मुखे चन्द्रादिकार्यकारित्वं वाच्यस्य कैमर्थ्यस्य उपपादकं भवतीति वाच्यसिद्ध्यङ्गम्। अत इदं गम्यौपम्यवर्गेऽन्तर्भवति।

५. स्मरणालङ्कारः

स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्काऽलङ्कृतित्रयम्।
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः।।[३]

अत्र चन्द्रालोके स्मृत्यलङ्कारस्य प्रत्येकशः किमपि लक्षणं नोक्तम्। एवं **'स्मृति-स्सादृश्यमूला स्यात् वस्त्वन्तरसमाश्रया'**[४] इति दीक्षितोक्ते स्मृत्यालङ्कारलक्षणे सादृश्यमूलत्वमिति विशेषणमपि दत्तम्। अतः **'संस्कारजन्यं सादृश्यमूलं ज्ञानं स्मृतिः'** इति स्मृत्यलङ्कारस्य लक्षणं पर्यवस्यति।

१. कु.आ. पृ.१३ २. कु.आ. पृ. १३ ३. कु.आ. पृ.२३ ४. चि.मी.पृ.१५०

'पङ्कजं पश्यतः मे...' इत्याद्युदाहरणे पङ्कजे दृश्यमाने सादृश्यसंस्कारोद्बोधेन तत्सदृशविकासादिधर्मवतः कान्तामुखस्य स्मरणात् स्मृत्यलङ्कारः। अत्रापि विकासादिधर्माणां पदानुपात्तत्वात्, आक्षेपतो लाभे प्रायशः तस्य स्मृत्यङ्गस्य व्यङ्ग्यत्वेन, तस्य च विकासादि-धर्मस्य स्मरणोपस्कारकत्वात् गुणीभूतव्यङ्ग्यत्वम्।

अत्र च सादृश्यमपि न उपमायामिव, अनन्वय इव, उपमेयोपमायामिव वा वाच्यम्, अपि तु स्मृत्या आक्षेप्यमेव। अतः तस्यापि व्यङ्ग्यत्वम्। तस्य च व्यङ्ग्ये विकासादौ प्रयोजकतया तस्य च वाच्ये मुखे आश्रयत्वसम्बन्धेन च अन्वयः। एवं भेदाभेदप्रधानेषु 'उपमाद्याः स्मरणान्ताः चत्वारः अलङ्काराः निरूपिताः।

I. ख. आरोपमूलकाभेदप्रधानाः अलङ्काराः

रूपकादयः अपह्नुत्यन्ताः षडलङ्काराः आरोपे अन्तर्भवन्तीति प्राक्प्रतिपादितम्। तत्र आरोपो नाम विषयविषयिणोः अभिहितयोः (स्वस्ववाचकशब्दोपात्तयोः) अभेदप्रतिपत्तिः आरोपः। **'मुखं चन्द्रः'** इति रूपके, **'मुखचन्द्रेण...'** इत्यादिपरिणामे, **'किमिदं मुखम् आहोस्वित् चन्द्रः...'** इत्यादिसन्देहे **'त्वन्मुखं चन्द्र इति चकोराः अनुधावन्ति'** इति भ्रान्तौ, **'कमलमिति चञ्चरीकाः, चन्द्र इति चकोराः सम्भावयन्ति'** इत्यादि-एकस्यैव अनेकधा ग्रहणात्मके उल्लेखे **'नेदं मुखम् अपि तु चन्द्रः...'** इत्याद्यपह्नुतौ च समानविभक्त्युद्भासितस्य सुन्दरसाधारणधर्मोल्लासितस्य आहार्यस्य अनाहार्यस्य वा अभेदनिश्चयस्य सद्भावात्, तेषामलङ्काराणामारोपमूलकाभेदप्रधानत्वं व्यवस्थितम्। तत्रादौ रूपकं निरूप्यते ह्नह्नह्न

१. रूपकालङ्कारः

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः।।[१]

किं वा ताद्रूप्यमित्युक्ते 'तेन किम्, अपरः, अपरा' इत्यादिभेदभासकसामग्र्यां सत्यपि अभेदबोधौपयिकसामानाधिकरण्ये ताद्रूप्यमेव, अन्यथा तु अभेदः इति विज्ञेयम्।

१. **'अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरःक्षणात्'**[२]

२. **'अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना'**[३]

१. कु.आ. पृ.१५ २. कु.आ. पृ.१९ ३. कु.आ. पृ.१६

तत्र प्रथमे उदाहरणे राजा=विषयः, धूर्जटिः= विषयी। तयोः 'अयं धूर्जटिः' इति समानाधिकरण (समानविभक्त्यन्त)शब्दाभ्याम् अभेदः भासते। वस्तुतः राज्ञः धूर्जटेः च भेद एवास्ति। तथापि समानधर्मोल्लासपूर्वकसमानविभक्तिकशब्दप्रयोगात् (आहार्यस्य इच्छाजन्यस्य अभेदस्य रञ्जनं भवति। अतः तत् अभेदरूपकम्। **'अस्या मुखेन्दुना...'** इत्युदाहरणे तु **'मुखेन्दुना... (किम्) इन्दुना'** इति अभेदभासकसमानविभक्तिक (तृतीयान्तात्मक) शब्दप्रयोगस्य सत्त्वेऽपि, **'लब्धे नेत्रानन्दे किमिन्दुना'** इति मुखेन्दु–प्रसिद्धेन्द्वोः मध्ये किमः महारथ्या मध्यविन्यस्तभेदकोपाधेरिव (Just like a Road-divider) भेदकत्वात्, तत्र तयोः अभेदबुद्ध्यजननात् ताद्रूप्यप्रतिपत्तिरेव इति ताद्रूप्यरूपकम्। ताद्रूप्यं नाम तद्वृत्त्यसाधारणगुणः। प्रकृते नेत्रानन्दः ताद्रूप्यम्। प्रकृते च समानविभक्त्यन्तपदसद्भावेऽपि अपरपदप्रयोगादिभेदभासकसामग्री यत्र, तत्र ताद्रूप्यप्रतिपत्तिः। तदभावे तु समानाधिकरण–पदसाधर्म्याद्युल्लासितः अभेदप्रत्यय एव ह्नह्नह्नइति ताद्रूप्याभेदप्रत्यययोः भेदः विवेक्तव्यः।

रूपकभेदाःह्नह्नह्न

तदित्थं रूपकम् अभेदरूपकम्, ताद्रूप्यरूपकञ्चेति द्विविधम्। अभेदरूपकं ताद्रूप्यरूपकञ्च आधिक्य–न्यूनत्व–अनुभयोक्तिभेदात् प्रत्येकशः त्रिविधम्। तदेवं रूपकं षड्विधम्। तत्र यद्यपि आधिक्य–न्यूनत्व–अनुभयोक्तिरूपेण पदार्थसङ्कीर्तनं कृतम्, तथापि उद्देश्यक्रमप्रातिलोम्येन उदाहरणानि दत्तानि।

१. अनुभयाभेदरूपकम् ह्नह्नह्न **'अयं हि धूर्जटिः ...'** इति पूर्वोदाहृते **'अयं धूर्जटिः'** इति समानविभक्तिकत्वेन वर्णनीये राजनि विषये धूर्जटेरभेदः प्रतिभाति। **येन दग्धाः पुरःक्षणात्** इति शत्रुपट्टणदाहकत्वस्य राज–धूर्जटिसाधारणस्य प्रतिपादनेन विषये राजनि न आधिक्यम्, न वा न्यूनत्वं वर्णितमिति अनुभयाभेदरूपकालङ्कारः।

२. न्यूनाभेदरूपकम् ह्नह्नह्न यथाह्न **'अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम्'**[१] अत्रापि 'अयं शम्भुः' इति वर्णनीये राजनि समानविभक्तिकत्वात् भूयो धर्मवत्त्वात् च शम्भोः विषयिणः अभेदरञ्जनं क्रियते। तत्र च 'तार्तीयीकं विलोचनं विना' इति न्यूनत्वमपि प्रसिद्धशम्भोरपेक्षया वर्णितम्। अतः न्यूनाभेदरूपकालङ्कारः। अत्र तृतीयलोचनप्रहाणोक्त्या शिष्टधर्मान्तरप्रयुक्ताभेददार्ढ्यं वर्ण्यत इति एतत् दृढारोपरूपकमित्यपि केचित् कथयन्ति।

२०. कु.आ. पृ.१५

३. अधिकाभेदरूपकम्ह्लह्लह्ल 'शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्'[१]। अत्र 'अद्य विश्वमवति' इति एतत्कालीनविश्वावनरूपलिङ्गात् उपस्थापितः अथवा अध्याहृतः अयं पदार्थो राजा विषयः। एवञ्च 'अयं शम्भुः' इति समानाधिकरणपदद्वयोपस्थापिताभेदः अत्रास्तीति अभेदरूपकम्। समदृष्टितां स्वीकृत्य' इति कथनेन विषये आधिक्यस्य वर्णनात् अधिकाभेदरूपकम्।

४. अनुभयताद्रूप्यरूपकम् ह्लह्लह्ल 'अस्या मुखेन्दुना लब्धे ...' इत्यादिपूर्वोक्तोदाहरणे मुखेन्दुप्रसिद्धेन्द्वोःह्लह्लह्ल तृतीयान्तपदद्वयोपस्थापितत्वेऽपि 'नेत्रानन्दे लब्धे किमिन्दुना' इति प्रसिद्धेन्दुकार्यकारित्वस्य मुखेन्दौ (इन्दुसदृशे मुखे) वर्णनात् ताद्रूप्यरूपकम्। तत्रापि विषयि-भूतप्रसिद्धेन्द्वपेक्षया मुखेन्दौ आधिक्यस्य न्यूनत्वस्य वा अवर्णनात् अनुभयताद्रूप्यरूपकम्।

५. न्यूनताद्रूप्यरूपकम् यथाह्लह्लह्ल**'साध्वीयमपरा लक्ष्मीरसुधासागरोदिता'**[२] अत्र 'इयमपरा लक्ष्मीः' इत्यत्र 'इयं लक्ष्मीः' इति समानाधिकरणशब्दप्रयोगे सत्यपि, मध्ये अपरा शब्दप्रयोगेण भेदावगमात् शाब्दिकस्यापि आहार्याभेदस्य अलब्धेः, प्रसिद्धलक्ष्मीकार्य-कारित्वमेव अस्यां महिलायां भासत ह्लह्लह्लइति ताद्रूप्यरूपकम्। तत्रापि प्रसिद्धलक्ष्मी-गतसुधासागरोदितत्वस्य अस्यां महिलायाम् अभाववर्णनात् न्यूनताद्रूप्यरूपकम्।

६. अधिकताद्रूप्यरूपकम्ह्ल यथा **'अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते।'** अत्र मुखचन्द्रे प्रसिद्धचन्द्रवैलक्षण्यस्य वर्णनात्, 'चन्द्रात् मुखचन्द्रः' इति समान-विभक्त्यभावाच्च अत्र मुखचन्द्रे प्रसिद्धचन्द्रताद्रूप्यमेव भासते। तत्रापि प्रसिद्धचन्द्रगत-कलङ्कित्वाभावस्य मुखचन्द्रे वर्णनात् अधिकताद्रूप्यरूपकालङ्कारः।

रूपकोदाहरणेषु व्यङ्ग्यपरामर्शःह्लह्लह्ल रूपकलक्षणशरीरदृष्ट्या सामान्यतः 'अयम् अत्र व्यङ्ग्यार्थः' इति वक्तुं न शक्यते। यतो हि विषये विषय्यभेदः विषयिताद्रूप्यं वा यदि रूपकम्, तर्हि 'मुखं चन्द्रः' इत्यादौ रूपके आहार्याभेदस्यैव निश्चीयमानत्वात् चन्द्राभिन्नं मुखम् इत्येव बोधः भवति। यदि तुह्लह्लह्ल 'गौणसारोपलक्षणया उपमानवाचकपदानाम् उपमेये वर्तनं रूपकम्' इति रूपकलक्षणं क्रियेत, तर्हि मुखं चन्द्रः इत्यत्र चन्द्रपदस्य चन्द्रसदृशे लक्षणास्वीकारात् तस्य च मुखेन अन्वये 'चन्द्रसदृशाभिन्नं मुखम्' इति लाक्षणिकबोधस्य पर्यवसन्नत्वात्, तत्र च लक्षणायाः प्रयोजनवतीत्वेन, प्रयोजनांशे च व्यञ्जनाव्यापारस्य

---

१. कु.आ. पृ.१६ २. कु.आ. पृ.१६

स्वीकारात् अभेदप्रतिपत्तिः ताद्रूप्यप्रतिपत्तिर्वा व्यङ्ग्यतया भातीति वक्तुं शक्यते। किन्तु विषये विषय्यभेदस्य विषयि ताद्रूप्यस्यैव रूपकत्वेन तस्य च शाब्दन्यायमर्यादालभ्यत्वेन व्यञ्जना–व्यापारस्य अत्रावकाशः नास्ति। ततश्च चन्द्रालोककारमते अप्पय्यदीक्षितमते वा रूपके व्यङ्ग्यार्थनिरूपणं लक्षणशरीरदृष्ट्या अशक्यमिति उदाहरणमुखेन रूपकप्रभेदेषु व्यङ्ग्यः पराम्रष्टव्यः।

'अयं हि धूर्जटिः, अयमास्ते विना शम्भुः, शम्भुर्विश्वमवत्यद्य' इति प्रथमोदाहरणत्रये राज्ञः परमशिवाभेदप्रतिपादनात् तदात्मनः च रूपकस्य कविगतवर्णनीय–राजविषयकभक्तिभावाङ्गत्वेन अभेदरूपकभेदानां त्रयाणामुपस्कारकत्वेन अलङ्कारता। एवम् **'अस्या मुखेन्दुना..., अयं कलङ्किनश्चन्द्रात्...'**[१] इत्युदाहरणद्वये वर्णनीय–नायिकामुखचन्द्रवर्णनपरे शृङ्गाराङ्गविभावाद्युन्मीलनेन शृङ्गाररसध्वनेः अभिव्यक्तेः, द्वयोरपि ताद्रूप्यरूपकप्रभेदयोः शृङ्गारध्वन्युपस्कारकत्वम्। 'साध्वीयमपरा लक्ष्मीः' इति न्यूनताद्रूप्य–रूपकोदाहरणे तु वर्णनीयमहिलामहत्त्वपूर्णशोभातिशयवर्णनपरे, रूपकस्य तादृशमहिला–महत्त्वोपस्कारकत्वम्।

२. परिणामालङ्कारः

परिणामः क्रियार्थश्चेद्विषयी विषयात्मना।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा।।[२]

यत्र विषये आरोप्यमाणः विषयी, स्वतः प्रकृतक्रियोपयोगित्वासम्भवात् विषयात्मना परिणतिम् अपेक्षते तत्र परिणामालङ्कारः। तथा विषयात्मना विषयिणः परिणामापेक्षणादेव अस्य अलङ्कारस्य परिणामत्वम्। यथाह्नह्नह्न **'प्रसन्नेन दृगब्जेन ...'** इत्याद्युदाहरणे विषये दृशि अब्जम् अभेदेन आरोपितोत्तरपदार्थप्रधानमयूरव्यंसकादिसमासात्। यदि तथा भाव्येत, तर्हि विषयस्य दृशः विषयि अब्जतादात्म्यापन्नत्वात्, अब्जाभिन्नस्य दृशः जडत्वेन वीक्षणक्रियोपयोगो न स्यात्। अतः उत्तरपदार्थप्रधानमयूरव्यंसकादिसमासः अत्र परिणामे न स्वीकार्यः। एवञ्च दृशि आरोप्यमाणस्य अब्जस्य स्वतः वीक्षणक्रियोपयोगाभावात्, अब्जमेव विषयदृगात्मना परिणममानं सत् वीक्षणक्रियायामुपयुज्यते। अतः परिणामालङ्कारः। एवञ्च परिणामालङ्कारे सिद्धान्तपरतया पूर्वपदार्थप्रधानमयूरव्यंसकादिसमास एव स्वीकार्यः। न

१. कु.आ. पृ.१६ २. कु.आ. पृ.२०

चात्रह्नह्न 'दृगब्जमिव' इति पूर्वपदार्थप्रधानोपमितसमासस्वीकारात् अब्जसदृश्याः दृशः स्वत एव वीक्षणक्रियोपयोगात्, नास्ति परिणामः ह्नह्नइति वाच्यम्। 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रेण सामान्यधर्माप्रयोग एव उपमितसमासाश्रयणात्।

अत्र च परिणामालङ्कारे विषयविषयिणोः साधर्म्यस्य प्रसन्नत्वस्य शब्दोपात्ततया तत्सहचरितविकासादिर्धर्मः व्यज्यते। तस्य च आश्रयत्वसम्बन्धेन अब्जाभिन्नत्वेन निश्चिते दृशि अन्वयेन प्रसन्नाभिन्नविकासाश्रयाब्जाभिन्नदृक्करणकवीक्षणानुकूलकृतिमती मदिरेक्षणा इतिह्नह्नह्न शाब्दबोधः अवसेयः। तत्र च व्यङ्ग्यविकासधर्मस्य वाच्याब्जाभिन्नदृगुपस्कारकत्वेन अलङ्कारता।

३. उल्लेखालङ्कारः

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः।।[१]

यत्र एकस्मिन् वस्तुनि बहूनां धर्माणां सद्भावेन एकैकेन प्रतिपत्रा एकैकं धर्मं स्वीकृत्य, वस्तुनः उल्लेखः क्रियते अर्थात् 'बहुभिः एकस्यैव उल्लेखः क्रियते' तत्र उल्लेखालङ्कारः। यथा–'स्त्रीभिः कामोऽर्थिभिः...' इत्याद्युदाहरणे वर्णनीये राजनि लोकोत्तरसौन्दर्यस्य, लोकोत्तरवितरणस्य, लोकोत्तरनिग्रहसामर्थ्यस्य च सद्भावात् स्त्रीभिः (मन्मथत्वेन) कामत्वेन, याचकैः कल्पवृक्षत्वेन, शत्रुभिः यमत्वेन च दर्शनात् बहुभिः बहुधोल्लेखात्मा उल्लेखालङ्कारः। अत्र च असाधारण–नैकविध–गुणयुग्व्यक्तित्वं ध्वन्यते।

२. **एकेन–बहुधोल्लेखेऽप्यसौ विषयभेदतः।**
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने।।[२]

पूर्वोल्लेखे तावत् ग्रहीतृभेदात् एकस्य अनेकधोल्लेखः। अत्र तु एकेनैव प्रतिपत्रा विषयभेदात् बहुधोल्लेखः क्रियते, तत्र द्वितीयः उल्लेखालङ्कारः। यथाह्नह्नह्न **'गुरुर्वचसि...'** इत्याद्युदाहरणे वचः कीर्तिशरासनात्मकविषयभेदेन एकस्यैव राज्ञः वचसि बृहस्पतित्वेन, कीर्तौ अर्जुनत्वेन, शरासने भीष्मत्वेन उल्लेखात् उल्लेखालङ्कारः। अत्रापि नानागुणयोगि–व्यक्तित्वमेव व्यङ्ग्यं प्रति द्वितीयविधस्य उपस्कारकता।

---

१. कु.आ. पृ.२१ २. कु.आ. पृ.२३

४। ५. भ्रान्तिमत्–सन्देहालङ्कारौ

'स्यात् स्मृति ...'[१] इत्यादिश्लोकभागेन स्मृति–भ्रान्ति–सन्देहानां स्वरूपं प्रागेव न्यरूपि। तत्र स्मृतेः लक्षणं भेदाभेदप्रधानालङ्कारेषु निरूपितम्। अथ भ्रान्तिः नामह्ल 'विशेष्यावृत्तिप्रकारकज्ञानत्वम्, सन्देहत्वन्तुह्ल निश्चयभिन्नत्वे सति सम्भावनाभिन्नज्ञानत्वं पारिभाषिकम्'[२] इत्यलङ्कारचन्द्रिकाकारेणोक्तम्। रूपके अभेदः आहार्यभेदः। भ्रान्त्यलङ्कारे अभेदबोधस्तु अनाहार्यः। भ्रान्तौ अभेदबोधस्य प्रवृत्तिपर्यन्तत्वात्। भ्रान्तिसन्देहयोः उदाहरणेह्लह्लह्ल

अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्।
पङ्कजं वा सुधांशुर्वेत्यास्माकं तु न निर्णयः।।[३]

अत्र आद्ये **'अयं प्रमत्तमधुपः...'** इत्याद्युदाहरणे मधुपस्य मुखे पङ्कजज्ञानस्य वर्णनात् भ्रान्तिमान् अलङ्कारः। अत्र च मधुपस्य मुखे पङ्कजत्वज्ञानानन्तरं मुखाभिमुख्येन मधुपस्य प्रवृत्तेः मुखत्वज्ञाने मधुपस्य प्रवृत्त्यभावात् विशेष्यभूतमुखावृत्तिपङ्कजत्वज्ञानस्यात्र भ्रान्तित्वम्। तस्य च व्यङ्ग्यभूतवर्णनीयनायिकामुखवृत्तिपद्मसादृश्यातिशयोपस्कारकत्वात् अथवा सादृश्यातिशयसन्दृग्धव्यङ्ग्याभेदातिशयोपस्कारकत्वात् भ्रान्तिमतः अलङ्कारता।

'पङ्कजं वा सुधांशुर्वेति...' इत्यादिसन्देहोदाहरणे तु वर्णनीयनायिकामुख–विशेष्यकपङ्कजत्वसुधांशुत्वाद्यनेकधर्मप्रकारकसमकोटिकसंशयस्य, वर्णनीयनायिका मुखगतव्यङ्ग्यभूतपद्मचन्द्रसादृश्यतदभेदान्यतरोपस्कारकत्वेन सन्देहस्यालङ्कारता।

६. अपह्नुत्यलङ्कारः

अपह्नवालङ्कारस्य (६) षट् भेदाः निर्दिष्टाः। तत्रह्लह्लह्ल

१. अन्यस्यारोपार्थः विषये विषयधर्मनिषेधः प्रथमा शुद्धापह्नुतिः। २. सैव युक्तिपूर्वा द्वितीया हेत्वह्नुतिः। ३. अन्यत्र = उपमेये, आरोपार्थं क्रियमाणः विषयिणि विषयनिह्नवः। पर्यस्तापह्नुतिः। ४. अन्यशङ्कानिवारकभ्रान्तिनिवारकतत्त्वाख्यानात्मा अपह्नुतिः चतुर्थी। ५. तृतीयव्यक्त्यन्तरशङ्कानिवारकतया तथ्यनिह्नवात्मा छेकापह्नुतिः पञ्चमी। ६. 'व्याजाद्यैः पदैः निषेधव्यक्तिरूपा कैतवापह्नुतिः षष्ठी।

---

१. कु.आ. पृ.२३ 'स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम्।' अत्रैव निबन्धे पृ.
२. कु.आ. पृ.२४ ३. कु.आ. पृ.२४

१ शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः।
नायं सुधांशुः, किं तर्हि ? व्योमगङ्गासरोरुहम्।।[1]

यत्र विषये विद्यमानः धर्मः अन्यस्य विषयिणः आरोपाय निह्नूयते, तत्र शुद्धापह्नुतिः। यथा **'नायं सुधांशुः ...'** इत्याद्युदाहरणे चन्द्रोदयवर्णनसन्दर्भे विषये सुधांशौ सुधांशुत्वरूप-विषयधर्मनिषेधस्य व्योमगङ्गासरोरुहारोपणार्थं क्रियमाणत्वेन शुद्धापह्नुत्यलङ्कारः। अत्र च विषये सुधांशौ सुधांशुत्वं निषिध्य व्योमगङ्गासरोरुहत्वरूपधर्मवर्णनेन सुधांशु-व्योमसरोरुहयोः सादृश्यं व्यज्यते। एतच्च व्यङ्ग्यं सादृश्यं यद्यपि वाच्यायाः अपह्नुतेः तात्पर्येण न प्रकाश्यते, तथापि अपह्नुतिजठरविलीनं शोभाकरमिति शुद्धापह्नुतेरलङ्कारता।

२. स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः।
नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्वोऽयमुत्थितः ।।[2]

यत्र विषयिणः आरोपार्थं क्रियमाणः विषये विषयधर्मनिषेधः युक्तिपूर्वकः भवति तत्र हेत्वपह्नुतिः। यथाह्नह्नह्न **'नेन्दुस्तीव्रो ...'** इत्यादिविरहिणी वचने **'इन्दुः न'** इति प्रतिषेधस्य तीव्रत्वहेतुना क्रियमाणत्वात्, **अर्को न**, यतः 'निशि न भवेत् अर्कः' इति अर्कनिषेधस्यापि क्रियमाणत्वात्, अनुभूयमानतीव्रत्व-निशासम्बन्धरूपहेतुभ्यां तदनुगुणतया समुद्रादुत्थित-बडबानलारोपस्य क्रियमाणत्वात् हेत्वपह्नुतिरलङ्कारः। अत्र च विरहिण्या अनुभूयमान-व्यङ्ग्यविप्रलम्भशृङ्गारं प्रति हेत्वपह्नुतिः उपस्कारिका।

३. अन्यत्र तस्यारोपार्थः पर्यास्तापह्नुतिस्तु सः।
नायं सुधांशुः, किं तर्हि ? सुधांशुः प्रेयसीमुखम्।।[3]

यत्र अन्यत्र = विषये, तस्य = विषयिणः, आरोपाय विषयिधर्मनिह्नवः क्रियते, तत्र पर्यस्तापह्नुतिः। यथाह्नह्न **'नायं सुधांशुः ... सुधांशुः प्रयेसी मुखम्'** इत्युदाहरणे विषयिणि सुधांशौ नायिकागाढाभिलाषमग्नमनसः नायकस्य दृष्ट्या, अप्रकृते सुधांशौ सुधांशुत्व-निषेधस्य, विषये प्रेयसीमुखे सुधांशुत्वारोपाय क्रियमाणत्वात् पर्यस्तापह्नुतिः। आद्यायां शुद्धापह्नुतौ कृतस्य विषयवृत्तिधर्मनिषेधस्य वैपरीत्येन सुधांश्वात्मकविषयिवृत्तिधर्मस्य अत्र निषेधात् पर्यस्तापह्नुतित्वम्। विषयिणि सुधांशौ निषिद्धं सुधांशुत्वं प्रेयसीमुखात्मके विषये आरोपेण संक्राम्यति। यथा सौत्रान्तिकमतेह्नह्नह्न रजते इदन्त्वस्य निषेधे सति, रजतं विज्ञानधर्मो भवति। तद्वत् सुधांशौ निषिद्धं सुधांशुत्वम् आरोपेण प्रेयसीमुखधर्मो भवति।

१. कु.आ. पृ.२५ २. कु.आ. पृ.२६ ३. कु.आ. पृ.२७

एवञ्च अत्र प्रेयसीमुखे सुधांशुत्वप्रेयसीमुखत्वरूपधर्मद्वयस्य सद्भावात् **एकत्र द्वयमि**ति रीत्या (Two in one) धर्मद्वयावस्थानेन सुधांशुप्रेयसीमुखोभयकार्यकारित्वं व्यज्यते। तदुपस्कारकत्वाच्च पर्यस्तापह्नुतेः अलङ्कारत्वम्।

४. **भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे।**
तापं करोति सोत्कम्पं, ज्वरः किं ? न, सखि ! स्मरः।।[१]

यत्र अन्यविषयशङ्कायां सञ्जातायां भ्रान्तिवारणम् = भ्रान्तिनिवारकः तत्त्वाख्यानात्मा प्रतिषेधः भवति तत्र भ्रान्तापह्नुतिः। यथाह्नह्न **'तापं करोति सोत्कम्पम्...'** इत्याद्युदाहरणे, तापं करोति सोत्कम्पम् इति आत्मनः मन्मथावस्थायां निवेदितायाम्, ऋजुबुद्ध्या सख्या सोत्कम्पतापस्य ज्वरसाधारणत्वेन 'ज्वरः किम् ?' इति प्रश्ने कृते सति, 'न सखि ! अपि तु स्मरः' इति निषेधस्य वास्तवस्वरूपाविष्कारफलकस्य वर्णनात् भ्रान्तापह्नुतिः। यथा हिह्नह्नह्न अद्वैतवेदान्ते 'नायं सर्पः' इति सर्पापवादः (सर्पत्वज्ञानपरिमार्जनम्) भ्रान्तिनिवर्तनद्वारा रज्जुस्वरूपाविष्काराय उपयुज्यते, एवमेव **'न सखि ! ज्वरः'** इति कृतः निषेधः विप्रलम्भ-शृङ्गारोद्दीपनहेतुभूतस्मरस्वरूपाविष्कारद्वारा विप्रलम्भशृङ्गाराङ्गभूतः भवति। तदुपस्कारकत्वाच्च भ्रान्तापह्नुतेः अलङ्कारत्वम्।

५. **छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे।**
प्रजल्पन्मत्पदे लग्नः, कान्तः किम् ? न हि, नूपुरः।।[२]

छेकाः = विदग्धाः, तत्कृता अपह्नुतिः छेकापह्नुतिः। पूर्वं भ्रान्तिवारणाय अपह्नवः कृतः। इदानीन्तु आत्मना क्रियमाणं प्रसङ्गं तृतीयो जनः न जानीयात् इति धिया अपह्नवः तथ्यनिह्नवात्मा। यथाह्नह्नह्न 'प्रजल्पन् मत्पदे लग्नः ...' इत्युदाहरणे नायिकया प्रियसखीं प्रति 'प्रजल्पन् मत्पदे लग्नः' इत्युक्ते सति, तद्वचनं श्रुतवत्या तृतीयया **'कान्तः किम्?'** इति प्रश्नकरणात्, तया 'स्वप्रियवृत्तान्तः न ज्ञातो भवेत्' इति धिया **'कान्तः न हि नूपुरः'** इति वास्तवस्य कान्तस्य निषेधात् अवास्तवस्य नूपुरस्य प्रकाशनात् वक्तृचातुर्यरूपध्वन्य-मानार्थपर्यवसायिनी इयं छेकापह्नुतिः।

६. **कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।**
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्।।[३]

१. कु.आ. पृ.२८ २. कु.आ. पृ.२९ ३. कु.आ. पृ.३१

यत्र मिष–कपट–छल–छद्म–कैतव–व्याजप्रभृतिभिः पदैः निषेधस्य व्यक्तिः भवति, तत्र कैतवापह्नुत्यलङ्कारः। विषयासत्यत्वरूपः व्याजपदार्थः विषयबाधमन्तरा नोपपद्यत ह्नह्नह्नइति व्याजपदार्थेन असत्यत्वेन निह्नवः आक्षिप्यते = व्यज्यते। यथा – **'निर्यान्ति स्मरनाराचाः ...'** इत्युदाहरणे 'नेमे कान्तादृक्पाताः (अपि तु स्मरनाराचाः)' इति विषय–निषेधस्य 'कान्तादृक्पातकैतवात्' इति कैतवपदेन अभिव्यक्तेः कैतवापह्नुतिः। अत्र च कैतवादिपदप्रयोगः भाषाप्रयोगे वक्तुः निरङ्कुशाधिकारं व्यक्तीकरोति। व्यज्यमानं भावप्रकटन–सामर्थ्यं कैतवापह्नुतिः उपस्करोतीति कैतवापह्नुतेरलङ्कारता।।

इत्थमारोपमूलकाभेदप्रधानाः अलङ्काराः निरूपिताः। इदानीमध्यवसायमूलकौ निरूप्येते।

I. ग. अध्यवसायमूलकाः

१. उत्प्रेक्षालङ्कारः

अध्यवसायमूलकेषु उत्प्रेक्षा–अतिशयोक्तिः इति द्वावलङ्कारौ। तत्र को नाम अध्यवसायः इत्युक्ते **'विषयनिगरणेन अभेदप्रतिपत्तिः अध्यवसायः'** इति लक्षणमुच्येत तस्य 'चन्द्रः' इति अतिशयोक्तौ समन्वयेऽपि 'नूनं मुखं चन्द्रः' इत्यत्र विषयनिगरणाभावात् अव्याप्तिः। अतः उत्प्रेक्षायाम् ह्नह्नह्न 'शते नवनवतिभागं चन्द्रत्वस्य निश्चिततत्वेन प्रायशः विषयनिगरणस्य सद्भावात् साध्याध्यवसायः' ह्नह्नह्नअलङ्कारसर्वस्वोक्तदिशा अनुसन्धेयः।[1]

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।
उक्तानुक्तास्पदाद्यत्र सिद्धाऽसिद्धास्पदे परे।।[2]

इति कारिकया चन्द्रालोके उत्प्रेक्षालक्षणविभागौ अदर्शिषाताम्। तत्र सम्भावना इति उत्प्रेक्षायाः लक्षणम्। सम्भावना नाम उत्कटैकतरकोटिकः संशयः। स च संशयः शङ्के, मन्ये, ध्रुवम्, नूनम्, इव, किम्, प्रायः ह्नह्नह्नइत्यादिशब्दैः प्रतिपाद्यते। विषये विषयिणः तादात्म्यसम्भावना वा ताद्धर्म्यसम्भावना वा यत्र क्रियते तत्र उत्प्रेक्षालङ्कारः। तत्र च उत्प्रेक्षाह्नह्नह्न १. वस्तूत्प्रेक्षा २. हेतूत्प्रेक्षा ३. फलोत्प्रेक्षा चेति त्रिविधा। तत्रापि वस्तूत्प्रेक्षायां विषयस्य उक्तानुक्तत्वभेदेन १. उक्तविषया स्वरूपोत्प्रेक्षा, २. अनुक्तविषया स्वरूपोत्प्रेक्षा इति द्विविधा।

---

१. अ.स. (रुय्यकः) भा.१. पृ.१९० 'स च द्विविधः सिद्धिः साध्यश्च।' २. कु.आ. पृ.३२

हेतुफलोत्प्रेक्षे तु सम्भावना विषयस्य अर्थात् उत्प्रेक्ष्यमाणस्य सिद्धत्वसाध्यत्वाभ्यां प्रत्येकं द्वैविध्यात्– ३. सिद्धविषया हेतूत्प्रेक्षा ४. असिद्धविषया हेतूत्प्रेक्षा ५. सिद्धविषया फलोत्प्रेक्षा ६. असिद्धविषया फलोत्प्रेक्षा चेति उत्प्रेक्षायाः षाड्विध्यं सम्पन्नम्।

१.१. उक्तविषया वस्तूत्प्रेक्षा (स्वरूपोत्प्रेक्षा)—

'धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्'[१]

अत्र निशावर्णनसन्दर्भे वर्ण्यत्वेन तमः विषयः। तच्च उपात्तम्। तत्र च कोकीविरहाग्नि-जनितधूमस्तोमस्य तादात्म्यसम्भावनायाः वर्णनात् उत्प्रेक्षालङ्कारः। तथा धूमस्तोमतादात्म्य-सम्भावनावर्णने निमित्तं तु सर्वतो व्याप्तत्वम्, नैल्यं दृष्टिप्रतिरोधकत्वादि च। एवञ्चात्र उपात्ते तमोरूपे विषये धूमस्तोमतादात्म्यसम्भावनायाः वर्णनात् उक्तविषया स्वरूपोत्प्रेक्षा। अत्र च तमसः विरहाग्निजनितधूमप्रचयत्वेन उत्प्रेक्ष्यमाणत्वात् उत्प्रेक्षायाः विप्रलम्भोपस्कारकत्वेन अलङ्कारत्वम्।

१.२. अनुक्तविषया वस्तूत्प्रेक्षा—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः'[२]

अत्र तमः विषयः उपात्तः, तत्र च लेपनकर्तृतादात्म्यम् उत्प्रेक्षणीयम्। अतश्च उपात्तविषयस्वरूपोत्प्रेक्षा इति यद्यपि वक्तव्यम्, तथापि 'लिम्पति' इति आख्यातस्य 'भावप्रधानमाख्यातम्' इति न्यायेन भावप्रधानत्वात्, आख्यातार्थस्य कर्तुः क्रियाया-मन्वितत्वेन अन्यत्र अन्वितत्वात् 'एकत्र विशेषणत्वेन अन्वितस्य अपरत्र विशेषणतया अन्वयायोगः'[३] इति न्यायेन प्रथमान्तार्थे तमसि अन्वयायोगात्, तमसि लेपनकर्तृतादात्म्य-सम्भावना कर्तुं न शक्यते।

अतश्च अत्र तमसि लेपनक्रिया कर्तृतादात्म्यसम्भावनां परित्यज्य तमोव्यापनात्मके अनुपात्ते विषये तमःकर्तृकाङ्गकर्मकलेपनक्रियास्वरूपं तादात्म्येन उत्प्रेक्ष्यत इति, अनुक्तविषयस्वरूपोत्प्रेक्षायाः इदमुदाहरणम्। रात्रिवर्णनात्मकवाच्यं प्रति अत्र अनुपात्त-विषयस्वरूपोत्प्रेक्षायाः उपस्कारकत्वम्। उत्प्रेक्षायां निमित्तं तु नभः प्रभृतिभूपर्यन्तसकल-

---

१. कु.आ. पृ.३२ २. कु.आ. पृ.३२

३. कु.आ. पृ.३४. 'लिम्पति – वर्षतीत्याख्यातयोः कर्तृवाचकत्वेऽपि **'भावप्रधानमाख्यातम्'** इति स्मृतेर्धात्वर्थक्रियया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षणीयतया अन्यत्रान्वयासम्भवात्।'

वस्तुसान्द्रमलिनीकरणं व्यङ्ग्यम्। तच्च उत्प्रेक्षा जठरनिलीनं सत् वाच्यम् उपस्करोति। एवमेव **'वषतीवाञ्जनं नभः'** इत्युदाहर्तव्यम्।

१.३. सिद्धविषया हेतूत्प्रेक्षाह्लह्लह्ल

'रक्तौ तवांघ्रि मृदुलौ भुवि विक्षेपणाद्ध्रुवम्।।[१]

अहेतोः हेतुत्वेन उत्प्रेक्षणं यत्र तत्र हेतूत्प्रेक्षा। प्रकृते नायिकायाः पादसौकुमार्य-वर्णनपरे 'रक्तौ तवाङ्घ्री...' इत्यादिपद्ये मृदुलाङ्घ्रियुगलगतरक्तत्वं सहजम्, स्वतस्सिद्धञ्च। तस्य नायिकायाः भुवि पादविक्षेपणं न हेतुः तथापि 'भुवि विक्षेपणाद्ध्रुवम्' इति पादविक्षेपस्य हेतुत्वेन सम्भाव्यमानत्वात्, सम्भावनाविषयस्य विक्षेपणस्य सिद्धत्वाच्च सिद्धविषया हेतूत्प्रेक्षा। अत्र च नायिकापादसौकुमार्यातिशयरूपव्यङ्ग्यपरिपोषकत्वात् हेतूत्प्रेक्षायाः व्यङ्ग्यवस्तूप-स्कारकत्वम्।

१.४. असिद्धविषया हेतूत्प्रेक्षाह्लह्लह्ल

'त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।'[२]

अत्र 'वैरायते' इत्यस्य वैरं करोति इत्यर्थः। शशिगतं पद्मैस्सह वैरकरणमत्र विषयः। तच्च वैरकरणं स्वाभाविकम्। तत्र च कामिनीमुखकान्तीच्छा यद्यपि न हेतुः, तथापि हेतुत्वेन उत्प्रेक्षणात् कामिनीमुखाभेच्छारूपसम्भावनाविषयस्य असम्भवात् असिद्धविषया हेतूत्प्रेक्षा। अस्याः च हेतूत्प्रेक्षायाः कामिनीमुखसौन्दर्यातिशयध्वननेन विभावोपस्कारकत्वेन अलङ्कारत्वम्।

१.५. सिद्धविषया फलोत्प्रेक्षाह्लह्लह्ल

'मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः'[३]

यत्र अफलस्य फलत्वेन उत्प्रेक्षणं भवति, तत्र फलोत्प्रेक्षा। 'मध्यः किं कुचयोर्धृत्यै' इति पद्येह्लह्लह्ल किं कुचधारणाय मध्यः कनकदामत्वेन अध्यवसितवळीत्रयेण बद्धः ह्लह्लह्लइति सम्भावना क्रियते। अत्र च मध्यस्य वळीत्रयेण बन्धनं प्रति कुचधारणं न फलम्। यतो हि मध्यःस्वयमेव कुचौ धरति। एवञ्च मध्यकर्मकबन्धनं प्रति अफलस्यापि कुचधारणस्य फलत्वेन वर्णनात्, कुचधारणरूपसम्भावनाविषयस्य सिद्धतया सिद्धफलोत्प्रेक्षा। अस्याश्च फलोत्प्रेक्षायाः मध्यगतसौक्ष्म्यवळीत्रय-उन्नतकुचधारणादिविशिष्टविभावप्रकाशनमुखेन शृङ्गाररसोपस्कारकत्वम्।

---

१. कु.आ. पृ.३२ २. कु.आ. पृ.३२ ३. कु.आ. पृ.३३

१.६. असिद्धविषया फलोत्प्रेक्षाह्लह्लह्ल

'प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति'[१]

'प्रायोऽब्जम्'इत्यादौ पद्मशोभायमानकासारवर्णनपरे नायकवचने तपश्चरणात्मकत्वेन अध्यवसितम् अब्जस्य तोये अवस्थानं प्रति कामिनीपदैक्यावाप्तिः यद्यपि न फलम्, तथापि फलत्वेन उत्प्रेक्षणात् फलोत्प्रेक्षा। अत्र च कामिनीपदप्राप्तिरूपोत्प्रेक्षाविषयस्य अब्जनिष्ठतया असम्भवात्, असिद्धविषया फलोत्प्रेक्षा। नायकप्रेमप्रयुक्तश्रद्धातिशयस्य ध्वन्यमानत्वात्, तं प्रति प्रकृतोत्प्रेक्षायाः उपस्कारकत्वात् अलङ्कारता।

२. अतिशयोक्त्यलङ्कारः

अतिशयोक्तेः अष्टौ भेदाः चन्द्रालोके प्रदर्शिताः। ते च क्रमेणेत्थम् ह्लह्लह्ल

१. रूपकातिशयोक्तिः २. सापह्नवातिशयोक्तिः ३. भेदकातिशयोक्तिः
४. सम्बन्धातिशयोक्तिः ५. असम्बन्धातिशयोक्तिः ६. अक्रमातिशयोक्तिः
७. चपलातिशयोक्तिः ८. अत्यन्तातिशयोक्तिः

एषु रूपकातिशयोक्तौ, सापह्नवातिशयोक्तौ अध्यवसायमूलकत्वम्; अन्येषु प्रभेदेषु च विरोधमूलकत्वञ्च दृश्यते।

२.१. रूपकातिशयोक्तिः

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः।।[२]

यत्र निगीर्याध्यवसानं क्रियते तत्र रूपकातिशयोक्त्यलङ्कारः। तत्र निगीर्याध्यवसानम् इत्यत्र द्वौ भागौ स्तः। १. विषयनिगरणम् २. अध्यवसानम्। तत्र विषयनिगरणं नामह्लह्लह्ल 'विषयस्य स्वशब्देनोल्लेखनं विनापि विषयिवाचकेनैव शब्देन ग्रहणम्ह्लह्ल विषयनिगरणम्'[३] अध्यवसानं नाम **'तत्पूर्वकं विषयस्य विषयिरूपतयाध्यवसानम् आहार्यनिश्चयः'**[४] इति अप्पय्यदीक्षितेन व्याख्यायि। अतिशयोक्तिः इत्येव उच्यताम्, किमर्थं रूपकातिशयोक्तिः ? इति नामकरणं कृतमिति चेत्ह्लह्लह्ल यथा रूपके अभेदताद्रूप्याभ्यां द्वैविध्यं तथा अत्रापि अभेद-ताद्रूप्याभ्यां द्वैविध्यमिति प्रदर्शनाय रूपकातिशयोक्तिरिति नामकरणमिति अप्पय्यदीक्षितेनैव उक्तम्[५]।

---

१. कु.आ. पृ.३३ २. कु.आ. पृ.३९
३. कु.आ. पृ.३९ ४. कु.आ. पृ.३९ ५. कु.आ. पृ.४०

'पश्य नीलोत्पलद्वन्द्वात्...' इत्याद्युदाहरणे नायिका नेत्रयुगलात् कटाक्षाः निःसरन्ति इति वक्तव्ये तदनुक्त्वा नेत्रयुगलस्य विषयस्य नीलोत्पलद्वन्द्वत्वेन कटाक्षाणाञ्च शितशरत्वेन निगरणपूर्वकं क्रमेण नीलोत्पलद्वन्द्व-शितशरत्वेन अभेदाध्यवसानात् रूपकातिशयोक्त्यलङ्कारः। अत्र च नीलोत्पलद्वन्द्व-शितशरशब्दयोः क्रमेण नेत्रयुगल-कटाक्षरूपार्थयोः गौणसाध्यव-सानलक्षणायाः स्वीकारात्, गौणसाध्यवसानलक्षणास्थले च 'सर्वथैव अभेदावगमश्च प्रयोजनम्'[१] इति मम्मटाचार्योक्तेः सर्वथैव अभेदावगमः अत्र व्यङ्ग्यः। तदुपस्कारकत्वाच्च अत्र रूपकातिशयोक्तेरलङ्कारता।

२.२. सापह्नवातिशयोक्तिः ह्नह्नह्न

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता।
त्वत्सूक्तिषु सुधा राजन्! भ्रान्ताः पश्यन्ति तां विधौ।।[२]

यत्र निगीर्याध्यवसानात्मा अतिशयोक्तिरेव अपह्नुतिगर्भा भवति तर्हि सापह्नवाति-शयोक्तिः। **'त्वत्सूक्तिषु सुधा राजन् !...'** इत्याद्युदाहरणे **'भ्रान्ताः पश्यन्ति तां विधौ'** इति प्रतिपादनेन, 'विधौ सुधा न, अपि तु राज्ञः सूक्तिष्वेव सुधा' ह्नइति निषेधपुरस्सरं 'सूक्तिमाधुर्यमेव अमृतम्' ह्नइति निगीर्णविषये अभेदाध्यवसानस्य प्रतिपादनात् सापह्नवातिशयोक्तिः। अत्र च निषेधपूर्वकं निगीर्णविषये अन्यधर्मप्रतिपादनेन सर्वथैव अभेदप्रतिपत्तिः 'दृढा' व्यज्यते। तदुपस्कारकत्वाच्च अपह्नुतिगर्भातिशयोक्तेः अलङ्कारता।

२.३. भेदकातिशयोक्तिः

भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम्।
अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः।।[३]

यत्र तस्यैव अन्यत्ववर्णनं भवति अर्थात् अभेदेऽपि भेदः अध्यवसीयते तत्र भेदकातिशयोक्तिः अलङ्कारः। तत्र **'अन्यदेवास्य ...'** इति राजवर्णनपरे पद्ये राज्ञः गाम्भीर्य-धैर्ययोः लोकप्रसिद्धगाम्भीर्याद्यभेदेऽपि भेदः अध्यवसीयते इति भेदकातिशयो-क्त्यलङ्कारः। अत्र च राजगतगाम्भीर्यधैर्ययोः प्रसिद्धधैर्यगाम्भीर्यभेदस्य अध्यवसीयमानत्वात् राज्ञः लोकोत्तरत्वं ध्वन्यते। तदुपस्कारकत्वात् च भेदकातिशयोक्तेरलङ्कारता।

---

१. कु.आ. पृ.५२ २. कु.आ. पृ.४२ ३. कु.आ. पृ.४३

२.४. सम्बन्धातिशयोक्तिः

सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्।।[१]

यत्र कस्यचित् केनचित् असम्बन्धेऽपि सम्बन्धकल्पनं भवति तत्र सम्बन्धातिशयोक्तिः। यथा – **'सौधाग्राणि पुरस्यास्य ...'** इति पट्टणवर्णनपरे पद्ये नगरसौधाग्राणां चन्द्रमण्डलेन सम्बन्धाभावेऽपि सम्बन्धकल्पनात् सम्बन्धातिशयोक्तिः। अत्र च प्रासादौन्नत्यातिशयं ध्वन्यमानमर्थं प्रति सम्बन्धातिशयोक्तेः उपस्कारकता।

२.५. असम्बन्धातिशयोक्तिः

योगेऽप्ययोगोऽसम्बन्धातिशयोक्तिरितीर्यते।
त्वयि दातरि राजेन्द्र ! स्वर्द्रुमान्नाद्रियामहे।।[२]

यत्र योगेऽपि= सम्बन्धेऽपि अयोगः= असम्बन्धः प्रतिपाद्यते तत्र असम्बन्धातिशयोक्तिः। **त्वयि दातरि ! राजेन्द्र !...** इत्याद्युदाहरणे वर्णनीयराजगतदातृत्वातिशयाभिव्यक्तिपरे याचकानां जनानाम् अधिकाभिलाषपूरकत्वेन कल्पतरुसम्बन्धे सत्यपि राज्ञः दातृत्वातिशयेन 'स्वर्द्रुमान्नाद्रियामहे' इति वचनेन असम्बन्धस्य वर्णनात् असम्बन्धातिशयोक्तिः। तस्याश्च राजगतदातृत्वातिशयरूपव्यङ्ग्योपस्कारकत्वेन अङ्गत्वम्।

२.६. अक्रमातिशयोक्तिः

अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः।
आलिङ्गन्ति समं देव ! ज्यां शराश्च पराश्च ते।।[३]

कार्यकारणयोः मध्ङ्के 'कारणं पूर्वं कार्यं पश्चात्' इति लोकप्रसिद्धः क्रमः। किन्तु तं क्रममुल्लङ्घ्य कार्यकारणयोः सहत्वं सङ्क्षानकालत्वं वर्ण्यते चेत् अक्रमातिशयोक्तिः। यथाह्वह्व **'आलिङ्गन्ति समं देव...'** इत्युदाहरणे ज्यायाम् = मौर्यां शरसन्धानवेलायामेव, पराः = शत्रवः ज्याम् = भूमिम् आलिङ्गन्ति ह्वह्वइति वर्णनात् कारणस्य 'शर'कर्तृक'ज्या' कर्मकालिङ्गनस्य, कार्यस्य शत्रुकर्तृकभूमिकर्मकालिङ्गनस्य च एकवारमुपनिबन्धनात् अक्रमातिशयोक्त्यलङ्कारः। तस्याश्च ध्वन्यमानराजगतप्रतापातिशयोपस्कारकत्वेन अलङ्कारत्वम्।

१. कु.आ. पृ.४४ २. कु.आ. पृ.४४ ३. कु.आ. पृ.४५

२.७. चपलातिशयोक्तिः

चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे।
यास्यामीत्युदिते तन्व्या वलयोऽभवदूर्मिका।।[1]

यत्र हेतुप्रसक्तिमात्रेण कार्यस्य निर्वृत्तिः वर्ण्यते तत्र चपलातिशयोक्तिरलङ्कारः। यथाह्नह्न'**यस्यामीत्युदिते...**' इत्यादिविप्रलम्भशृङ्गारप्रकाशके कवेर्वचने तन्व्याः नायक-प्रवासप्रसक्तिमात्रेण ऊर्मिकायाः वलयीभवनस्य वर्णनात् हेतुप्रसक्तिमात्रेण कार्यनिष्पत्तिलक्षणः चपलातिशयोक्त्यलङ्कारः। तस्य च विप्रलम्भशृङ्गारपरिपोषकत्वम्।

२.८. अत्यन्तातिशयोक्तिः

अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे।
अग्रे मानो गतः पश्चादनुनीता प्रियेण सा।।[2]

लोके पुष्पं पूर्वम्, फलं ततः ह्नइति प्रसिद्धः क्रमः। तथा प्रसिद्धस्य क्रमस्य पूर्वमेव फलम्, पश्चात् पुष्पम् ह्नह्नइत्येवं कार्यकारणपौर्वापर्यव्यतिक्रमे अत्यन्तातिशयोक्तिः। यथा '**अग्रे मानो गतः पश्चात्...**' इत्याद्युदाहरणे अमर्षाख्यभावप्रशमवर्णनपरे 'प्रथमतः नायिकायाः कोपः गतः पश्चात् प्रियेण साऽनुनीता' इति कार्यकारणयोः पौर्वापर्यव्यति-क्रमलक्षणायाः अतिशयोक्तेः वाच्यामर्षाख्यभावप्रशमोपस्कारकत्वेनालङ्कारता।

एवमध्यवसायमूलकावलङ्कारौ निरूपितौ।

।। समाप्तोऽयं प्रथमोऽध्यायः।।

१. कु.आ. पृ.४५
२. कु.आ. पृ.४६

।। श्रीः।।

द्वितीयोऽध्यायः

I. घ. सादृश्यगर्भेषु गम्यौपम्याश्रयालङ्काराः

गम्यौपम्याश्रयेषु अलङ्कारेषु प्राक् तुल्ययोगितादयः आक्षेपान्ताः १७ अलङ्काराः भोलाशङ्करव्यासोक्तसूचिका प्रदर्शिता दर्शिताः। अन्ये चह्नह्न १. आवृत्तिदीपकम् २.प्रस्तुताङ्कुरः ३. व्याजनिन्दा ४. विकस्वरः ५. ललितम् इति पञ्च अलङ्काराः अपि परिशीलनया गम्यौपम्याश्रयाः दृश्यन्ते। तेषामलङ्काराणां दीपक-प्रतिवस्तूपमा मध्ये आवृत्तिदीपकं व्याख्यायते। अप्रस्तुतप्रशंसानन्तरं प्रस्तुताङ्कुरः, ततः पर्यायोक्तम्, व्याजस्तुतिः, व्याज-स्तुत्यनन्तरं व्याजनिन्दा, ततः आक्षेपानन्तरम् अर्थान्तरन्यासः ततो विकस्वरः, ततः ललितम्ह्नइत्यनेन क्रमेण अस्मिन् वर्गे गम्यौपम्याश्रयाः १७+५=२२ अलङ्काराः व्याख्यायन्ते।

१. तुल्ययोगितालङ्कारः

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता।
सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च।।[1]

त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।
मालती शशभृल्लेखाकदलीनां कठोरता।।[2]

उपमालङ्कारे औपम्यम् (सादृश्यम्) वाच्यम्। तुल्ययोगिताद्यलङ्कारेषु तु औपम्यं गम्यम्। तद्गमकं साधर्म्यञ्चात्र निबध्यते। तत्र द्वयोः उपमानोपमेयभावमापन्नयोः साधर्म्यनिबन्धे दीपकालङ्कारः इति वक्ष्यते। केवलं वर्ण्ययोर्मध्ये अथवा अवर्ण्यानां मध्ये साधर्म्यं निबध्यते चेत्, तुल्ययोगितालङ्कारः। उपमालङ्कारे सादृश्यं चमत्कारि। तुल्ययोगितायां (तत्सदृशेषु कतिपयालङ्कारेषु वा) वाच्यं साधर्म्यं चमत्कारि।

---

१. कु.आ. पृ.४७
२. कु.आ. पृ.४८

१.१. वर्ण्यानां धर्मैक्यनिबन्धनात्मा तुल्ययोगिता

यथाह्ळह्ळह्ळ **'सङ्कुचन्ति सरोजानि...'** इत्यादौ चन्द्रोदयवर्णनपरे श्लोकार्धे सरोजानां स्वाभाव्येन, स्वैरिणीवदनानाञ्च चन्द्रोदयेन च, स्वेच्छासञ्चारप्रतिबन्धात् सङ्कोचरूपस्य धर्मैक्यस्य वर्णनात्, तत्रापि सरोज-स्वैरिणीवदनयोः चन्द्रोदयसन्दर्भे वर्ण्यत्वेन च वर्ण्यानां धर्मैक्यनिबन्धनात्मकतुल्ययोगितालङ्कारः।

१.२. अवर्ण्यानां धर्मैक्यनिबन्धनात्मा तुल्ययोगिता

२. **'त्वदङ्गमार्दवे दृष्टे ... '** इति द्वितीयोदाहरणे नायिकावर्णनपरे, नायिका दृष्ट्या तदुपमानभूतानां मालतीशशभृल्लेखाकदलीनामप्रकृतत्वात्, तेषाञ्च मध्ये कठोरतारूप-धर्मैक्यस्य नायिकायाः सौकुमार्यातिशयोपपादनाय वर्णनात्, अवर्ण्यानां धर्मैक्यनिबन्धात्मकः तुल्ययोगितालङ्कारः।

प्रथमोदाहरणे सरोजानां स्वैरिणीवदनानाञ्च मध्ये सङ्कोचरूपधर्मैक्यवर्णनेन तयोः सादृश्यं व्यज्यते। तच्च सादृश्यं सङ्कोचरूपसमानधर्मस्योपस्कारकं भवति। एवञ्च (व्यङ्ग्य)सादृश्योपस्कार्यं वर्ण्यसरोजस्वैरिणीवदनसम्बन्धिसङ्कोचरूपसाधर्म्यमिति बोधः तुल्ययोगितास्थले जायते। एवं द्वितीयोदाहरणे अवर्ण्यमालती-शशभृल्लेखा-कदली-सम्बन्धिकठोरतायां (साधर्म्ये) व्यङ्ग्यसादृश्यस्योपस्कार्यत्वस्य सत्त्वात्, तत्रापि वाच्यसिद्ध्यङ्ग-रूपगुणीभूतव्यङ्ग्यत्वम्।

१.३. हिताहिततुल्यवर्तनात्मा तुल्यायोगिता

हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।
प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया।।[१]

अत्र **'प्रदीयते पराभूतिः ...'** इति तृतीयतुल्ययोगितोदाहरणे मित्रशत्रुरूपयोः हित-अहितयोः राज्ञा पराभूतिदानेन, हिताहितयोः तुल्यवर्तनात्मा तुल्ययोगितालङ्कारः। अत्र च उदाहरणे 'पराभूतिः' इत्यस्य मित्रपक्षेह्ळह्ळ परा = **उत्कृष्टा**, भूतिः = **सम्पत्** इत्यर्थः, शत्रुपक्षे चह्ळह्ळ 'पराभूतिः' इति एकपदत्वेन स्वीकारात् **पराभवः** इत्यर्थः। एवञ्चात्र मित्रशात्रवयोः पराभूतिदानात्मकतुल्यवर्तनं श्लेषमहिम्ना वर्णितम्। श्लेषसहकारेण विषयवर्णनासन्दर्भे प्रायशः

१. कु.आ. पृ.४९

वक्तृवैदग्ध्यस्यैव ध्वन्यमानत्वात् तादृशध्वनिं प्रति वृत्तितौल्यात्मनः तुल्ययोगितालङ्कारस्य उपस्कारकता।

१.४. गुणोत्कृष्टैः समीकृत्य प्रतिपादनात्मा तुल्ययोगिता

गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि।।[1]

गुणोत्कृष्टैः समीकृत्य वचनम् अन्या तुल्ययोगिता। **लोकपालः** इत्यादिह्नह्नह्न चतुर्थतुल्ययोगितोदाहरणे यम-पाशि-श्रीद-शक्रात्मकैः निग्रहानुग्रहसमर्थत्वेन गुणोत्कृष्टैः वर्णनीयस्य राज्ञः लोकपालत्वेन समीकृत्य (=असमं समं कृत्वा) कथनात् गुणोत्कृष्टैः समीकृत्य कथनात्मा तुल्ययोगिता। अत्र च समीकृत्य प्रतिपादनौपयिकं लोकपालत्वरूपं साधर्म्यम्। तेन च यमादीनां वर्णनीयराज्ञश्च सादृश्यं व्यज्यते। तच्च लोकपालत्वरूपवाच्य-साधर्म्यस्योपस्कारकम्। अयमेव समीकृत्य कथनात्मा तुल्ययोगितालङ्कारः, **'सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये'**[2] इति कथयता जयदेवेन चन्द्रालोके सिद्ध्य-लङ्कारत्वेन प्रतिपादित इति कुवलयानन्देन अप्पय्यदीक्षितेन व्याख्यायि।

२. दीपकालङ्कारः

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।
मदेन भाति कलभः प्रतापेन महीपतिः।।[3]

दीप इव दीपकम्। 'संज्ञायां च (वा.२४५८)' इति वार्तिकेन इवार्थे कन् प्रत्यये दीपसदृशः इत्यर्थः आयाति। यत्र उपमानस्य उपमेयस्य च मध्ये साधारणधर्मैक्यं वर्ण्यते तत्र दीपकालङ्कारः। **'मदेन भाति कलभः...'** इति प्रसिद्धोदाहरणे वर्ण्यावर्ण्ययोः महीपति-कलभयोर्मध्ये मदप्रयुक्तभानाभिन्नप्रतापप्रयुक्तभानरूपस्य धर्मैक्यस्य वर्णनात्, तस्य च धर्मस्य देहली दत्तदीपन्यायेन रथ्याप्रासादयोः युगपदुपकारिदीपन्यायेन वा वर्ण्यावर्ण्ययोः महीपतिकलभयोः युगपदुपकारिकत्वात् दीपकालङ्कारता। अत्र च वाच्य धर्म्यैक्येन व्यङ्ग्यं सादृश्यं पूर्ववत् उपस्कार्यम्।

---

१. कु.आ. पृ.५१
२. चं.आ.श.पृ.७२
३. कु.आ. पृ.५१

३. आवृत्तिदीपकम्

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम्।
वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी।।[१]

उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः।।[२]

दीपवत् प्रकाशमानस्य साधारणधर्मस्य शब्दतः अर्थतः उभयतो वा आवृत्तौ आवृत्ति-दीपकालङ्कारः। अत एव आवृत्तिदीपकालङ्कारः त्रिविधः।

१. **'वर्षत्यम्बुदमालेयम्'** इति प्रथमोदाहरणे वर्षर्तुवर्णनपरे, अम्बुदमाला वर्षति = वर्षं करोति, शर्वरी = रात्रिः, वर्षति = वर्ष इव, संवत्सर इव आचरति इति श्लेषमहिम्ना वर्षरूपधर्मैक्यस्य वर्णनात्, तत्र च **'वर्षति'** इति शब्दमुखेन एव तादृशसाधर्म्यस्य प्रतिपादनात्, शब्दतः एव साधर्म्यनिबन्धनात्मा आवृत्तिदीपकालङ्कारः। वर्षाकालरात्रीणां संवत्सरवत् आचरणं विरहिलोकप्रसिद्धमेव।

२. **'उन्मीलन्ति कदम्बानि...'** इति द्वितीयोदाहरणेऽपि वर्षर्तुवर्णनपरे **'उन्मीलन्ति स्फुटन्ति'** इति भिन्नशब्दाभ्यां विकासरूपधर्मक्यैस्य अर्थतः आवृत्तस्य साधारणधर्मस्य कदम्बकुटजोद्गमयोर्मध्ये वर्णनात् अर्थावृत्तिदीपकालङ्कारः।

३. **'माद्यन्ति चातकाः ...'** इत्यादिग्रीष्मर्तुवर्णनपरे तृतीयोदाहरणे, वर्ण्ययोः शिखावलयोः **'माद्यन्ति', 'माद्यन्ति'** द्विरावृत्तशब्देन मदरूपार्थतश्च इति उभयधाऽपि धर्मैक्यस्य आवृत्तत्वात् उभयावृत्तिदीपकालङ्कारः। अत्र च आवृत्तिदीपके प्रथमोदाहरणे शर्वरी-अम्बुदमालयोः, द्वितीयोदाहरणे कदम्ब-कुटजोद्गमयोश्च वर्षर्तुप्रस्तावनानुसारेण वर्ण्यत्वात्, तृतीयोदाहरणे चातकशिखावलयोः ग्रीष्मर्तुप्रस्तावानुसारेण वर्ण्यत्वात्। केवलं वर्ण्ययोरेव धर्मैक्योपनिबन्धात् परमार्थतः अयं तुल्ययोगितालङ्कारः इति वक्तव्यम्, तथापि साधारणधर्मोपनिबन्धप्रक्रियायां दीपकच्छायायाः आवृत्तिदीपकालङ्कारः[३]। अत्रापि साधर्म्यव्यङ्ग्यसादृश्यस्य साधर्म्योप-स्कारकत्वम् अवसेयम्।

---

१. कु.आ. पृ.५३

२. कु.आ. पृ.५४

३. कु.आ.पृ.५४. 'एवं चावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वाभावेऽपि दीपकच्चायापत्तिमात्रेण दीपकव्यपदेशः।'

४. प्रतिवस्तूपमालङ्कारः

धर्मैक्यनिबन्धे तुल्ययोगिता-दीपक-आवृत्तिदीपकाख्यास्त्रयोऽलङ्काराः निरूपिताः। अथ वस्तुप्रतिवस्तुभावात्मना धर्मोपनिबन्धात्मा प्रतिवस्तूपमालङ्कारो निरूप्यते। वस्तुप्रतिवस्तुभावो नाम 'एकस्यैव धर्मस्य सम्बन्धिभेदेन द्विरुपादानम्'[१]।

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता।
तापेन भ्राजते सूरः शूरश्चापेन राजते।।[२]

यत्र द्वयोरपि वाक्ययोः एक एव समानः धर्मः पृथक् निर्दिश्यते तत्र प्रतिवस्तूपमा-लङ्कारः। यथाह्वह्व **'तापेन भ्राजते ...'** इत्यादिराजवर्णनपरे लक्ष्येह्वह्वह्व राजनात्मकस्य एकस्यैव धर्मस्य वाक्यद्वये सम्बन्धिभेदानुसारेण पृथक् **'भ्राजते सूरः'** इति, **'शूरः राजते'** इति निर्देशात् प्रतिवस्तूपमालङ्कारः। अत्र धर्मः एक एव, शब्दौ तु सम्बन्धिभेदेन भिन्नौ। एतादृशधर्मेण च अभिव्यङ्ग्यं सादृश्यं वाच्यवस्तुप्रतिवस्तुभावभङ्गिम्ना निर्दिष्टस्य साधारण-धर्मस्योपस्कारकम्।

५. दृष्टान्तालङ्कारः

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।
त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान्।।[३]

यत्र उपमानोपमेयवाक्ययोः बिम्बप्रतिबिम्बभावेन भिन्नावेव धर्मौ निर्दिष्टौ तत्र दृष्टान्तालङ्कारः। प्रतिवस्तूपमालङ्कारे उपमानोपमेययोः धर्मैक्यं स्वतः अस्ति। परन्तु सम्बन्धिभेदेन पृथक् उपादानम्। दृष्टान्तालङ्कारे तु चन्द्र-राजादिरूपोपमानोपमेययोः स्वतः धर्मैक्यं नास्ति। किन्तु उपमानविशेषणयोः उपमेयविशेषणयोश्च धर्मैक्येन उपमानोपमेययोः धर्मैक्यसिद्धिः। यथाह्वह्वह्व **'त्वमेव कीर्तिमान् राजन् ! ...'** इति दृष्टान्तोदाहरणे विधुसम्बन्धिकान्तिरूपस्य उपमानधर्मस्य प्रतिबिम्बस्य, राजसम्बन्धिकीर्त्यात्मकस्य उपमेयधर्मस्य बिम्बस्य च स्वच्छत्वरूपधर्मसाम्येन, उपमेयत्व-उपमानत्वाभिमतयोः राजचन्द्रयोः कान्तिमत्त्वाभिन्नकीर्तिमत्त्वरूपधर्मः बिम्बप्रतिबिम्बभावेन निष्पन्नः।

ततश्च राज्ञः चन्द्रेण औपम्यस्य गम्यत्वम्। गम्यस्य च औपम्यस्य वाच्यबिम्बप्रति-बिम्बभावापन्नधर्मोपस्कारकत्वात्, दृष्टान्ते व्यङ्ग्यस्य वाच्योपस्कारकत्वम्।

---

१. का.प्र. (झल्कीकर) पृ.६३३. 'प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।'
२. कु.आ. पृ.५५
३. कु.आ. पृ.५७

६. निदर्शनालङ्कारः

पूर्वं साधर्म्यजीवातवः तुल्ययोगिता-दीपक-आवृत्तिदीपकाख्याः त्रयोऽलङ्काराः न्यरूपिषत। तदनु वस्तुप्रतिवस्तुभावात्मना उपनिबद्धसाधर्म्यात्मकप्रतिवस्तूपमालङ्कारः विवेचितः। पश्चाच्च बिम्बप्रतिबिम्बभावापन्नधर्मं पुरस्कृत्य उपमानोपमेययोः धर्मवर्णनात्मा दृष्टान्तालङ्कारश्चापि निरूपितः। तेषु सर्वेऽष्वपि **सादृश्यं व्यङ्ग्यमि**ति अज्ञासिष्म। इदानीङ्क उपमानोपमेयवाक्यार्थयोः ऐक्यारोपात् गम्यसादृश्यशाली निदर्शनालङ्कारः व्याख्यातुमिष्यते। लोके प्रत्याख्यातपथ्याय रुग्णाय भिषजा उपदिष्टं मरणभयं पथ्यसेवने यथा उत्प्रेरयति, तथा द्वयोः वाक्यार्थयोः ऐक्यस्य अभावेऽपि उपदिष्टः ऐक्यारोपः अन्ततः तयोः सादृश्यं अभिव्यञ्जयति। ऐक्यासिद्धौ कनीयसापक्षेण सादृश्याभिव्यञ्जनस्य न्याय्यत्वात्। एवञ्च सदृशयोः वाक्यार्थयोः ऐक्यारोपः एव (ऐक्यस्य आरोप एव न वास्तवम् ऐक्यम्) निदर्शना इति लक्षणम्। उक्तञ्च कुवलयानन्दे ह्नह्नह्न

६.१. वाक्यार्थवृत्तिनिदर्शना

वाक्यार्थयोः सदृशयोः ऐक्यारोपो निदर्शना।
यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता।।[१]

अत्र चह्नह्नह्न दातृपुरुषसम्बन्धिसौम्यतायां पूर्णचन्द्रसम्बन्ध्यकलङ्कतायाः आरोप्यमाणत्वात् एकस्य वाक्यार्थस्य अन्यस्मिन् वाक्यार्थे समारोपात् लक्षणसमन्वयः।

अत्र यद्यपि दातुः सौम्यता = साधुस्वभावः भावपदार्थः। पूर्णेन्दोः अलङ्कता= कलङ्कराहित्यं तु अभावपदार्थः। अतः भावाभावात्मकयोः सौम्यता अकलङ्कतयोः ऐक्यम् न सम्भवति। तथापि ऐक्यारोप्यते केवलम्। **'दातुः सौम्यता पूर्णेन्दोः अकलङ्कता'** इति कथनेनापि ऐक्यारोपः सिद्ध्यति। तथापि **'यद्दातुः ... सेयम्'** इति कथनम् ऐक्यारोप-स्पष्टीकरणार्थम्। यद्यपि सादृश्यप्रयोजकीभूतसाधारणधर्मः साक्षान्नास्ति, तथापि सौम्यतारूप-धर्मिविशेषणस्य दातृरूपस्य उपमेयधर्मस्य बिम्बस्य, अकलङ्कतारूपधर्मिविशेषणीभूतस्य पूर्णेन्दुरूपस्य उपमानधर्मस्य प्रतिबिम्बस्य च स्वतः आह्लादकारित्वरूपधर्मं पुरस्कृय अभेदः वक्तुं शक्यते। ततश्च पूर्णचन्द्राभिन्नदातृरूपबिम्बप्रतिबिम्बभावापन्नधर्मे सम्पादिते, उपमानत्व-उपमेयत्वाभिमतयोः अकलङ्कता-सौम्यतयोः अभेदः आरोपितः सिद्ध्यति। एवञ्च वाक्यार्थे वाक्यार्थान्तरस्य आरोपात् वाक्यार्थवृत्तिनिदर्शनालङ्कारः।

---

१. कु.आ. पृ.५९

६.२. पदार्थवृत्तिनिदर्शना

पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम्।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः।।[१]

उपमानोपमेययोः अन्यतरस्मिन् अन्यतरधर्मारोपे पदार्थवृत्तिनिदर्शना। **'त्वन्नेत्रयुगलं धत्ते...'** इत्याद्युदाहरणे कामिनीनेत्रयुगलरूपे उपमेये नीलकुवलयलीलारूपस्य उपमानवृत्तिधर्मस्य आरोपात् इयं पदार्थवृत्तिनिदर्शना। **'इयं पदार्थवृत्तिनिदर्शनैव जयदेवेन ललितोपमेति व्याहृता'**[२] इति अप्पय्यदीक्षितेनापि उक्तम्। अप्पय्यदीक्षितमतानुसारेण वाक्यार्थवृत्तिनिदर्शनायां बिम्बप्रतिबिम्बभावस्य अवश्यमङ्गत्वमस्ति। **'वाक्यार्थयोः सदृशयोः'** इति लक्षणवाक्ये वाक्यार्थशब्देन बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टस्वरूपयोः प्रस्तुताप्रस्तुतधर्मयोः विवक्षितत्वात्'[३] एवं वाक्यार्थवृत्तिनिदर्शनायाः लक्षणानङ्गीकारेह्नह्नह्न

राजसेवा मनुष्याणाम् असिधारावलेहनम्।
पञ्चाननपरिष्वङ्गः व्यालीवदनचुम्बनम्।।[४]

इत्याद्युदाहरणे राजसेवारूपे पदार्थे असिधारावलेहनाद्युपमानधर्माणां समारोपेण पदार्थवृत्तिनिदर्शनापत्तिः। पूर्वोक्तरीत्या बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टस्वरूपयोः इत्यादिरीत्या वाक्यार्थवृत्तिनिदर्शनालक्षणस्वीकारे तु बिम्बभावापन्नराजविशिष्टसेवारूपे विषये असिधारात्मकप्रतिबिम्बभावापन्नलेहनात्मकविषयिणः अभेदस्य वर्णनात् तत्र वाक्यार्थवृत्तिनिदर्शना एव इति विनिगन्तुं शक्यते।

न च वाक्यार्थवृत्तिनिदर्शनायां बिम्बविशिष्टप्रतिबिम्बविशिष्टाभेदस्य अभ्युपगमे **'ज्योत्स्नाभस्मच्छुरणधवला विभ्रती तारकास्थीनि'** इति सावयवरूपकोदाहरणेऽपि ज्योत्स्नात्मकबिम्बविशिष्टायां रात्रौ भस्मात्मकप्रतिबिम्बविशिष्टायाः कापालिकायाः अभेदस्य वर्णनात् निदर्शनालङ्कारलक्षणस्यातिप्रसङ्ग इति वाच्यम्। तत्रापि रूपके अवयवानाम् अवयवेष्वेव ऐक्यारोपात्, विशिष्टस्य विशिष्टे ऐक्यारोपाभावेन सावयवरूपके वाक्यार्थवृत्तिनिदर्शनालक्षणाप्रसक्तेः।

---

१. कु.आ. पृ.५९
२. (अ) कु.आ. पृ.६० (आ) चं.आ.श.पृ.९६ 'उपमाने तु लीलादिपदाढ्ये ललितोपमा'
३. कु.आ. पृ.६१ ४. कु.आ. पृ.६१

एवञ्च दीक्षितमतानुसारेण बिम्बभावापन्नधर्मविशिष्टे प्रतिबिम्बभावापन्नधर्मविशिष्टस्य ऐक्यारोपः वाक्यार्थवृत्तिनिदर्शनेति, तद्भिना केवलम् उपमानोपमेययोः अन्यतरस्मिन् अन्यतरधर्मारोपे पदार्थवृत्तिनिदर्शना इति च सिद्धम्[1]।

६.३. सदसदर्थबोधनात्मिका निदर्शना

अपरां बोधनं प्राहुः क्रिययाऽसत्सदर्थयोः।
नश्चेद्राजविरोधीति क्षीणं चन्द्रोदये तमः।।

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्।
विभावयन् समृद्धीनां फलं सुहृदनुग्रहः।।[2]

यत्र किञ्चिन्निष्ठक्रियया असदर्थस्य सदर्थस्य वा बोधनं भवति तत्र अपरा निदर्शना। तत्र असदर्थो नाम अभावरूपः अर्थः न तु गगनकमलिनीवत् तुच्छः। **'नश्येद्राजविरोधीति ...'** प्रथमोदाहरणे चन्द्रोदये क्षीयमाणं तमः राजविरोधी नश्येदिति राजविरोधिनः नाशरूपस्य असतः अभावात्मकस्यार्थस्य उपदेशात्, नाम **'राजविरोधी चन्द्रविरोधी नश्येत्'** इति, श्लेषवशात् **'प्रभुविरोधी नश्येत्'** इति नाशरूपस्य असदर्थस्य बोधनात् असदर्थबोध-नात्मकनिदर्शनालङ्कारः।

२. 'उदयन्नेव सविता ...' इत्यादिद्वितीयबोधननिदर्शनोदाहरणे तु **'समृद्धीनां फलं सुहृदनुग्रहः'** इति भावयन्, 'उदयन्नेव सूर्यः पद्मेषु श्रियमर्पयति' ह्नह्नह्नइति वर्णनात्, **'स्वोदयकाले अवस्थितानां समृद्धीनां सुहृदनुग्रह एव फलम्'** इति सतः अर्थस्य सूर्यनिष्ठपद्माधिकरणकशोभाधानक्रियया बोधनात् **सदर्थनिबन्धनात्मकः निदर्शनालङ्कारः**।

समीक्षा – वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमपि असम्भवद्वस्तु निबन्धनम्। तृतीया सदसद्बोधनात्मिका निदर्शना तु सम्भवद्वस्तु निबन्धनैव। तथा हि वाक्यार्थनिदर्शनायां वाक्यार्थयोः उक्तमैक्यम् असम्भवत् तयोः साम्ये पर्यवश्यति। एवं पदार्थवृत्तिनिदर्शनायामपि अन्यधर्मः अन्यत्र असम्भवन् धर्मिणोः साम्यम् अभिव्यञ्जयति[3]। सदसदर्थनिबन्धनायां तृतीयनिदर्शनायान्तु परान् प्रति स्वक्रियया सतः असतो वा अर्थस्य बोधनस्य सम्भवादेव बोध्यमानसदसदर्थयोः स्वस्वनिष्ठक्रियायाश्च साम्यं व्यज्यते। व्यक्तसाम्येन च धर्मिणोः उपस्क्रियमाणत्वात् निदर्शनायामपि सर्वत्र व्यङ्ग्यं वाच्योपस्कारकमेव। वाक्यार्थवृत्तिनिदर्शनायां वाच्ययोः धर्मिणोः

१. कु.आ. पृ.६१–६३ २. कु.आ. पृ.६३ ३. कु.आ. पृ.६४

बिम्बप्रतिबिम्बभावविशिष्टत्वात् तत्र व्यज्यमानं साम्यं धर्मिणौ उपस्कुरुते। पदार्थवृत्ति-निदर्शनायान्तु नीलाम्बुजगतलीलायाः नेत्रयुगले असम्भवात् तत्सदृशलीलां धत्ते इति वाक्यार्थोपपादकत्वं व्यङ्ग्यस्य सादृश्यस्य। एवञ्च सर्वविधायामपि निदर्शनायां व्यज्यमानसादृश्यस्य वाच्याङ्गत्वमेव न प्राधान्यम् इति शम्।

७. व्यतिरेकालङ्कारः

व्यतिरेको विशेषश्चेदुपमानोपमेययोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः।।[१]

यत्र उपमानोपमेययोः विशेषः वर्ण्यते, तत्र व्यतिरेकालङ्कारः। विशेषवर्णनञ्च साम्यवर्णनपूर्वकम्। तच्च साम्यवर्णनं क्वचित् वाच्यं भवति, यथा ह्नह्न **'शैला इवोन्नताः सन्तः ...'** इत्यादौ। यथा वा **'रक्तस्त्वं नवपल्लवैः ..., सर्वं तुल्यमशोक ! केवलमहं धात्रा स शोकः कृतः'**[२] इत्यादौ च। क्वचित् साम्यं व्यङ्ग्यं भवति, यथा ह्नह्न **'पल्लवतः कल्पतरोः ...'** इत्यादिपद्ये। प्रकृते ह्नह्न **'शैला इवोन्नताः सन्तः ...'** इत्याद्युदाहरणे सत्पुरुषाणां शैलैस्सहसाम्यं वर्णयित्वा प्रकृतिकोमलत्वरूपविशेषः वर्ण्यत इति व्यतिरेकालङ्कारः। अत्र च सत्पुरुषाः (प्रकृतिकोमलत्वात्) शैलेभ्यः अधिकाः इति व्यङ्ग्यः अर्थः। तदुपपादकश्च **'किन्तु प्रकृतिकोमला'** इति वाच्यो व्यतिरेकः। अतः अत्र आधिक्यध्वनिः। सादृश्यस्य वाच्यत्वात्, एतादृशव्यतिरेकस्य गम्यौपम्यमूलकेषु स्थानं नास्ति।

पल्लवतः कल्पतरोः एष विशेषः करस्य ते वीर!
भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते।[३]

इति कुवलयानन्दव्यतिरेकोदाहरणे तु कल्पतरुपल्लव-राजकररूपयोः उपमानोपमेययोः मध्ये कल्पतरुपल्लवात्मकस्य उपमानस्य केवलकर्णभूषकत्वेन, राजकरात्मकस्य उपमेयस्य तु सुप्रसिद्धदातृ **'कर्ण'** तिरस्कारकारित्वेन वैलक्षण्यवर्णनात् अत्र यद्यपि व्यतिरेकालङ्कारः, तथापि अत्र साम्यं न शब्दवाच्यम् अपि तु गम्यम्। व्यज्यमानस्य च साम्यस्य वाच्य-विशेषणोपपादनहेतुभूतसालक्षण्यो (=साधम्र्यो) पस्कारकत्वात् अस्मिन्नुदाहरणे व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गत्वम्। सादृश्यस्य शैला इवोन्नताः इत्याद्युदाहरण इव वाच्यतया अनुक्तत्वात्।

१. कु.आ. पृ.६५ २. कु.आ. पृ.६५ ३. कु.आ. पृ.६५

८. सहोक्त्यलङ्कारः

सहोक्तिः सहभावश्चेत् भासते जनरञ्जनः।
दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह।।[१]

यत्र जनरञ्जकः सहभावः साहित्यम्= एकक्रियान्वयित्वं वर्ण्यते, तत्र सहोक्त्यलङ्कारः। यथा **दिगन्तमगमत्तस्य** इत्यादिवर्णनीयराजप्रभावातिशयपरे लक्ष्ये, राज्ञः कीर्तेः गमनक्रियायां साक्षादन्वयः = शब्दतः अन्वयः। **शत्रुभिः** इति तृतीयान्तस्य तु सहार्थद्वारा गमनक्रिया-यामन्वयः आर्थ एव, न शाब्दः। एवञ्च प्रत्यर्थिनः यावद्दूरं गताः तावद्दूरं कीर्तिरपि गता इति भावार्थः। कीर्तेः गमनक्रियया बाष्पयन्त्रसन्निहितजनावासपेटिकाया इव साक्षात्, प्रत्यर्थिनां तु तादृशपेटिकासंलग्नपेटिकायाः बाष्पयन्त्रेणेव परम्परया सम्बन्धः।

एवं गमनरूपैकक्रियायां साक्षात् परम्परया वा अन्वीयमानयोः कीर्तिप्रत्यर्थिनोः तावद्दूरव्याप्त्या सादृश्यमपि सिद्ध्यति। तच्च सादृश्यं वाच्यस्य एकक्रियान्वयित्वस्य उपस्कारकं भवतीति इयमपि गम्यौपम्यमूला।

९. विनोक्त्यलङ्कारः

विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते।
विद्या हृद्यापि साऽवद्या विना विनयसम्पदम्।।[२]

यत्र किञ्चित् विना प्रस्तुतं हीनमुच्यते = प्रतिपाद्यते तत्र विनोक्त्यलङ्कारः। यथाह्नह्नह्न **'विद्या हृद्यापि साऽवद्या ...'** इति पद्ये विनयसम्पदं विना हृद्यापि विद्या अवद्या = गर्हणीया इति वाक्यार्थे स्थिते, अर्थात् **'विनयसम्पद्विहीना विद्या निन्द्या'** इति वाच्यार्थे स्थिते, **'विनयसम्पदा समुपेता विद्या श्लाघनीया'** इति वाक्यार्थानन्तरं व्यञ्जनया प्रतीयते। तत्र व्यङ्ग्यविनयशालिविद्यायाः वाच्यविनयविहीनविद्यायाश्च वैधर्म्येण उपमानोपमेयभवः अपि व्यज्यते। ततश्च वैधर्म्येण प्रतीतस्य साम्यस्य **'विनयसम्पदं विना विद्या गर्ह्या'** इति विनोक्त्यात्मकवाक्यार्थं प्रति उपस्कारकत्वात् विनोक्तेरलङ्कारता। न चात्र शब्दशक्तिमूलध्वनौ प्रतीतायाः उपमाया इव ध्वनित्वमिति शङ्क्यम्। विनयसम्पत् समन्वितविद्यायाः प्रकृतविनयविहीनविद्यायां वैधर्म्येण साधर्म्यनिरूपण एव कवेस्तात्पर्यात्, अन्यत्र विद्यमानायाः सद्विद्यायाः स्तुतेरपेक्षया अत्र विद्यमानायाः असद्विद्यायाः निन्दितत्वावगम एव कवेस्तात्पर्यात्।

१. कु.आ. पृ.६६ २. कु.आ. पृ.६७

तच्चेत्किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते।
विना खलैर्विभात्येषा राजेन्द्र ! भवतः सभा।।[1]

'तत्किञ्चित् विना अस्ति चेत् एतद्रम्यम्' = सुन्दरं मनोहरं भवतिह्न इति कथ्यते चेत् सापि विनोक्तिः। एषा तु विनोक्तिः गुणवर्णनात्मिका, पूर्वन्तु दोषवर्णनात्मिका। यथाह्न **'विना खलैर्विभात्येषा ...'** इत्यादिलक्ष्ये वर्णनीयराजसभायाः खलैर्विना शोभायाः वर्ण्यमानत्वात् गुणकथनात्मिका विनोक्तिः। अत्रापि **'खलैर्विना एषा राजसभा शोभते'** इति वाक्यार्थे वर्ण्यमाने, **'एषा राजसभा तु खलवती न शोभते'** इति अन्यः वाक्यार्थः प्रतीयते तत्र खलवद्राजसभायाः खलशून्यराजसभया वैधर्म्येण सादृश्यं वर्ण्यते। इति यद्यपि सादृश्यं व्यङ्ग्यम्, तथापि **'एषा खलवती राजसभा न शोभते'** इति व्यङ्ग्यस्य अरुन्तुदत्वात्, असुन्दरत्वेन व्यङ्ग्यस्य नास्ति अधिकतया वाच्यापेक्षया आस्वाद्यत्वम् ह्नइति असुन्दरगुणीभूतव्यङ्ग्यमिति मन्तव्यम्।

१०. समासोक्त्यलङ्कारः

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः।।[2]

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्तिः ह्नह्नह्नइति समासोक्तेः लक्षणम्। तत्र च अप्रस्तुतवृत्तान्तावगतौ गमकं विशेषणसाम्यम्। यथा **'अयमैन्द्रीमुखम् ....'** इत्युदाहरणे मुखशब्दस्य प्रारम्भवदनसाधारण्यात्, रक्तशब्दस्य अरुणकामुकसाधारण्यात्, चुम्बतिपदस्य वक्त्रसंयोग-संयोगसामान्यसाधारणत्वात् अत्रास्ति अर्थद्वयस्य अवकाशः। तथापिह्नह्न **'रक्तश्चुम्बति चन्द्रमाः'** इति प्रकरणमाश्रित्य चन्द्रोदय-वृत्तान्ते वर्ण्यमाने, ऐन्द्रीप्रारम्भसंयोगरूपप्रस्तुतवृत्तान्तः प्रतीतिपथमवतरति। ततः चन्द्रमश्शब्दगतपुंलिङ्गेन, ऐन्द्रीशब्दागतस्त्रीलिङ्गेन द्वयोः पदयोः सम्बन्धानुसन्धानेन च व्यञ्जनामाहात्म्यात् स्फूर्तया परनायिकया जारेण च अन्वितः वदनचुम्बनवृत्तान्तः। अर्थात् अप्रस्तुतः परनायिकामुखचुम्बनवृत्तान्तः प्रतीतो भवति[3]।

ततः प्रस्तुतवृत्तान्तस्य ऐन्द्रीप्रारम्भसंयोगस्य यद्यपि चन्द्रे साक्षात् आश्रयत्वसम्बन्धेन अन्वययोग्यता अस्ति, तथापि प्रस्तुतवृत्तान्तस्य प्राचीप्रारम्भसंयोगस्य व्यञ्जनामाहात्म्यात्

---

१. कु.आ. पृ.६८ २. कु.आ. पृ.६९ ३. कु.आ. पृ.६९

साधारणविशेषबलाच्च प्रतीताप्रस्तुत-परनायिकामुखचुम्बनवृत्तान्ताभिन्नत्वेन भासमानत्वात्, प्रस्तुते धर्मिणि चन्द्रे भेदसम्बन्धेनारोपे[१] जारसम्बन्धिपरनायिकामुखचुम्बनाभिन्नप्राची-प्रारम्भसंयोगाश्रयः चन्द्रः ह्नह्नह्नइति समासोक्तिस्थले बोधः जायते।

नायिकासम्बन्धिमुखचुम्बनवृत्तान्तस्य जारसम्बन्धित्वेन अप्रतीतस्य अहृद्यत्वात् स्वरूपतो भासमाने अप्रस्तुतवृत्तान्ते चमत्कारार्थं जारस्य कर्तृतया अन्वयः स्वीकृतः[२]। एवञ्चात्र व्यङ्ग्यार्थस्य अप्रस्तुतवृत्तान्तस्य वाच्येन प्रस्तुतवृत्तान्तेन अन्वितस्य प्रकृते वाच्ये धर्मिणि चन्द्रे अन्वयात् व्यङ्ग्यवृत्तान्तस्य वाच्यवृत्तान्तद्वारा वाच्यधर्म्युपस्कारकत्वात् समासोक्तेः वाच्योपस्कारकाङ्गत्वलक्षणं गुणीभूतव्यङ्ग्यत्वम्।

न चात्र वाच्यैन्द्रीमुखवृत्तान्तस्य व्यङ्ग्यपरनायिकामुखवृत्तान्तेन अभेदेनान्वयात् व्यङ्ग्याभिन्नत्वं वाच्यस्य वृत्तान्तस्य अस्तीति वाच्यस्य व्यङ्ग्यरूपरूपितत्वात् वाच्यवृत्तान्त-रूपाभावेन ध्वनित्वमेवेति वाच्यम्। व्यङ्ग्याप्रकृतवृत्तान्ताभिन्नस्यापि प्रकृतवृत्तान्तस्य वाच्ये धर्मिणि समारोपेण पुनः वाच्यस्यैव प्राधान्यात् नास्ति तत्र ध्वनित्वम् अपि तु गुणीभूत-व्यङ्ग्यत्वमेव।

व्यञ्जनामाहात्म्यात् वाच्यवृत्तान्तावयवभूतपदार्थैः व्यङ्ग्यवृत्तान्तावयवानाम् अभेदस्वीकारवादिपण्डितराजमतेऽपि[३] चन्द्रादौ आहार्यत्वेन जारादेरभेदभानात्, आहार्यारोपस्य स्वीकारे सति वास्तवस्य वाच्यचन्द्रत्वस्य अत्यागात्, तत्रापि वाच्यतिरस्काराभावात् जारत्वादेः उपस्कारकत्वात् गुणीभूतव्यङ्ग्यत्वमेव। अतः व्यङ्ग्यगर्भ एवायं वाच्यालङ्कारः।

११. परिकरालङ्कारः

अलङ्कारः परिकरः साभिप्राये विशेषणे।
सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः।।[४]

यत्र विशेषणं सामान्यतः व्यावर्तकस्वभावम्, अभिप्रायगर्भितमपि भवति; तत्र परिकरालङ्कारः। प्रकृत्यर्थोपपादकार्थव्यञ्जकविशेषणं परिकर इति भावः[५]। यथा **'सुधांशुकलितोत्तंसः ...'** इत्याद्युदाहरणे शिवस्य **'सुधांशुकलितोत्तंसः'** इति विशेषणं उपात्तम्। तच्च विशेषणं त्रिलोचनत्वादिविशेषणवत् न केवलं ईश्वरगतं सत् व्यावर्तक-

१. कु.आ. पृ.७१ २. कु.आ. पृ.७२-७३
३. र.गं. पृ.५०६ ४. कु.आ. पृ.७४ ५. कु.आ.अ.चं. पृ.७४

स्वभावम्, अपि तु प्रकृततापहरणक्रियोपयोग्यमृतनिधित्वरूपार्थमपि अभिव्यञ्जयति ह्नह्नइति परिकरालङ्कारः। व्यक्तस्यास्यार्थस्य तापहरणरूपवाच्योपपादकत्वात् गुणीभूतव्यङ्ग्यत्वम्।

१२. परिकराङ्कुरालङ्कारः

साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः।।[१]

यत्र विशेष्यस्य साभिप्रायत्वं तत्र परिकराङ्कुरालङ्कारः। यथाह्नह्न **'चतुर्णां पुरुषार्थानाम् ...'** इत्यादौ। ननु अत्र 'देवः, चतुर्भुजः' इति पदद्वयमस्ति। तत्र देवस्य विष्णुत्वेन स्वीकारे देवस्य विशेष्यत्वेन, चतुर्भुजत्वस्य च तद्विशेषणत्वात्, तस्यैव चतुर्विधपुरुषार्थदातृत्वसामर्थ्योपवर्णनात्, 'चतुर्भुज' इति विशेषणस्य साभिप्रायत्ववर्णनेन परिकर एव अत्र भवति। कथं परिकराङ्कुरालङ्कारः? इति चेत् देवपदस्य राजादौ अपि लोके व्यवहारस्य दर्शनात्, अत्र तस्य विशेष्यविष्णुवाचकत्वासम्भवेन, चतुर्भुजशब्दस्यैव विष्णुवाचकत्वम् आस्थेयम्।

ततः श्लोके **'चतुर्णां पुरुषार्थानां दाता'** इति अवान्तरवाक्यार्थश्रवणसमुल्लसितेन चतुर्भुजपदव्यञ्जनया चतुर्विधपुरुषार्थदातृत्व**सामर्थ्यातिशयलक्षणः** व्यङ्ग्योऽर्थः प्रतीयते, तस्य च 'दाता देवः' इति वाच्यार्थोपपादकत्वात्, विशेष्यस्य साभिप्रायत्वलक्षणः परिकराङ्कुरालङ्कारः। न चह्न अत्र वाचकस्यैव पदस्य व्यञ्जकत्वं कथम्? तादृशविशेषार्थ-स्फोरकपदान्तराभावात्।

अन्यच्च यथाकथञ्चित् श्लोक एव तादृशं पदान्तरम् अस्तीति समर्थ्यते, तदा 'चतुर्णां पुरुषार्थानां दाता' इति वाक्येन वा दातृपदेन वा दानानुकूलविशिष्टशक्तिसमर्पणोपपत्तौ 'चतुर्भुज' इति विशेष्यवाचकस्य पदस्य साभिप्रायत्वं किमर्थम्? इतिह्नह्न वाच्यम्। दातृपदेन **दानानुकूलशक्तिसहितकर्तृकारकस्य** उपस्थितावपि, दानानुकूलविशिष्टशक्तेः अनुपस्थापनात् 'चतुर्णां पुरुषार्थानाम्' इति वाक्येनापि दानानुकूलविशिष्टशक्तिमतः विशिष्टदातुः अनुपस्थापनात् तादृशव्यङ्ग्यार्थाभिव्यञ्जनक्षमत्वस्य अन्यत्र अभावेन, अगत्या चतुर्भुजपदमेव व्यञ्जना आश्रयति। तथा च अत्र परिकराङ्कुरः इति सिद्धम्। अत्रापि व्यङ्ग्यस्य वाच्योपपादकाङ्गत्वमेव।

---

१. कु.आ. पृ.७७

१३. श्लेषालङ्कारः

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः।
सर्वदो माधवः पायात् स योऽगङ्गामदीधरत्।।
अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना।
उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः।।[१]

नानार्थस्य शब्दस्य, संश्रयः = योजनं श्लेषः इति श्लेषालङ्कारः। अनेकार्थशब्द-विन्यासः श्लेषः स च त्रिविधः। प्रकृतविषयः, अप्रकृतविषयः प्रकृताप्रकृतविषयश्चेति। तत्र ह्न्ह्न्ह्न

१३.१. प्रकृतश्लेषः

'सर्वदो माधवः ...' इत्याद्युदाहरणेह्न्ह्न्ह्न 'सर्वदो माधवः' इत्यत्र सर्वदः माधवः (लक्ष्मीपतिः) इति 'योऽगङ्गाम् ...' इत्यत्र यः + अगम् = गोवर्धनपर्वतम्, गाम् = भूमिम् अदीधरत् इत्यर्थस्वीकारात् विष्णुपक्षीयस्यार्थस्य, सर्वदा + उमाधवः (पार्वतीपतिः) इत्यर्थस्वीकारात्ह्न्ह्न्ह्न तथा यः गङ्गाम् अदीधरत् इत्यर्थस्वीकारात् शिवपक्षीयस्य अर्थस्य शक्त्या समर्पणात् अत्र श्लेषः। उभयोरपि भक्तरक्षणसमर्थत्वेन प्रकृतत्वात् तद्विषये श्लेषस्य प्रवृत्तेः प्रकृतश्लेषः। अयमेव सभङ्गश्लेषः।

१३.२. अप्रकृतश्लेषः

'अब्जेन त्वन्मुखं तुल्यम्' इत्याद्युदाहरणे ह्न्ह्न नायिकामुखवर्णनपरे हरिणाहिसक्तिना = मृगाहितसङ्गेन, अब्जेन = चन्द्रेण त्वन्मुखं तुल्यम् इति एकस्य अप्रकृतार्थस्य, हरिणा = सूर्येण, आहितसक्तिना= प्राप्तसङ्गेन, अब्जेन= कमलेन त्वन्मुखं तुल्यम् इति अप्रकृतविषयस्य अर्थस्यापि अब्जपदशक्त्या 'हरिण, हरि'इति पदद्वयशक्त्या च द्वितीयार्थस्य समर्पणात्, समर्प्यमाणयोश्च चन्द्र-कमलरूपार्थयोः वर्णनीयनायिका दृष्ट्या अप्रकृतत्वात् अयं अप्रकृतश्लेषः।

१३.३. प्रकृताप्रकृतश्लेषः

'उच्चरद्भूरिकीलालः ...' इति तृतीयोदाहरणे कीलालशब्देन शक्त्या असृक्-उदकरूपार्थयोः, एवम् 'वाहिनीपति'शब्देन शक्त्या सेनापति-समुद्ररूपार्थयोश्चोपस्थितेः,

१. कु.आ. पृ.७८

'उच्चरत् अधिकरुधिरः सेनापतिः शुशुभे, उच्चरत् अधिकोदकसमुदायः समुद्रः शुशुभे' इति प्रकृतस्य सेनापतिपक्षार्थस्य अप्रकृतस्य समुद्रपक्षार्थस्य च भानात् प्रकृताकृतश्लेषः। एवं श्लेषालङ्कारस्य त्रैविध्यम्।

समीक्षा

तत्र प्रकृतश्लेषोदाहरणे अर्थद्वयस्य शक्त्या भानेऽपि, उभयोरपि प्रकृतयोः माधव-उमाधवयोः पानक्रिया अन्वयात्, एकवाक्यतैवेति व्यञ्जनायाः अत्र अवकाशः नास्ति। द्वितीयस्मिन् अप्रकृतश्लेषोदाहरणेऽपि अब्जपदेन समर्पितयोः द्वयोः चन्द्रकमलयोः तुल्यपदार्थ-द्वारा मुखेन सम्बन्धात् एकवाक्यतोपपत्त्या, तत्रापि व्यञ्जनायाः नास्त्यवकाशः। किन्तु 'उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः' इति प्रकृताप्रकृतश्लेषोदाहरणे द्वयोरर्थयोः वाक्यात् प्रतीतौ, एकवाक्येन अर्थद्वयप्रतीत्या तयोश्च सम्बन्धाभावे वाक्यभेदः स्यात्। अतः तद्वारणाय **'आक्षिप्त एव ...'**[१] इत्यादिध्वनिकारोक्तन्यायेन प्रकृताप्रकृतयोः सम्बन्धप्रकल्पकोप-मादेरर्थान्तरस्य व्यञ्जना वेद्यत्वात् समुद्रसेनापतिवाक्यार्थयोः औपम्यं व्यज्यत इति उपमालङ्कारध्वनिरेव प्राचीनमतानुसारेण[२]।

केचिदत्र अवाच्यार्थप्रतिपत्तये व्यञ्जना इति भ्रेमुः। परं प्राकरणिकार्थस्येव वाच्यभिन्नस्य शक्त्यैव वेद्यत्वात्, तदंशे व्यञ्जनाव्यापारस्य अवकाशः नास्ति। किन्तु तदंशे श्लेष, अथवा शब्दशक्तिरेवेति दीक्षिताशयः[३]।

वस्तुतस्तु दीक्षितमते प्रकृताप्रकृतश्लेषोदाहरणे गूढश्लेषः आक्षिप्तश्लेष एव भवति न ध्वनिः। यतो हि आक्षिप्तश्लेषे श्लेषस्य आक्षेपकं भवति यथा ह्नह्नह्न **'एतस्मिन्नधिकपयः ...'**[४] इत्यादिपद्ये 'महासरस्यः अरहितरामलक्ष्मणानां वाल्मीकेः गिरां साधर्म्यं दधति' इति वर्ण्यमाने वाक्यार्थे, महासरसीनां वाल्मीकिगीर्भिस्सह सादृश्यगमकस्य साधर्म्यपदस्य सद्भावात्, 'अरहितरामलक्ष्मणानाम्' इत्यादिषष्ठ्यन्तोपात्तविशेषणान्वितगीर्भिः सह प्रथमान्तसरसीपदार्थस्य 'आर्थान्वये आक्षेपकम् अस्ति' इति आक्षिप्तश्लेषः[५]।

एवञ्च दीक्षितमतानुसारेण तैरवचनेऽपि **'उच्चरत् भूरि कीलालः ...'** इत्यादि-प्रकृताप्रकृतश्लेषोदाहरणे समुद्रसेनापतिवाक्यार्थयोः औपम्यगमकस्य 'शुशुभे' इति शोभारूपधर्मैक्यस्य सद्भावात् अत्रापि आक्षिप्तश्लेष एव दीक्षितमतेन।

१. कु.आ. पृ.११५ २. कु.आ. पृ.७९, ८० ३. कु.आ. पृ.८०
४. कु.आ. पृ.८१ ५. कु.आ. पृ.८१

'रम्या इति प्राप्तवतीः पताकाः'[1] इत्यादिध्वनिकारोदाहृतश्लेषध्वनौ तु **'वधूभिः समं वलभीः युवानः असेवन्त'** इति वाक्यार्थे स्वीक्रियमाणे तत्रह्नह्नह्न पूर्वार्थोपात्तम् 'प्राप्तवतीः' इत्यादिद्वितीयान्तविशेषणानाम् 'वलभीः' इति द्वितीयान्तेनैव अन्वयात्, 'वधूभिः' इति तृतीयान्तेन अनन्वयात्, तत्रत्य समपदस्य एककालार्थकत्वेन वाक्यार्थबोधकाले साम्याक्षेपकत्वाभावेन केवलम् **'रम्या इति प्राप्तवतीः पताकाः'** इति वस्तुसौन्दर्यबलादेव भिन्नविभक्त्यन्तोपात्तविशेषणान्वयस्य प्रतीतेः, आक्षेपकस्याप्यभावेन, शाब्दव्यञ्जना-मर्यादायाश्च अत्र अभावात् गूढश्लेष एव इति दीक्षितस्याभिप्रायः। प्राचां मतानुसारेण तु अत्र शब्दशक्तिमूलध्वनिः।

ततश्च श्लेषालङ्कारविषये दीक्षितमतानुसारेण नास्ति व्यङ्ग्यस्यावकाशः इति, व्यङ्ग्यासम्बन्धित्वमेव अस्यालङ्कारस्य। श्लेषवशात् अर्थान्तरप्रतीतौ, ततः पुनरर्थान्तर-प्रतीतौ सत्यां ध्वनित्वं दीक्षितमतेनापि भवतीति अन्यदेतत्।

१४. अप्रस्तुतप्रशंसालङ्कारः

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते।।[2]

यत्र अप्रस्तुतवृत्तान्तवर्णनात् प्रस्तुतवृत्तान्तस्यावगतिः भवति, तत्र अप्रस्तुत-प्रशंसालङ्कारः। प्रस्तुतात् अप्रस्तुतस्यावगतिः तयोः सम्बन्धाभावे नोपपद्यत इति, तयोः सम्बन्धः सामान्यविशेषभावः, कार्यकारणभावः, सारूप्यं वा इति त्रेधा पर्यवस्यति[3]। तत्र ध्वनिकारेण सामान्यविशेषभावेन अथवा निमित्तनिमित्तिभावेन व्यङ्ग्यस्य प्रतीतौ सत्यां वाच्यव्यङ्ग्ययोः सममेव प्राधान्यम् इत्युक्तम्। तथा हिह्नह्नह्न यदा अप्रस्तुतात् सामान्यात् प्रस्तुतस्य विशेषस्य अवगतिः, तदा विशेषस्य सामान्येन अविनाभावसम्बद्धत्वात् वाच्यस्य सामान्यस्यापि प्राधान्यम्। यदा हिह्नह्नह्न अप्रस्तुतस्य विशेषस्य सामान्यपर्यवसायित्वम्, तदापि सामान्यस्य प्राधान्ये सामान्ये सर्वविशेषाणाम् अन्तर्भावात् अप्रस्तुतस्य विशेषस्य वाच्यस्य प्राधान्यं सिद्धमेव।

एवं निमित्तात् अप्रस्तुतात् वाच्यात् कार्यस्य प्रस्तुतस्य यत्र अभिव्यक्तिः, तत्र वाच्यव्यङ्ग्ययोः मृद्घटयोरिव कार्यकारणभावसम्बद्धत्वात् व्यङ्ग्यस्य कार्यस्य वाच्य-कारणात्मकत्वेन, वाच्याभिन्नत्वेन व्यङ्ग्यस्य, तयोः सममेव प्राधान्यम्। यदा तुह्नह्नह्न

१. कु.आ. पृ.८१ २. कु.आ. पृ.८२ ३. कु.आ. पृ.८२

कार्याद्वाच्यादप्रस्तुतात् कारणस्य व्यङ्ग्यस्य प्रस्तुतस्याभिव्यक्तिः वाच्यस्य कार्यस्य व्यङ्ग्यकारणनिष्ठत्वमेवेति तयोरपि सममेव प्राधान्यम्। व्यङ्ग्याभिन्नत्वेन वाच्यस्य, वाच्यव्यङ्ग्ययोः सममेव प्राधान्यम्। यत्र तु सरूपात् अप्रस्तुतात् प्रस्तुतवृत्तान्तस्य अभिव्यक्तावपि, प्रस्तुतस्य विवक्षा अस्ति, तदा ध्वनिः। अविवक्षायां तु अलङ्कार एव इति ध्वनिकारेण अप्रस्तुतप्रशंसागतवाच्यव्यङ्ग्यसम्बन्धमधिकृत्य प्रथमोद्द्योते प्रस्तुतम्[1]।

एवं ध्वनिकारादिभिः उक्तासु अप्रस्तुतप्रशंसासु कुवलयानन्दचन्द्रालोके सारूप्य-निबन्धना अप्रस्तुतप्रशंसा उदाहृता। **'एकः कृती शकुन्तेषु ...'** इत्याद्युदाहरणे इन्द्रमात्र याचकस्य चातकस्य अप्रस्तुतस्य प्रशंसया, तत्सरूपः क्षुद्रेभ्यः याचनान्निवृत्तस्य कस्यचिन्मानिनः (याचकस्य) वृत्तान्तः प्रस्तुतः प्रतीयते। अत्र वाच्यचातकवृत्तान्तस्य प्राधान्यम् ? उत व्यङ्ग्यस्य याचकवृत्तान्तस्य प्राधान्यम् ? इति विचिकित्सायां व्यङ्ग्यस्य याचकवृत्तान्तस्य प्रस्तुतत्वेन प्राधान्यमस्ति।

किन्तु कस्याञ्चित् सभायां कस्यचित् राज्ञः सकाशे कस्यचित् याचकस्य एवं प्रशंसा यदि क्रियेत, तर्हि क्षुद्रान्निवृत्तयाचकवृत्तान्तस्य क्षुद्रेतरराज्ञश्च कवितात्पर्यविषयत्वमपि अस्तीति तत्र प्रस्तुतस्य व्यङ्ग्यस्य ध्वनित्वमेव। प्रस्तुतयाचकवृत्तान्तस्य तात्पर्यविषयत्वं यदि नास्ति, तदा वाच्यस्य चातकवृत्तान्तं प्रति व्यङ्ग्यवाचकवृत्तान्तस्य उपस्कारकत्वात् गुणीभूतव्यङ्ग्यत्वमेव सिद्धम्।

१५. प्रस्तुताङ्कुरः

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः।
किं भृङ्ग ! सत्यां मालत्यां केतक्या कण्टकेद्धया।।[2]

यत्र प्रस्तुतवृत्तान्तेन वर्ण्यमानेन प्रस्तुतवृत्तान्तस्यैव द्योतनं भवति तत्र प्रस्तुता-ङ्कुरालङ्कारः। अयञ्च अप्पय्यदीक्षितेन नूतनतया परिकल्पितः। **'किं भृङ्ग! सत्यां मालत्याम् ...'** इत्याद्युदाहरणे प्रियतमेन साकम् उद्याने विहरन्ती काचित् भृङ्गं प्रति एवमाहेति वाच्यार्थस्य प्रस्तुतत्वम्। 'सुकुमारायां सुगन्धभरितायां मालत्यां सत्याम्, कण्टकेद्धया केतक्या किं प्रयोजनम्' इति भृङ्गामन्त्रणपूर्वकं प्रकृतवाक्यार्थे प्रतिपादिते 'शीलसौकुमार्यादिगुणोपेताम् आत्मानमुपेक्ष्य अन्यया कयाचित् विहरणं किमर्थम्' इति

---

१. ध्व.आ. पृ.४९-५२ २. कु.आ. पृ.८८

प्रकृतवृत्तान्तस्य अभिव्यक्तेः प्रस्तुताङ्कुरालङ्कारः। न चात्र अनामन्त्रणीयस्य तिर्यग्जातीयस्य (जन्तोः) पक्षिणः आमन्त्रणेन वाच्यासम्भवात्, अप्रस्तुतमेव वाच्यम् अत्र प्रस्तुतावगतये उपात्तमिति अप्रस्तुतप्रशंसालङ्कार एवेति वाच्यम्। मौग्ध्यादिनापि भृङ्गाद्यामन्त्रणस्य लोके दर्शनात् लोकव्यवहारसिद्धत्वेन भृङ्गवृत्तान्तस्य, तत एव प्रस्तुतावगमात् अत्र प्रस्तुता-ङ्कुरालङ्कार एव।

अन्यच्च **'कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्'** इति ध्वन्यालोकतृतीयोद्द्योतोदाहृतपद्ये अचेतनस्य स्थावरस्य शाखोटकवृक्षस्य आमन्त्रणमिव नेदं प्राणिनो भृङ्गस्यामन्त्रणमत्यन्तमसम्भवि। अतश्च वाच्यस्य अंशतः सम्भवः अस्तीति प्रस्तुतत्त्वमेव। अत्र च किं दुष्प्रधर्षपरवनितासक्तनायकनिन्दावृत्तान्तस्य व्यङ्ग्यस्य ध्वनित्वम्? अथवा किं वाच्यस्य भृङ्गनिन्दावृत्तान्तस्य चमत्कारित्वम् ? इति सन्देहे औचित्यात् नायकाधि-क्षेपणकल्पनिन्दावृत्तान्तस्य वाच्यभृङ्गनिन्दावृत्तान्तानाच्छादितस्य अचमत्कारित्वात्, प्रत्युत व्यङ्ग्यनायकनिन्दावृत्तान्तोपस्कृतवाच्यभृङ्गनिन्दावृत्तान्तस्यैव चमत्कारित्वात् प्रस्तुताङ्कुरस्य अलङ्कारता। प्रायशः एतदभिप्रायेणैव स्यात् दीक्षितेन एवमुक्तम् ह्लह्लह्ल **'वस्तुतस्तु अयमप्यलङ्कार एव न ध्वनिरिति चित्रमीमांसायां व्यवस्थापितम्।'**[१] लोचनकारस्तु एतादृशोदाहरणेषु अन्यापदेशध्वनिमाह। यत्र च स्वोक्त्याऽविष्कारः तत्र च अलङ्कारत्वञ्च तेन प्रत्यपादि।

१६. पर्यायोक्तम्

पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्।
नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ।।[२]

यत्र गम्यम् = विविक्षितम्, भङ्ग्यन्तरेण = विविक्षितरूपार्थादपि चारुतरेण केनचित् रूपान्तरेण प्रतिपाद्यते तत्पर्यायोक्तम्। अत्र च लक्षणे वचः इत्यस्य प्रतिपादितमित्यर्थः। अन्यथा गम्यस्य वचः इत्यस्यासाङ्गत्यापत्तेः। **'नमस्तस्मै कृतौ येन ...'** इत्याद्युदाहरणे भगवतो वासुदेवस्य स्वासाधारणरूपेण गम्यस्य राहुवधूकुचवैयर्थकारित्वेन रूपान्तरेणाभि-धानात् पर्यायोक्तालङ्कारः। अत्र च व्यङ्ग्यस्य वासुदेवस्य स्वासाधारणरूपेण वर्तमानस्य अपेक्षया राहुवधूकुचवैयर्थ्यकारित्वेन रूपान्तरेण अभिहितस्य वाच्यस्यैव चमत्कारित्वात् पर्यायोक्तस्य अलङ्कारता[३]।

१. कु.आ. पृ.९० २. कु.आ. पृ.९२ ३. कु.आ. पृ.९२

२. एवं व्याजेन इष्टसाधनात्मके द्वितीयस्मिन् पर्यायोक्तेऽपि ह्लह्लह्ल **'यामि चूतलतां द्रष्टुम् इवाभ्याम् आस्यतामिह'**[१] ह्लह्लह्ल इत्युदाहरणे स्वाच्छन्द्यसम्पादनरूपव्यङ्ग्यापेक्षया वाच्यस्य चूतलतादर्शनव्याजेन निर्गच्छन्त्या सख्या उक्तस्य 'युवाभ्यामास्यतामिह' इति वाच्यस्यैव अत्यन्तचमत्कारित्वात्, द्वितीयपर्यायोक्तमपि गुणीभूतव्यङ्ग्यमेव। **'भ्रम धार्मिक! ...'** इत्यादौ 'मा भ्रम' इति व्यङ्ग्यस्य तद्व्यतिरेकिविधिमुखेन वाच्यत्वेऽपि व्यङ्ग्यस्य 'मा भ्रम' इत्यस्य तात्पर्यविषयत्वेन सुन्दरत्वात् रसाद्यनुकूलत्वाच्च ध्वनिरेव न पर्यायोक्तम्। ध्वनिकारेण तु कस्यचित् पर्यायोक्तस्य ध्वनित्वमपि दर्शितम्।[२]

१७. व्याजस्तुतिः

उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः।
कः स्वर्धुनि! विवेकस्ते पापिनो नयसे दिवम्।।

साधु दूति ! पुनः साधु कर्तव्यं किमतः परम्।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि।।[३]

यत्र निन्दया स्तुतिः, स्तुत्या निन्दा वा व्यज्यते तत्र व्याजस्तुत्यलङ्कारः। एषा व्याजस्तुतिः दण्डिना आदृतापि, अप्रस्तुतप्रशंसोदाहरणे **'सुखं जीवन्ति हरिणाः ...'**[४] इत्यादौ, वस्तुतः व्याजस्तुत्युदाहरणेऽपि अप्रस्तुतप्रशंसारूपेण दर्शिता। अलङ्कार-सर्वस्वकारेण **'यद्वक्त्रं मुहुरीक्षसे'**[५] इत्यादौ स्तुत्या निन्दाभिव्यक्तिलक्षणव्याजस्तुत्युदाहरणे अप्रस्तुतप्रशंसैव उदाहृता। तस्मात् अप्रस्तुतवृत्तान्तेन प्रस्तुतवृत्तान्तावगतावपि स्तुत्या निन्दा, निन्दया स्तुतिर्वा यत्र अभिव्यज्यते तत्र व्याजस्तुतिरेव, नाप्रस्तुतप्रशंसा ह्लह्लह्लइति विवेक्तव्यम् इति अप्पय्यदीक्षितेन कुवलयानन्दे सूचितम्। **'यद्वक्त्रं मुहुरीक्षसे ...'** इति पद्येऽपिह्लह्लह्ल 'अयमप्रस्तुतप्रशंसाविशेष इत्यलङ्कारसर्वस्वकारः' इति कथयता दीक्षितेन, अप्रस्तुतप्रशंसा अलङ्कारसर्वस्वकृता तत्र उदाहृता इति अभाणि[६]। परं स श्लोकः अलङ्कारसर्वस्वकारो-दाहृतश्लोकानुक्रमण्याम्, अप्रस्तुतप्रशंसा-व्याजस्तुतिप्रकरणयोर्वा न दृश्यते इति विज्ञेयम्।

१. कु.आ. पृ.९५
२. ध्व.आ. पृ.४५, ४६
३. कु.आ. पृ.९६
४. कु.आ. पृ.९८
५. कु.आ. पृ.९७
६. कु.आ. पृ.९८ 'वस्तुतस्तु अत्र व्याजस्तुतिरित्येव युक्तम्'

१. **'कः स्वर्धुनि! विवेकस्ते ...'** इत्यादिलक्ष्येह्वह्व 'हे स्वर्धुनि! कस्ते विवेकः' इत्येवं प्रकारेण अभिहितया गङ्गानिन्दया, **'हे गङ्गे ! सुकृतिवदेव महापातकादि-कृतवतोऽपि भवती स्वर्गं नयति'** इति स्तुतेः अभिव्यञ्जनात् व्याजस्तुतिः। न चात्र भगवती भागीरथी निन्दायाः अनुपपन्नत्वात् ; वाच्यापेक्षया, भागीरथीस्तुतिरूपान्तरालिक-व्यङ्ग्यस्य, भक्तिभावरूपपरमव्यङ्ग्यस्य च अधिकचमत्कारित्वेन ध्वनित्वमेवेति वाच्यम्। पूज्यभागीरथीनिन्दायाः वाच्यायाः अनुपपन्नत्वात्, 'भागीरथीस्तुतिपरेयं निन्दा'ह्वह्व इति व्यज्यमानया भागीरथीस्तुत्या वाच्यायाः भागीरथी निन्दायाः उपपाद्यत्वात् वाच्यसिद्ध्यङ्गरूप-गुणीभूतव्यङ्ग्यतायाः अलङ्कारत्वस्यैव चात्र युक्तत्वात्।

२. **'साधु दूति! पुनः साधुः ...'** इत्याद्युदाहरणे 'मदर्थे महान्तं क्लेशम् अनुभूतवत्यसि यत् – (मदीयदुःखदुःखितमनसः तीव्रतया दुःखपारवश्येन) दन्तैर्नखैरपि सञ्जातक्षता असि साधु दूति !' इति वाच्यप्रशंसाव्याजेनह्वह्वह्व 'धिक् त्वां दूतिकाधर्मविरुद्धकारिणीम्' इति निन्दा व्यज्यते।

व्यज्यमाननिन्दातात्पर्यकत्वेन वाच्यदूतीप्रशंसायाः अलङ्कारता।

१८. व्याजनिन्दा

निन्दायाः निन्दया व्यक्तिर्व्याजनिन्देति गीयते।
विधे ! स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः।।[1]

यत्र कयाचित् निन्दया निन्दाव्यज्यते, तत्र व्याजनिन्दालङ्कारः। अयञ्च व्याज-निन्दालङ्कारः स्तुत्या स्तुत्यभिव्यक्तिलक्षणपञ्चमप्रकारव्याजस्तुत्यलङ्कारस्य प्रतिपक्षभूतः। अयमलङ्कारः अप्पय्यदीक्षितेन नूत्नतया परिगणितः। यथाह्वह्व **'विधे स निन्द्यः ...'** इत्याद्युदाहरणे 'हे विधे ! यस्ते प्राक् एकमेव शिरः अहरत्, स हरः = शिवः एव निन्द्यः' इति वाच्यया अवाच्यत्वेन अनुपपन्नया शिवनिन्दया, ब्रह्मणः निन्दा व्यज्यते। न च व्यज्यमाना ब्रह्मनिन्दापि कथमुपपद्यते ? इति वाच्यम्। व्यङ्ग्यब्रह्मनिन्दायाः अपि स्वव्यङ्ग्ये 'विषमविपाकं संसारं सृजति, भक्तगतदुर्भरजीवनप्रवर्तके च ब्रह्मणि भक्तगतामर्षभावे पर्यवसानात्। तथा च व्यङ्ग्यपक्षान्तरीभूतममर्षाख्यं भावं पुरस्कृत्य प्रथमव्यङ्ग्यभूतायाः ब्रह्मणो निन्दायाः अभिव्यक्तेः उपपत्तेः तात्पर्यविषयीभूतं व्यङ्ग्यान्तरमादाय प्राथमिकव्यङ्ग्योपपत्तिः।

---

१. कु.आ. पृ.९९

एवमेव व्यजनिन्दालङ्कारोदाहरणेद्ध्व 'हरनिन्दावाक्यार्थः विषमविपाकसंसारप्रवर्तक-ब्रह्मनिन्दातात्पर्यकः' इति वाक्यार्थोपवर्णनात् अकरणीयत्वेन अनुपपन्नहरनिन्दाव्यङ्ग्यया ब्रह्मनिन्दया उपपाद्यत इति व्याजनिन्दायाः वाच्यसिद्ध्यङ्गत्वम् अलङ्कारत्वञ्च सिद्धम्।

अत्र च व्याजनिन्दाप्रकरणे दीक्षितेन अप्रस्तुतप्रशंसोदाहरणेषु स्तुतिनिन्दादिरूपेषु केषुचित् वाच्यया स्तुत्या व्यङ्ग्यायाः स्तुतेः गम्यत्वे व्याजस्तुत्यलङ्कारः, वाच्यया निन्दया व्यङ्ग्यायाः निन्दायाः गम्यत्वे व्याजनिन्दालङ्कारः भवति, तस्या एव प्राथमिकस्फूर्ति-विषयत्वात् इत्युक्तम्। उभयत्रापि वाच्यात् अप्रस्तुतात् व्यङ्ग्यस्य प्रस्तुतस्य सद्भावेन अप्रस्तुतप्रशंसा भवति चेत्द्ध्व भवतु नाम। स्तुत्या स्तुत्यभिव्यक्तिः, अप्रस्तुतवृत्तान्तेन प्रस्तुतवृत्तान्ताभिव्यक्तिः इत्यादिप्रयोजकभेदमास्थाय व्याजस्तुति-अप्रस्तुतप्रशंसयोः व्याजनिन्दा-अप्रस्तुतप्रशंसयोश्च व्यवहारस्य युक्तत्वात्।[१]

सन्दर्भेऽस्मिन् अयमन्यः दृष्टौ अत्यन्तजागरूकतया निक्षेप्तव्यः अंशः यत्द्ध्व-**'लावण्यद्रविणव्ययः ...'**[२] इत्यादिपद्ये ध्वनिकारः अप्रस्तुतप्रशंसैव अत्र अलङ्कारः, न तु व्याजस्तुत्यलङ्कारःद्ध्व इति परमतविदलनपुरस्सरं व्याचख्यौ[३] इति। यतस्तन्मतानुसारेण द्ध्व **'एषापि स्वयमेव तुल्यरमणाभावात् वराकी हता'** इति निन्दाकथनेन अमाङ्गल्य-कीर्तनेन च एतत् श्लोकवक्तुः रागित्वस्य वा, लोकोत्तरसुन्दरीसौन्दर्याविष्कारेण वीतरागित्वस्य वा अनुपपत्तेः, अस्य च श्लोकस्य धर्मकीर्तिश्लोकत्वेन प्रसिद्धत्वात् प्रबन्धान्तरघटक-त्वानुपपत्तेश्च, प्रपञ्चे असम्मितस्य सौन्दर्यस्य सृष्टिनिन्दादिव्याजेन **'किमर्थैषा सुन्दरीसृष्टिः'** इति निर्वेदपूर्वकपरिदेवनायाः विवक्षितत्वात् न व्याजस्तुतिः। तस्मात् वाच्यात् प्रपञ्चे असम्मितसौभाग्यातिशयशालिस्वीयकवितानिन्दाव्याजेन, प्रपञ्चासम्मितसौभाग्यभासुर-कवितानिर्माणचातुरीविभासितस्य आत्मनः निन्दाव्याजेन च, आत्मनः अन्यमेव विशेषज्ञं कञ्चित् अपश्यतः परिदेवितं प्रस्तुतं व्यज्यतेद्ध्वद्ध्व इत्यप्रस्तुतप्रशंसालङ्कार एव, न व्याजस्तुतिः इति ध्वनिकारमतमत्र श्लोके ध्वन्यालोके अस्ति।[४]

१. कु.आ. पृ.१००

२. **लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः**
स्वच्छन्दं चरतो जनस्य हृदये चिन्ताज्वरो निर्मितः।
एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता।। ध्व.आ. पृ.२७०, २७१

३. ध्व.आ. पृ.२७१ 'अत्र व्याजस्तुत्यलङ्कार इति व्याख्यायि केनचित्; तन्न चतुरस्रम्'

४. ध्व.आ. पृ.२७२. 'तस्मादप्रस्तुप्रशंसेयम्'

अप्पय्यदीक्षितमते तु अत्र श्लोके ध्वनिकारमत इव वाच्यस्य प्रायशः अनुपपन्नत्वात् ह्नह्नह्न 'तन्वीमिमां तन्वता' इति चतुर्थचरणोदाहृतलोकोत्तरसौन्दर्यरूप 'इमाम्' पदाभिधेय-विवक्षितवाच्यस्तुत्या, कवितानिन्दाव्याजेन कविनिन्दाव्याजेन च प्रतीतायाः कवितास्तुतेः व्यज्यमानत्वात् अत्र स्तुत्या स्तुत्यभिव्यक्तेः व्याजस्तुत्यलङ्कारः। अप्रस्तुतप्रशंसालङ्कारश्च इत्युभयमपि आदर्तव्यम् (दीक्षिमते)।

ध्वनिकारमते तु निरतिशयसौन्दर्यपरिदेवितस्य निरतिशयकवितासौन्दर्यपरिदेवितस्य चेति प्रस्तुताप्रस्तुतयोः अप्रस्तुतप्रशंसारूपत्वे तत्र परिदेवना एव वाक्यार्थः। दीक्षितमते तु तरुणीसौन्दर्यस्तुतिः कवितासौन्दर्यस्तुतिः च उभयं व्याजस्तुतिरूपेण अप्रस्तुतप्रशंसारूपेण च परिदेवनाऽपर्यवसायी वाक्यार्थः इति प्रघट्टकेऽस्मिन् फलितम्।

१९. आक्षेपः

आक्षेपस्त्रिविधःह्नह्नह्न १. स्वयं प्रार्थितस्य विचारणात् प्रतिषेधः, २.अर्थान्तरपर्यवसायी बाधितो निषेधः आक्षेपः। ३. वाच्यविधिः व्यक्तनिषेधश्च तृतीयः प्रतिषेधः। तत्र प्रथमः आक्षेपो निरूप्यतेह्नह्नह्न

१ आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्।
चन्द्र ! सन्दर्शयात्मानमथवाऽस्ति प्रियामुखम्।।[1]

यत्र स्वयमुक्तस्यार्थस्य विचारणात् प्रतिषेधः क्रियते तत्र आक्षेपालङ्कारः। यथाह्नह्नह्न **'चन्द्रसन्दर्शयात्मानम्...'** इत्याद्युदाहरणे स्वयं प्रार्थितस्य चन्द्रसन्दर्शनस्य चन्द्रसदृशप्रिया-मुखलाभेन 'अथवास्ति प्रियामुखम्' इति आर्थिकस्य निषेधस्य प्रतिपादनात् आक्षेपालङ्कारः। अत्र च प्रथमतः चन्द्रसन्दर्शनं सम्प्रार्थ्य, पश्चात् प्रियामुखनिषेधकरणेन चन्द्रप्रियामुखयोः सादृश्यं व्यज्यते। व्यक्तस्य च सादृश्यस्य आक्षेपोदाहरणभूतवाक्यार्थोपपादकतया गुणीभूतव्यङ्ग्यत्वम्।

२. निषेधाभासमाक्षेपं बुधाः केचनमन्वते।
नाहं दूती तनोस्तापस्तस्याः कालानलोपमः।।[2]

---

१. कु.आ. पृ.१०१
२. कु.आ. पृ.१०२

अलङ्कारसर्वस्वकारादयः **'निषेधमात्रम् आक्षेपः'** इति नाङ्गीकुर्वन्ति। किन्तु यः निषेधः बाधितस्सन् अर्थान्तरपर्यवसितः कञ्चित् विशेषम् आक्षिपति, सः द्वितीयः आक्षेपः[1]। यथाह्वह्व **'नाहं दूती ...'** इत्याद्युदाहरणे दूती स्वयं नायकसमीपमागत्य, नायिकायाः विरहं निवेदयन्त्यपि **'नाहं दूती....'** इति प्रतिषेधति। स्वयं दूत्याः दूत्यास्सत्याः क्रियमाणः अयम् 'नाहम्' इति प्रतिषेधः, केवलं यथाकथञ्चित् नायिकायाः नायकसङ्गमार्थित्वकैतत्वेन दूत्या कस्यापि वचनस्य भणनात्मकम्।

अपि तु **'यथार्थमेव कथयामि'** इति दूत्या यथार्थवादित्वतात्पर्यकोऽयं निषेधः इति वाक्यार्थः पर्यवस्यति। तथा 'तनोस्तापः तस्याः कालानलोपमः' इति आरोपोऽपि दूत्याः यथार्थवादित्वे पर्यवस्यति। तेन च इदानीमेव आगत्य नायिका उज्जीवनीया इति विशेषः व्यज्यते। अत्र च दूती निष्ठं व्यज्यमानं यथार्थवादित्वम् 'नाहं दूती' इति वाच्यस्य समर्थकम्। यथार्थवादित्वतात्पर्यकोऽयं नायं निषेधः ह्वह्वह्व इति बोधस्वीकारात्, तथा चात्रापि गुणीभूतव्यङ्ग्यत्वम्।

३. आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते।
गच्छ गच्छसि चेत्कान्त ! तत्रैव स्याज्जनिर्मम।।[2]

यत्र विधौ व्यक्ते= वाच्ये, निषेधे च तिरोहिते = व्यङ्ग्ये सति आक्षेपालङ्कारः। यथाह्वह्व **'गच्छ गच्छसि चेत्कान्त ! ...'** इति कस्याश्चित् विरहिण्याः उक्तौह्वह्वह्व 'गच्छ !' इति विधेः वाच्यत्वेऽपि, तत्रैव 'स्याज्जनिर्मम' इति कान्तगमनोद्देश्यदेशे आत्मनः पुनर्जन्मनः विरहिण्या प्रतिपादनात्, नायकसङ्गमाभिलाषिण्याः नायिकायाः वचनस्य मध्ये सङ्गमविरोधिना पुनर्जन्मप्रसङ्गेन बाधितत्वात्, बाधितवाच्यस्य 'मा गाः' इति व्यङ्ग्यनिषेध-तात्पर्यकत्वात् निषेधेन वाच्यस्य संस्कृतत्वात् अत्रापि गुणीभूतव्यङ्ग्यत्वमेव।

प्रथमेऽस्मिन् उदाहरणे औपम्यगर्भत्वं स्पष्टम्। द्वितीय-तृतीययोः आक्षेपयोस्तु व्यङ्ग्यौपम्यगर्भत्वं नास्ति।

---

१. कु.आ. पृ.१०२
२. कु.आ. पृ.१०३

२०. अर्थान्तरन्यासः

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।
हनूमानब्धिमतरत् दुष्करं हि महात्मनाम्।।
गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।[१]

यत्र समर्थ्यसमर्थभावमापन्नयोः सामान्यविशेषभावः वर्ण्यते, तत्र अर्थान्तर-न्यासालङ्कारः। यथाह्वह्वह्व 'हनूमानब्धिमतरत्' इत्यत्र प्रस्तुतस्य हनूमानब्धिसन्तरणवृत्तान्तस्य विशेषस्य 'दुष्करं किं महात्मनाम्' इति अप्रस्तुतेन सामान्येन समर्थनात्, विशेषस्य सामान्येन समर्थनात्मा अर्थान्तरन्यासः।

एवमेव नीतिगुरूपदेशसन्दर्भे प्रस्तुतस्य सामान्यस्य **'गुणवत् वस्तु संसर्गात् याति स्वल्पोऽपि गौरवम्'** इत्यस्य अप्रस्तुतेन विशेषेण **'पुष्पमालानुषङ्गेन सूत्रं शिरसि धार्यते'** इत्यनेन समर्थनात् सामान्यस्य विशेषेण समर्थनात्मा अर्थान्तरन्यासालङ्कारः।

अत्रेदं बोध्यम् – द्वितीयेऽस्मिन् उदाहरणे **'पुष्पमालानुषङ्गेण'** इत्यादिविशेषांशस्य **गुणवद्वस्तुसंसर्गात्** इत्यादिसामान्यांशं प्रति समर्थकत्वात् तत्र तादृशसमर्थनया यथाह्वह्वह्व **'पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते'**, तद्वत् **'गुणवत् वस्तुसंसर्गात् स्वल्पोऽपि गौरवं याति'** इति समर्थ्यसमर्थकयोः उपमानोपमेयभावस्य गम्यमानत्वात् तत्र गम्यौपम्य-मूलकत्वं युक्तं भवतु नाम। किन्तु **'हनूमानब्धिमतरत्'** इत्याद्युदाहरणे विशेषांशस्य **'हनूमानब्धिमतरत्'** इत्यस्य, **'दुष्करं किं महात्मनाम् ?'** इति प्रश्नवाक्येन कथं वा समर्थनम्? उपमानोपमेयभावस्य प्रतीतिरपि कथम् ? इति चेत् –

उच्यते। तत्र **'दुष्करं किं महात्मनाम् ?'** इति प्रश्नवाक्येन 'महात्मनाम् असाध्यं किमपि नास्ति' इत्यर्थस्य **'महात्मनां सर्वमपि सुसाधमेव'** इत्यर्थे पर्यवसानात्, तस्य च शोधितवाच्यार्थस्य वाक्यार्थीभूतहनूमत्सन्तरणवृत्तान्तसमर्थकतया तयोश्च उपमानोपमेय-भावप्रतीतेः, अत्रापि गम्यौपम्यमूलकत्वमस्त्येव। व्यङ्ग्यस्य च औपम्यस्य वाच्य-वाक्यार्थसमर्थकत्वात् अत्र वाच्योपपादकत्वलक्षणगुणीभूतव्यङ्ग्यत्वमेव। अर्थान्तरस्यापि पृथक् शब्दोपात्तत्वेन शब्दशक्तिमूलध्वन्यवकाशस्तु अत्र नास्ति।

---
१. कु.आ. पृ.१४०

२१. विकस्वरालङ्कारः

यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः।
स न जिग्ये महान्तो हि दुर्धर्षाः सागरा इव।।[१]

यत्र प्रथमतः कञ्चित् विशेषांशम् उक्त्वा, तत्समर्थनाय सामान्यांशमुक्त्वा पुनः तत्समर्थनाय उपमानभङ्गिम्ना अथवा अर्थान्तरन्यासभङ्गिम्ना विशेषांशः विन्यस्यते तत्र विकस्वरालङ्कारः। यथाह्नह्नह्न **'स न जिग्ये ...'** इत्याद्युदाहरणे **'स न जिग्ये'** इति शब्दात् अर्थात् प्रतीतस्य 'स राजा दुष्प्रधर्षः' इति विशेषांशस्य, **'महान्तो हि दुर्धर्षाः'** इति सामान्यांशस्य समर्थकत्वात्, तस्य च सामान्यांशस्य 'सागरा इव' इति विशेषान्तरौपम्येनोप-पादनात् विकस्वरालङ्कारः।

अत्र च सामान्यविशेषयोः उपमानोपमेयभावस्य गम्यत्वात् अंशतः गम्यौपम्यमूलकत्वम् **'सागरा इव'** इति उपमानस्य स्पष्टतया प्रतिपादनात् अंशतः भेदाभेदप्रधानवाच्यसादृश्य-मूलकत्वमपि अस्यालङ्कारस्य। प्रतीतस्य औपम्यस्य **'स न जिग्ये'** इति अंशोपपादकत्वात् **'सागरा इव'** इति वाच्यौपम्यस्य च दुर्धर्षमहदुपस्कारकत्वादलङ्कारत्वम्।

२२. ललितालङ्कारः

वर्ण्ये स्याद्वर्ण्यवृत्तान्तप्रतिबिम्बस्य वर्णनम्।
ललितं, निर्गते नीरे सेतुमेषा चिकीर्षति।।[२]

यत्र प्रस्तुते धर्मिणि यः वृत्तान्तः वर्णनीयः, तं वृत्तान्तम् अवर्ण्य, तत्प्रतिबिम्बभूतः वृत्तान्तः वर्ण्यते तत्र ललितालङ्कारः। यथाह्नह्नह्न **'निर्गते नीरे सेतुमेषा चिकीर्षति'** इत्युदाहरणम्। अत्र नायकस्य दक्षिणतया किञ्चिद्विलम्बेनागतं कञ्चिन्नायकं काचित् उपेक्षितवती। गतवति च नायके नायिका पश्चात्तप्तहृदया सती यदा काञ्चित् सखीं प्रेषयितुकामा आसीत्, तदा तां प्रति सखी एवमाह्नह्नह्नह्न **'निर्गते नीरे ...'** इत्यादि। तथा च ललितालङ्कारे वाच्याप्रस्तुतवृत्तान्ताभिन्नप्रस्तुतवृत्तान्तस्य प्रकृते धर्मिणि अन्वयः इति सारांशः। प्रस्तुतवृत्तान्तस्य व्यङ्ग्यस्यापि अप्रस्तुतवृत्तान्ताभिन्नत्वात् वर्ण्ये धर्मिणि समारोपः। तथा च व्यङ्ग्यवृत्तान्तस्य वाच्ये अन्वयात् गुणीभूतव्यङ्ग्यत्वम्। इत्थं गम्यौपम्याश्रयाः द्वाविंशति-रलङ्काराः निरूपिताः।

।। समाप्तोऽयं द्वितीयोऽध्यायः।।

---

१. कु.आ. पृ.१४३   २. कु.आ. पृ.१४७

तृतीयोऽध्यायः

विरोध–शृङ्खला–तर्कन्याय–लोकन्यायमूलकालङ्काराः

अध्यायेऽस्मिन् **भोलाशङ्करव्यासमहाशय**वर्गीकरणानुसारेण – **II.** विरोधगर्भाः, **III.** शृङ्खलाबन्धमूलकाः, **IV.** तर्कन्यायमूलकौ, **V.** वाक्यन्यायमूलकाः, **VI.** लोकन्यायमूलकाश्च अलङ्काराः निरूप्यन्ते। आदौ विरोधगर्भाः निरूप्यन्ते।

II. विरोधगर्भाः अलङ्काराः

एतेषु अलङ्कारेषु विरोधादयः व्याघातान्ताः द्वादशालङ्काराः। तत्र भोलाशङ्करव्यास–महाशयदत्तसूचीमध्ये **विरोधः** विरोधाभास एव। न त्वतिरिक्तः। विरोधगर्भातिशयोक्तिः अपि अतिशयोक्तिप्रकरणे निरूपिता । अतः नेह पुनः तन्निरूपणं क्रियते। डा. भोलाशङ्करव्यास–महाशयेन विरोधगर्भेषु अल्पालङ्कारस्य परिगणनं प्रमादवशात् विस्मृतं स्यात्। समालङ्कारस्तु विरोधवर्गे यद्यपि नान्तर्भवति तथापि विषमप्रतिद्वन्द्विभूतत्वात् विषमालङ्कारनिरूपणानन्तरं प्रसङ्गवशात् समालङ्कारस्य प्रवेशः कृतः।

एषु सर्वेषु प्रायशः विरोधस्य अद्भुतसृष्टिहेतुभूतत्वात् तत्तदुदाहरणेषु शृङ्गारादिरसाविरोधिनः अद्भुतस्य विरोधेन सृज्यमानत्वात् शृङ्गारादिमीलिताद्भुतोपस्कारकत्वमथवा शृङ्गाराद्युपस्कारकत्वं विज्ञेयं भवति।

अतः एतद्वर्गीयालङ्कारेषु व्यङ्ग्यार्थविचारं प्रति न प्रत्येकपरिश्रमः क्रियते। अथापि अलङ्कारेषु भासमानस्य विरोधस्य तत्परिहारस्य च प्रयत्नः श्लेषादिनिष्पन्नः अवश्यं विचारणीयः। वाक्यार्थशैली च कथम् ? इति ज्ञातव्या। तत्र ध्वन्यालोके आनन्दवर्धनाचार्येण बाणभाट्टस्य **स्थाण्वीश्वरा**ख्यजनपदवर्णनेह्न

'यत्र च मत्तमातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च ...'[1]

इत्याद्युदाहरणे शब्दशाक्तिमूलविरोधध्वनिरेव इति प्रतिपादितम्। विरोधस्थले किं विरोधशाली अर्थः प्रथमतः भाति? उत विरोधपरिहारोपायभूतः अर्थः प्रथमतः भाति? इति सन्देहे

१. ध्व.आ. पृ. १२२

'मत्तमातङ्गवद्गच्छन्ति तांश्च गच्छन्तीति विरोधः'[१] इति लोचनकारोक्तेः, प्रथमतः विरोधपरिहारोपायभूतः अर्थः प्रतिभाति इव ज्ञायते।

परं विरोधपरिहारस्य विरोधपूर्वकत्वात् प्रथमतः विरोधी एवार्थः भासत इति ज्ञायते। तस्य च विरोधिनः अर्थस्यैव प्रथमतः भाने किं प्रयोजकम् इति विचारे विरोधगर्भपदार्थ-घटितवाक्यवर्तिपदान्तरसान्निध्यं परस्परप्रतिद्वन्द्विभूतार्थज्ञानमेव वा विरोध्यर्थस्य प्रथमतो भाने नियामकम्। तद्यथा— 'मत्तमातङ्गगामिन्यः शीलवत्यश्च' इत्यत्र द्वयोः पदार्थयोः चशब्देन द्योतितेन विरोधेन शीलवतीपदार्थविरोधी मत्तमातङ्गपुरुषगामिनीरूपार्थ एव प्रथमतः प्रतिभाति। ततः विरोधस्फूर्तौ सत्यां विरोधपरिहारोपयोगी **'मत्तमातङ्गवद्गामिन्यः'** इति द्वितीयोऽर्थः प्रतिभाति। चशब्दस्य विरोधवाचकत्वाभावात् ध्वनित्वम्।

एवम्— **'अधीशम् धीयामीशम्'**[२] इत्यादिध्वनिकारोदाहरणेऽपि धीशाधीशयोः परस्परप्रातिद्वन्द्वेन प्रथमतः धीशत्वाधीशत्वादिपरस्परविरुद्धार्थोपस्थापकत्वम्। ततः विरोधपरिहारोपयोग्यर्थान्तरप्रतिपादनम् इत्यालङ्कारिकसमयः।

अन्यच्च विरोधस्थले केषाञ्चन मतेन **'सुप्तोऽपि प्रबुद्धः'** इत्यादौ सुप्तत्वजागरित-त्वादिना विरोधवाचकापि'कारात् विरोधे स्फूर्ते सुप्तप्रबुद्धयोः प्रथमान्तपदोपस्थापितयोरपि अभेदान्वयबोधात् प्रबुद्धपदीयशक्त्यन्तरेण ज्ञानवान् —इति विरोधपरिहारकस्यार्थस्य उपस्थितिः अन्वयबोधश्च भवति। एवञ्च एतन्मते प्रथमतः प्रतीतस्य विरोधस्य पश्चात् परिहारः[३]।

अन्ये तु प्रथमतः विरोधभानवत् पश्चादपि अन्वयबोधकाले प्रवृत्त्यङ्गतया अविरोधिनः अर्थस्य भानेऽपि श्लेषमूलकाभेदाध्यवसायवशात् चमत्कारिणः विरोधिनः अर्थस्यापि भानमिति पण्डितराजः मतद्वयं प्रस्तौति[४]। विरोधाभासे विरोधमात्रस्य भानम् विभावनादिषु तु विरोधमूलकार्य-कारणभावादेरपि भानमिति विशेषः। प्रकृतमनुसरामः।

१. विरोधाभासालङ्कारः

आभासत्वे विरोधस्य विरोधाभास इष्यते।
विनापि तन्वि! हारेण वक्षोजौ तव हारिणौ।।[५]

---

१. ध्व.आ. पृ. १२२ २. ध्व.आ. पृ. १२२ ३. र.गं. पृ. ५७३, ५७४
४. र.गं. पृ. ५७४ ५. कु.आ. पृ. १०३

यत्र विरोधः आपाततः प्राथमिकोपस्थितिवेलायां भासमानः पश्चात् परिहृतः भवति, तत्र विरोधाभासालङ्कारः। **'विरोधश्चासौ आभासश्च'** इति व्युत्पत्त्या आभासरूपो विरोधः इत्यर्थः। **'विनाऽपि तन्वि! हारेण ...'** इत्याद्युदाहरणे हारेण विनाऽपि इति पदान्तरसान्निध्यात्, अपिकारेण च वक्षोजयोः हारित्वम्= हारवैशिष्ट्यम् इत्यर्थः प्रथमतः स्फूर्तस्सन् विरोधमावि-र्भावयति— हाररहितौ कथं हारविशिष्टाविति? ततः हारिपदश्लेषेण मनोहारिणौ इत्यर्थप्रतीतेः विरोधाभासः परिहारात्मा सिद्धो भवति।

२. विभावनालङ्कारः

१. विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।
अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम्।।[1]

अयञ्च विभावनालङ्कारः षड्विधः। तत्र प्रथमस्य लक्षणं निरूप्यते – यत्र विनापि कारणं कार्योत्पत्तिः निबध्यते, तत्र विभावना। **'कारणं विनापि कार्योत्पत्तिः'** इत्यस्यायमर्थः यत्— प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिरिति। अन्यथा कारणं विना कार्योत्पत्तेरेव अनुपपत्तेः। यथा **'अप्यलाक्षारसासिक्तम्...'** इत्याद्युदाहरणे लाक्षारससेकरूपप्रसिद्धकारणस्याभावेऽपि चरणद्वयगतरक्तिमरूपकार्योत्पत्तेः विभावना । अत्र च लाक्षारससेकाभावेऽपि लोहितमिति विरोधः। तत्परिहारश्च पादद्वन्द्वगतसहजारुण्यात् भवति।

२. हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता।
अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः।।[2]

न ह्येकं कारणं कार्यं प्रयोजयति। किन्तु कारणसामग्री। हेतूनां सामग्र्यस्य अभावेऽपि कार्योत्पत्तौ द्वितीयविभावनालङ्कारः। **'अस्त्रैरतीक्ष्णकठिनैः'** इत्याद्युदाहरणे जयं प्रति समग्रहेतूनां तीक्ष्णकठिनास्त्राणाम् अभावेऽपि जयरूपकार्योत्पत्तेः मन्मथकर्तृतया वर्णनात् द्वितीय-विभावनालङ्कारः। अत्र च तीक्ष्णकठिनास्त्राभावेऽपि जगज्जयः इति विरोधः । स च मन्मथस्य महिमातिशयात्, तीक्ष्णकठिनास्त्राणां बाह्यशारीरिकविजयहेतुत्वाद्वा परिह्रियत इति विभावनालङ्कारः।

३. कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके।
नरेन्द्रानेव ते राजन्! दशत्यसिभुजङ्गमः।।[3]

१. कु.आ. पृ. १०४ २. कु.आ. पृ. १०५ ३. कु.आ. पृ. १०६

प्रतिबन्धके सति कार्योत्पत्तिः तृतीया विभावना। यथा— **'नरेन्द्रानेव ते राजन्! ...'** इत्यादौ नरेन्द्रपदेन विषवैद्यराजरूपार्थद्वयोपस्थितौ, ततः विषवैद्यत्वेन अध्यवसित-राजरूपार्थोपस्थितौ, एवम् **'असिभुजङ्गमः'** इत्यत्र 'भुजङ्गमः एव असिः' इति व्युत्पत्त्या असित्वेन निश्चितभुजङ्गमरूपार्थोपस्थितौ, 'हे राजन्! विषवैद्यात्मकान् राज्ञः एव भुजङ्गमत्वेन निश्चितः असिः दशति' —इति विरोधगर्भः वाक्यार्थः। ततः 'प्रभून् एव ते भुजङ्गमसदृशः असिः दशति' —इति द्वितीयार्थस्वीकारेण विरोधपरिहारः।

४. **अकारणात् कार्यजन्म चतुर्थी स्याद्विभावना।**
शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम्।।[1] **पृ.** १०६ ।।

यत्र कारणभिन्नादपि कार्यमुत्पद्यते तत्र चतुर्थी विभावना। यथा— **'शङ्खाद्वीणा-निनादोऽयम्...'** इत्याद्युदाहरणे शङ्खात् लोके 'कम्बुकण्ठी' इत्यादिप्रसिद्धेः शङ्खत्वेन अध्यवसितात् कलकण्ठीकण्ठात् वीणानिनादः उदेति —इति अकारणात् कार्यजन्मलक्षणः चतुर्थीविभावनालङ्कारः विरोधगर्भः। तत्र च वीणानिनादपदेन साध्यवसानलक्षणया कण्ठ-ध्वनिरूपार्थस्वीकारात् 'कण्ठात् मधुरः कण्ठरवः उदेति' इत्यर्थस्वीकारेण विरोधपरिहारः।

५. **विरुद्धात् कार्यसम्पत्तिर्दृष्टा काचिद्विभावना।**
शीतांशुकिरणास्तन्वीं हन्त! सन्तापयन्ति ताम्।।[2]

यत्र विरुद्धात् कार्यसम्पत्तिः दृश्यते तत्र पञ्चमी विभावना। यथा—**'शीतांशु-किरणास्तन्वीम् ...'** इत्यादौ शीतांशुकिरणानां स्वतश्शीतलानां सन्तापहेतुत्वायोगात् विरोधः। तेषाञ्च सन्तापहेतुत्वस्य निबन्धात् पञ्चमी विभावना। वस्तुतः हिमकरकिरणानां सन्तापकत्वस्य विरहिलोकप्रसिद्धत्वात् शीतांशुकिरणेभ्योऽपि सन्तापोत्पत्त्युपपत्तिः।

६. **कार्यात् कारणजन्मापि दृष्टा काचिद्विभावना।**
यशः पयोराशिरभूत् करकल्पतरोस्तव।।[3]

यत्र कार्यादपि कारणम् उत्पद्यते तत्र षष्ठी विभावना। लोके पयोराशेः कल्पतरुरुत्पन्ना इति प्रसिद्धिरस्ति। परम् कल्पतरोः पयोराशेरुत्पत्तिर्नास्ति। अथापि तथा वर्णनात् अत्र कार्यात् कारणजन्मात्मिका षष्ठी विभावना। विरोधपरिहारस्तु विग्रहान्तरस्वीकारेण राज्ञः करात् (निस्सीमदानसन्तत्युत्पत्त्या) यशसः उत्पत्त्या भवति।

---

१. कु.आ. पृ. १०६ २. कु.आ. पृ. १०७ ३. तत्रैव

३. विशेषोक्त्यलङ्कारः

कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।
हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि।।[१]

यत्र पुष्कलकारणे सत्यपि कार्यस्य अनुत्पत्तिः वर्ण्यते, तत्र विशेषोक्त्यलङ्कारः। यथा **'हृदि स्नेहक्षयः...'** इत्युदाहरणम्। स्नेहक्षयं प्रति दीपः कारणम् अत्र दीपरूपस्य कारणस्य सत्त्वेऽपि स्नेहक्षयरूपकार्यस्य अनुत्पत्तेः वर्णनात्, विशेषोक्तिः विरोधगर्भः। स्मराभिन्ने दीपे सत्यपि हृदये स्नेहत्वेन अध्यवसितस्य प्रेम्णः क्षयः नाभूत् इत्यर्थस्वीकारेण विरोधपरिहारः। अत्र च विरोधपरिहारे 'स्नेह'पदश्लेषः, 'स्मरदीपे' इत्यत्र समासान्तरस्वीकारश्च उपयोगी।

४. असम्भवालङ्कारः

असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम्।
को वेद गोपशिशुकः शैलमुत्पाटयेदिति।।[२]

यत्र अर्थनिष्पत्तेः असम्भाव्यत्ववर्णना क्रियते, तत्र असम्भवालङ्कारः। **'को वेद गोपशिशुकः...'** इत्याद्युदाहरणे— 'शिशुना गोपेन शैलोत्पाटनं कर्तुमशक्यम्' इति शैलोत्पाटनरूपार्थस्य **'को वेद...'** इत्यादिना अर्थतः असम्भाव्यत्ववर्णनात् असम्भवालङ्कारः। शिशुना शैलोत्पाटनमत्र विरुद्धोऽर्थः। अत्र च भगवतो नन्दकिशोरस्य निरतिशयनिस्सीममहिमातिशयप्रभावेण शैलोत्पाटने सम्भाव्यतायाः स्वीकारेण विरोधपरिहारः अपि भवति।

५. असङ्गत्यलङ्कारः

अयमलङ्कारः त्रिविधः— १. कार्यहेत्वोः भिन्नदेशत्वलक्षणः एकः ।
२. अन्यत्र करणीयस्य अन्यत्र कृतिरूपः द्वितीयः ।
३. अन्यत् कर्तुं प्रवृत्तस्य तद्विरुद्धाचरणरूपः तृतीयः ।

१. **विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः ।**
विषं जलधरैः पीतं, मूर्च्छिताः पथिकाङ्गनाः।।[३]

अत्र विषपदस्य हालाहलरूपार्थस्वीकारे समग्रवाक्यस्थितपदार्थानां प्रतीतान्वयानुसन्धानेन 'जलधरैः हालाहलं पीतं कथं पथिकाङ्गनाः मूर्च्छिताः', विषपान-मूर्च्छयोः सामानाधिकरण्य-

१. कु.आ. पृ. १०८ २. तत्रैव ३. कु.आ. पृ. १०९

नियमात् —इति विरोधः स्फुरति। तस्य च परिहारः विषपदस्य जलरूपार्थस्वीकारेण। जलधैरः जलं सम्पूर्णतया पीतम् अर्थात् वर्षाकालः शिरसि–आरूढः। अतः कामिजनोद्दीपकत्वात् वर्षाकालस्य पथिकजनमूर्च्छा युक्तैवेति स्वभावतो विरोधपरिहारः।

२. **अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा।**
अपारिजातां वसुधां चिकीर्षन् द्यां तथाऽकृथाः ।।[१]

इति द्वितीयम्। अत्र कृष्णं प्रति शक्रस्य सोपालम्भवचने भुवि चिकीर्षिततया विद्यमानम् अपारिजातत्वं दिवि कृतम्। अतः अन्यत्र करणीयस्य अन्यत्र कृतिलक्षणः द्वितीयः विषमालङ्कारः। अत्र विरोधोद्भावनम् **'अपारिजाताम्'** इति शब्दमूलकम्। अत्र कृष्णस्य निन्दा— 'भवान् भुवम् अपगतारिजातां कर्तुमिच्छति, किन्तु सत्यभामासन्तोषणाय द्यां पारिजातवृक्षरहितामकरोत्', इति अर्थभेदस्य आदरोऽपि उपपद्यते। तथापि अन्यत्र करणीयस्य अन्यत्र कृतिरूपविरोधस्य ख्यापनार्थम्—**'भुवमपारिजातां चिकीर्षन् दिवमकार्षीः'** इति शब्दैक्यादेव विरोधस्य पुरस्फूर्तिकतया विरोधोपपादनार्थम् अर्थभेदः न स्वीक्रियते। तर्हि विरोधपरिहारः कथमिति चेत् उभयत्रापि अपगत–अरिजातत्वरूपार्थस्वीकारादेव विरोधपरिहारः। यतः भूलोके अवतीर्णेन भवता अपगत–अरिजातत्वं सम्पादितम्, 'अहो महाप्रभावशालिन् त्वं हे कृष्ण! '—इति विरोधनिन्दापरिहारात्मकः वाक्यार्थः पर्यवस्यति।

३. **अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा।**
गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्भेदं पुराऽकरोः ।।[२]

इति तृतीयोदाहरणे 'गोत्रोद्धार' इत्यत्र गोत्राशब्दः भूम्यर्थकस्त्रीलिङ्गशब्दः। 'गोत्रोद्भेदम्' इत्यत्र गोत्रशब्दस्य कुलपर्वताः इत्यर्थः।

एवञ्च अत्र अर्थद्वयानुसन्धानं परित्यज्य, लिङ्गभेदमपि परित्यज्य सामान्यतः आलोचनायां पुरस्फूर्तिकतया 'गोत्रोद्धारप्रवृत्तेन गोत्रोद्भेदः कृतः' इति विरुद्धः अर्थः प्रतीयते। उद्धार–उद्भेदयोः गोत्रात्मकैकपदार्थसम्बन्धिनोः परस्परविरुद्धत्वात्। एवञ्चात्र अन्यत् कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिलक्षणः तृतीयः असङ्गत्यलङ्कारः। विरोधपरिहारस्तु भुवः सागरात् उद्धरणे वराहरूपेण प्रवृत्तोऽपि स्वीयखुराघातेन कुलशिखरिणां दर्पं विदलितवान् इति भगवन्माहात्म्यपरार्थानुसन्धानेन सर्वात्मना विरोधपरिहारः।

---

१. कु.आ. पृ. ११०   २. तत्रैव

६. विषमालङ्कारः

१. विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः।
क्वेयं शिरीषमृद्वङ्गी, क्व तावन्मदनज्वरः।।[१]

यत्र अननुरूपयोः द्वयोरर्थयोः घटना वर्ण्यते तत्र विषमालङ्कारः। यथा— **'क्वेयं शिरीषमृद्वङ्गी...'** इत्याद्युदाहरणे शब्दतः 'शिरीषकुसुमपेशलशरीरविशिष्टा क्व? मदनज्वरः क्व?' —इति प्रतिपादनेऽपि तन्वीमदनज्वरयोः अत्यन्तमृदुत्व-अतिदुस्सहाभ्याम् एकत्र समावेशः न युक्तः इत्यर्थतः विरोधः प्रतीतः। एवञ्चात्र अननुरूपयोः संसर्गस्य वर्णनात् विषमालङ्कारः। अत्र च अननुरूपसंसर्गाख्यः विरोधः प्रथमः प्रतीतः अन्ततोऽपि नायिकायाः विरहापगतिपर्यन्तं तिष्ठत्येव, न च तस्य सर्वात्मना परिहारः। किन्तु विरहतापस्य तीव्रतातिशयप्रकटनेन तत्तात्पर्यकत्वेन कियताचिदंशेन विरोधस्य परिहारः। कालान्तरेऽपि एतत् वाक्यार्थभावनायां विरोधस्य स्फूर्तेः।

२. विरूपकार्यस्योत्पत्तिरपरं विषमं मतम्।।
कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका।।[२]

यत्र स्वकारणात् विलक्षणस्य कार्यस्य उत्पत्तिः तदपि विषमम्। यथा— **'कीर्तिं प्रसूते...'** इत्याद्युदाहरणम्। अत्र श्यामा तव कृपाणिका धवलां कीर्तिं प्रसूते —इति विरोधः। अत्र च श्यामजातीयात् धवलजातीयस्य उत्पत्तिवर्णनात् विरूपकार्योत्पत्तिलक्षणः विषमालङ्कारः। विरोधस्य परिहारस्तु निरन्तरशत्रुरक्तपानेन श्यामीकृता तव कृपाणिका। अत एव सा धवलां कीर्तिं प्रसूते इति।

३. अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्।
भक्ष्याशयाऽहिमञ्जूषां दष्ट्वाखुस्तेन भक्षितः।।[३]

यत्र इष्टार्थं क्रियमाणात् प्रयत्नात् न केवलमनिष्टस्य आप्तिः, अपि तु अनिष्ट-अवाप्तिश्च तत्र द्वितीयः विषमालङ्कारः। यथा— **'भक्ष्याशयाहिमञ्जूषाम्...'** इत्युदाहरणम्। अत्र भक्ष्याशया= भक्ष्यम् अभिलष्य, अहिमञ्जूषां दष्टवान् आखुः स्वयमेव अहेः भक्ष्यभावमुपगतः। अतः इष्टार्थप्रयत्नेन तद्विपरीतानिष्टोत्पत्तिलक्षणः प्रत्युत स्वानिष्टस्वहानिश्च वर्ण्यत इति तृतीयः विषमः। अत्रापि विरोधस्य परिहारः न दृश्यते।

---

१. कु.आ. पृ. ११२ २. तत्रैव ३. तत्रैव

७. समालङ्कारः

समालङ्कारः विषमप्रतिपक्षभूतः मम्मटेन नूत्नतया व्यतिरेकप्रेरणया कल्पितः[१] । समालङ्कारः त्रिविधः।

१. अनुरूपयोः संसर्गवर्णनात्मकः, २. कार्यकारणयोः सारूप्यात्मकः,

३. अनिष्टं विना अर्थं सम्पादयितुमिच्छतः किञ्चित् अनिष्टानुभवेन इष्टप्राप्तिलक्षणः तृतीयः। अनुरूपसंसर्गः इति लक्षणन्तु सर्वत्र समानम्।

१. **समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः।**
स्वानुरूपं कृतं सद्म हारेण कुचमण्डलम्।।[२]

इत्युदाहरणम्। अत्र **'हारेण कुचमण्डलं स्वानुरूपं सद्मकृतम्'** इत्यर्थस्य वर्णनात् हारकुचमण्डलयोः अनुरूपसंसर्गात्मकः समालङ्कारः।

२. **सारूप्यमपि कार्यस्य कारणेन समं विदुः।**
नीचप्रवणता लक्ष्मि! जलजायास्तवोचिता।।[३]

'नीचप्रवणता लक्ष्मी...' इत्युदाहरणे लक्ष्मीगतनीचप्रवणत्वरूपकार्यस्य अनुगुणतया जलजातत्वरूपकारणत्वस्य दर्शनात् समालङ्कारः। लोके जडजाः जडा एव दृश्यन्ते। अतः तादृशजलजातत्वं (जडजातत्वं) पुरस्कृत्य नीचप्रवणत्वरूपकार्यस्य प्रतिपादनात् कार्यकारणयोः साम्येन अनुरूप्यनिबन्धनात्मकः द्वितीयः समालङ्कारः।।

३. **विनाऽनिष्टञ्च तत्सिद्धिर्यमर्थं कर्तुमुद्यतः।**
युक्तो वारणलाभोऽयं स्यान्न ते वारणार्थिनः।।[४]

यत्र अनिष्टं विना कञ्चित् अर्थं सम्पादयितुम् उद्यतस्य किञ्चित् अनिष्टपूर्वकम् इष्टार्थसिद्धिर्भवति, तत्र समालङ्कारः। यथा- वारणार्थिनः= गजार्थिनः, वारणलाभः= निवारणलाभः न युक्तः स्यात् इत्यर्थप्रतिपादने सति, गजार्थिना केनचित् राजास्थनगमने दौवारिकेन तात्कालिकतया वारणे कृतेऽपि वारणस्य= गजस्य लब्धत्वात् वारणार्थिनः वारणेन घटनया अनुरूपसंसर्गात्मकः समालङ्कारः।

---

१. अ.स. (डा. रेवा प्रसादद्विवेदी, भूमिका) पृ. ४२
२. कु.आ. पृ. ११७
३. तत्रैव
४. कु.आ. पृ. ११८

यद्यप्यत्र विरोधपरिहारयोरपि अवकाशसद्भावात्, विरोधमूलकत्वं वक्तव्यम्, तथापि कविविवक्षायाः तृतीयसमप्रकारविषयप्रतिपादन एव सत्त्वात् तृतीयस्समालङ्कार एव इति मन्तव्यम्।

८. विचित्रालङ्कारः

विचित्रं तत्प्रयत्नश्चेद्विपरीतः फलेच्छया।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम्।।[१]

यत्र कस्यचित् फलस्य इच्छया तद्विपरीतः प्रयत्नः क्रियते तत्र विचित्रालङ्कारः। यथा-'**नमन्ति सन्तस्त्रैलोक्यात्...**' इत्याद्युदाहरणे त्रैलोक्यादपि समुन्नतेः लब्धुकामेन उन्नमनप्रयत्नं विहाय तद्विपरीतनमनविषयकयत्नस्यैव नमन्ति इत्याख्यातेन वर्णनात् विचित्रालङ्कारः।

९. अधिकालङ्कारः

१. **अधिकं पृथुलाधारादाधेयाधिक्यवर्णनम्।**
ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः।।[२]

यत्र पृथुलाधारात् आधेयस्य आधिक्यं वर्ण्यते तत्र अधिकालङ्कारः। '**ब्रह्माण्डानि जले...**' इत्युदाहरणे 'यत्र जले ब्रह्माण्डानि मान्ति' इत्यनेन बहुवचनोपात्तब्रह्माण्डानामपि जलस्य आधारतया वर्णनात्, आधारस्य पृथुलत्वं प्रतिपाद्यते। 'तत्र जले ते गुणाः न मान्ति' इत्यनेन आधेयभूतगुणानामाधिक्यं वर्णितम्। यद्यपि गुणानां ब्रह्माण्डान्तर्गतत्वेन ब्रह्माण्डाधारभूते जले अमानस्य नास्त्यवकाशः। तथापि 'न मान्ति' इति अमानस्य वर्णनात् विरोधः। आधेयभूत-गुणानामाधिक्यवर्णनेन अधिकालङ्कारश्च। गुणानामपरिच्छिन्नत्वतात्पर्यकत्वेन च आधिक्य-वर्णनस्य कियताचिदंशेन विरोधपरिहारोपपत्तिः।।

२. **पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतम्।**
कियद्वाग्ब्रह्म यत्रैते विश्राम्यन्ति गुणास्तव ।।[३]

पृथ्वाधेयात् आधाराधिक्यं यत्र वर्ण्यते तत्र अधिकालङ्कारः । पूर्वम् आधेयस्य आधिक्यं वर्णितम्, अत्र तु आधेयभूतगुणानामपरिच्छिन्नत्वेन कियद्वाग्ब्रह्म इति गुणाधारभूते वाग्ब्रह्मणि आधिक्यवर्णनात् अत्र आधेयापेक्षया आधारस्याधिक्यवर्णनात्मकः अधिकालङ्कारः।

१. कु.आ. पृ. १२० २. तत्रैव ३. कु.आ. पृ. १२१

१०. अल्पालङ्कारः

अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता।
मणिमालोर्मिका तेऽद्य करे जपवटीयते।।[१]

यत्र सूक्ष्मादाधेयात् आधारस्य अतिसूक्ष्मता वर्ण्यते, तत्र अल्पालङ्कारः। अयञ्चालङ्कारः अधिकप्रतिपक्षभूततया दीक्षितेन नूतनतया कल्पितः। कस्याश्चित् नायिकायाः विरहावस्थावर्णनपरे **'मणिमालोर्मिका ...'** इत्यादिपद्ये, **'ते करे ऊर्मिका जपमाला इव आचरति'** इत्यर्थवर्णमनात्मके आधेयभूतमणिमालोर्मिकापेक्षयापि आधारस्य वस्तुतः स्थूलत्वेन स्थातव्यस्य, सूक्ष्मतया वर्णनात् अल्पालङ्कारः। अत्र च यद्यपि विरोधः अस्ति तथापि विरहिणीस्वाभाव्यात् परिह्रियते।

११. अन्योऽन्यालङ्कारः

अन्योऽन्यं नाम यत्र स्यादुपकारः परस्परम्।
त्रियामा शशिना भाति शशी भाति त्रियामया।।[२]

यत्र द्वयोः परस्परोपकार्योपकारकभावः वर्ण्यते, तत्र अन्योऽन्यालङ्कारः। यथा— **'त्रियामा शशिना भाति...'** इत्याद्युदाहरणे सकलजगत्प्रकाशकस्य शशिनः त्रियामा-प्रकाशकत्वं प्रतिपादितम्। तद्युक्तमेव। किन्तु रात्र्या शशी कथं भाति ? इति प्रश्नः तथैव तिष्ठतीति विरोधः। तस्य च परिहारः शशित्रियामयोः सद्दाम्पत्यभावमापन्नयोरिव परस्परप्रकाश्य-प्रकाशकभावस्य सद्भावात् उपपद्यते।

१२. विशेषालङ्कारः

अयञ्च त्रिविधः— १. ख्याताधारं विनापि आधेयवर्णनात्मकः ।
२. एकस्यैव वस्तुनः एकस्मिन्नेव काले अनेकत्र वर्णनात्मकः ।
३. किञ्चिद्विषयकप्रयत्नात् अशक्यवस्त्वन्तरलाभात्मकः चेति।

१. विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्।
गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः।।[३]

इत्युदाहरणे सूर्यकिरणानां प्रसिद्धसूर्याधाराणां दीपस्थत्वेन वर्णनात्, आधारं विनापि आधेयवर्णनात्मकः विशेषालङ्कारः। रात्रौ सवितृकिरणानामग्निप्रवेशस्यागमिकत्वेन दीपकान्तिः सूर्यकान्तिरेव भवतीति, तदवच्छिन्नसूर्यस्थत्वात् दीपकान्तीनां विरोधपरिहारः ।।

---

१. कु.आ. पृ. १२१ २. कु.आ. पृ. १२२ ३. कु.आ. पृ. १२३

२. विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते।
अन्तर्बहिः पुरः पश्चात् सर्वदिक्ष्वपि सैव मे ।।[१]

इति द्वितीयविशेषोदाहरणे एकस्या एव नायिकायाः 'बहिः पुरः सर्वदिक्षु च' भावना सहकृतचक्षुषा, 'अन्तः पश्चाच्च' मनसा एकस्या एव नायिकायाः दर्शनात् एकस्यैव वस्तुनः अनेकत्र अवस्थितत्वेन वर्णनात्मकः द्वितीयो विशेषः। अत्र च एकाधिकरणसम्बद्धं वस्तु एकस्मिन्नेव काले अनेकत्र दृश्यत इति विरोधः। मानसिकशक्तिबलात् भावनाबलात् तत्साध्यमिति विरोधस्य परिहारः।

३. किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च सः।
त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणम्।।[२]

अत्र केवलराजदर्शनमेव मया सङ्कल्पितम्, अपि तु कल्पवृक्षनिरीक्षणमेव मया लब्धमिति सङ्कल्पितात् अधिकस्य अशक्यलाभस्य वर्णनात् अत्र तृतीयः विशेषालङ्कारः। राजदर्शनप्रवृत्तस्य कल्पवृक्षदर्शनभावनया देशान्तरप्राप्तिभ्रमात् विरोधः सञ्जातः। राजः कल्पवृक्षत्वानुसन्धानेन राजत्वस्यापि अनुसन्धानात् भ्रमनिवृत्त्या विरोधनिवृत्तिः।

१३. व्याघातालङ्कारः

१. स्याद्व्याघातोऽन्यथाकारि तथाऽकारि क्रियेत चेत्।
यैर्जगत्प्रीयते, हन्ति तैरेव कुसुमायुधः।।[३]

यत् यत्साधनत्वेनावगतं तत्केनचित् तद्विरुद्धसाधनं क्रियेत चेत् तर्हि व्याघातालङ्कारः। **'यैर्जगत्प्रीयते...'**इत्याद्युदाहरणे जगत्प्रीणनसाधनत्वेन प्रसिद्धानां कुसुमानां कुसुमायुधस्य हननसाधनत्वेन वर्णनात् व्याघातालङ्कारः। कुसुमानि हननसाधनानि इति विरोधः, विरहिस्वाभाव्यात् परिहृतः।

२. सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी।
दया चेद्बाल इति मय्यपरित्याज्य एव ते।।[४]

यत्र सौकर्येण निबद्धा क्रियैव कार्यविरोधिनी भवति, तत्र द्वितीयव्याघातालङ्कारः। यथा— **'दया चेत् बाल इति...'** इत्यादिपद्ये कस्यचित् राज्ञः युद्धसन्दर्भे— युद्धायागन्तुं प्रवृत्तं पुत्रं प्रति राज्ञा **'त्वं बालः मास्तु'** इत्युक्ते सति, बालत्वादेव अहम् अपरित्याज्यः इति सौकर्येणोक्तस्य बालत्वस्य, त्यागप्रतिबन्धकत्वेन वर्णनात् द्वितीयः व्याघातालङ्कारः।

तदित्थं विरोधगर्भाः अलङ्काराः निरूपिताः। अथ शृङ्खलाबन्धमूलालङ्काराः निरूप्यन्ते।

---

१. कु.आ. पृ. १२३ २. कु.आ. पृ. १२४ ३. तत्रैव ४. तत्रैव

III. शृङ्खलाबन्धमूलकाः

कारणमाला-एकावली-मालादीपक-साराख्याः चत्वारः अलङ्काराः शृङ्खलाबन्ध-मूलकाः। एषु व्यङ्ग्यसौभाग्यम् उदाहरणस्वाभाव्येनैव व्यवस्थितम्, न अलङ्कारशरीरप्रयुक्तम्।

१. कारणमालालङ्कारः

'गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः।'

इति कारणमालायाः लक्षणम्। प्राक् नाम पूर्वम्, प्रान्त नाम उत्तरम्। यथाप्राक्प्रान्तं नाम पूर्वोत्तरम् अनतिक्रम्य इत्यर्थः। **'कारणैः'** इति बहुवचनबलात् **'यथाप्राक्प्रान्तकारणैः'** इत्यनेन-**'पूर्वपूर्वं प्रति कारणैः उत्तरोत्तरं प्रति कारणैः च'** इत्यर्थः लभ्यते। एवञ्च उत्तरोत्तरकारणभूतैः पूर्वपूर्वैः, पूर्वपूर्वकारणभूतैः उत्तरोत्तरैर्वा वस्तुभिः यत्र गुम्फः रचना प्रचलति, तत्र कारणमालालङ्कारः। यथा—

'नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः।।'[1]

इत्युदाहरणे उत्तरं यशः प्रति पूर्वस्य त्यागस्य, तथा उत्तरं त्यागं प्रति पूर्वस्याः श्रियः, तथा उत्तरं श्रियं प्रति नयस्य च कारणत्वेन उपनिबन्धात् अत्र कारणमालाङ्कारः। परम् अत्र एतादृश-कार्यकारणमालोपनिबन्धे कविव्यापारस्य सुन्दरस्य अदर्शनात् कदाचित्, सामान्यवक्त्रा नयज्ञेन-अचतुरेणापि एतादृशकारणमालायाः उपनिबद्धुं शक्यत्वात्, एतदुदाहरणमात्रेण अत्र अलङ्कारत्वं वक्तुं न शक्यते। तथापि कियताचित् अर्थसौन्दर्येण अनुभूयमानेन गुण एवायमलङ्कारः।

२. एकावल्यलङ्कारः

गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता।
नेत्रे कर्णान्तविश्रान्ते कर्णौ दोः स्तम्भदोलितौ।।

दोःस्तम्भौ जानुपर्यन्तप्रलम्बनमनोहरौ।
जानुनी रत्नमुकुराकारे तस्य हि भूभुजः।।[2]

यत्र उत्तरोत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः, पूर्वपूर्वस्य उत्तरोत्तरविशेषणभावो वा वर्ण्यते तत्र एकावल्यलङ्कारः। एतादृशवर्णनस्यैव गृहीतमुक्तरीतिः इति नाम। पूर्वोक्तोदाहरणे कस्यचित् राज्ञः विशिष्टलक्षणवर्णनपरे, नेत्रयोः कर्णान्तविश्रान्तत्वं प्रतिपादितम्। तत्र च अन्तविश्रान्तत्वद्वारा प्रथमतः नेत्रयोः विशेषणत्वेन गृहीतस्यैव कर्णपदार्थस्य, पश्चात् कर्णपदार्थे विशेष्यभावस्वीकाराय

१. कु.आ. पृ. १२५ २. कु.आ. पृ. १२६

पूर्वगृहीतविशेषणत्वस्य त्यागात् गृहीतमुक्तरीतिः। अत्र च राज्ञः नेत्रकर्णदोस्तम्भजानूनां मध्ये उत्तरोत्तरस्य पूर्वपूर्वविशेषणभाववर्णनात् तेन च राज्ञः अतिशयितसौन्दर्योपयोगिनः परस्परसंहत-सलक्षणावयवविन्यासस्य अत्र प्रतीतेः, तदङ्गत्वाच्च एकावल्यलङ्कारस्य अलङ्कारता।

३. मालादीपकालङ्कारः

दीपकैकावलीयोगान्मालादीपकमिष्यते।
स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः।।[१]

वर्ण्यावर्ण्ययोः सुन्दरं धर्मैक्यं दीपकम्, गृहीतमुक्तरीतिः एकावली। अतः द्वयोः सम्मेलनेन हरिद्रा-सुधयोः सम्मेलनेन अपूर्वरक्तरूपोत्पत्तिरिव दीपक-एकावलीयोगात् विच्छित्तिवैचित्र्येण (=सौन्दर्यविशेषेण) मालादीपकालङ्कारस्याविर्भावः। 'स्मरेण हृदये' इत्याद्युदाहरणे 'स्थितिः' इति एकं पदं दीपकम्। तस्य अत्रत्य अवान्तरवाक्यार्थद्वये अन्वयेन वाक्यद्वयस्य निष्पत्तिः। यथा— स्मरेण तस्याः हृदये स्थितिः कृता, तेन = अधिष्ठितस्मरेण हृदयेन त्वयि स्थितिः कृता इति वाक्यार्थः। अत्र च गृहीतमुक्तरीत्या **'हृदये तेन'** इत्यत्र पूर्वं गृहीतस्य आधारत्वस्य तेन-हृदयेन इति हृदयनिष्ठकर्तृत्वाभिधानेच्छया त्यागात्, **'स्थितिः कृता'** इति दीपकस्य च सद्भावात्, मालादीपकालङ्कारः। अयमप्यलङ्कारः मम्मटेन दीपकप्रभेदेषु उदाहृतः। अत्र च उदाहरणानुरोधेन मन्मथाधिष्ठितहृदयस्य नायके स्थितेः वर्णनेन शृङ्गाररसोपस्कारकत्वात् अलङ्कारता इति, उदाहरणानुसारेण अलङ्कारता।

४. सारालङ्कारः

उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते।
मधु मधुरं तस्माच्च सुधा तस्याः कवेर्वचः।।[२]

यत्र पूर्वस्मात् पूर्वस्मात् पदार्थात् उत्तरत्र उत्तरत्र उत्कर्षः वर्ण्यते, तत्र सारालङ्कारः। यथा— **'मधु मधुरम्'** इत्याद्युदाहरणे मधुनः माधुर्यमुक्त्वा, तस्मात् सुधायाः मधुरतरत्व-प्रतिपादनात्, तस्याः अपि कवेः वचसः मधुरतमत्वस्य प्रतिपादनात् अयं सारालङ्कारः। सारालङ्कारे च वर्ण्यमानान्तिमपदार्थे प्रायशः तज्जातीयेभ्यः पदार्थेभ्यः उत्कृष्टत्वं ध्वन्यते। तदुपस्कारकत्वाच्च सारस्य अलङ्कारता । अत्र सर्वत्रापि शृङ्खलाबन्धमूलकेषु अलङ्कारेषु पदार्थयोः पदार्थानां वा उत्तरोत्तरस्मिन् अन्वयः शृङ्खलाघटकसुवर्णखण्डानामिव दृश्यते। अतः शृङ्खलामूलकत्वम्।

---

१. कु.आ. पृ. १२६ २. कु.आ. पृ. १२७

इत्थं निरूपणीयाः शृङ्खलाबन्धमूलकाः अलङ्काराः निरूपिताः । अथ तर्कन्यायमूलकाः अलङ्काराः निरूप्यन्ते ।

IV. तर्कन्यायमूलकौ

तर्कन्यायो नाम तार्किकानां युक्तिः। चतुर्विधप्रमाणेषु अनुमानं युक्तिः इति वक्तुं शक्यते। यतो हि— प्रत्यक्षार्थस्य तत्तदिन्द्रियरूपप्रत्यक्षप्रमाणेन ग्रहणेऽपि परोक्षार्थस्य हेतुबलान्निश्चेयस्य सिद्धिः अनुमानादेव भवति। तत्र अनुमानं समर्थकयुक्तिः। समर्थकयुक्तेः कविव्यापाराश्रयत्वे काव्यलिङ्गम्। व्याप्तिपक्षधर्मतादिविशिष्टहेतुरूपत्वे तु 'सति कविव्यापारे' अनुमानालङ्कारः।

१. काव्यलिङ्गालङ्कारः

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।
जितोऽसि मन्द! कन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः ।।[१]

समर्थनीयस्यार्थस्य यत्र समर्थनं प्रचलति, तत् काव्यलिङ्गम्। समर्थ्यसमर्थकभावस्य काव्यलिङ्ग इव अर्थान्तरन्यासे सत्त्वेऽपि काव्यलिङ्गे सामान्यविशेषभावः समर्थ्यसमर्थकयोः नास्ति। अर्थान्तरन्यासे त्वस्तीति विशेषः। यथा— **'जितोऽसि मन्द! कन्दर्प!...'** इति लक्ष्ये कन्दर्पजयः कश्चित् दुष्करो विषयः। स च समर्थनसापेक्षः । तस्य च (मन्मथदाहकः) **त्रिलोचनः मच्चित्ते अस्ति** इति वाक्यार्थेन समर्थ्यमानत्वात् वाक्यार्थहेतुककाव्यलिङ्गालङ्कारः। **'युष्मत् सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निलीयामहे'**[२] इति पद्यभागे तु मोक्षस्य महामोहत्वम् अप्रसिद्धम्, उपपादनसापेक्षञ्च। मोक्षस्य च भस्मविलेपनादिश्लोक-पूर्वार्धोपात्तपदार्थसंसेवनसुखोच्छेदित्वात्, सुखोच्छेदित्वरूपपदार्थस्य मोक्षगतमहामोहत्व-समर्थकत्वात् पदार्थहेतुकः काव्यलिङ्गालङ्कारः।

अत्र च अप्पय्यदीक्षितेन परिकरात् काव्यलिङ्गस्य अत्यन्तसुन्दरः भेदः प्रतिपादितः। तथा हि— परिकरालङ्कारेऽपि साभिप्रायपदार्थवाक्यार्थविन्यासात्, तस्य च समर्थकत्वात् द्वयोरैक्यं प्रसज्येत इति चेत्, अत्रेदं दीक्षितस्य समाधानम्— परिकरे विशेषणसाभिप्रायत्व-व्यङ्ग्यस्य साक्षात् समर्थ्योपपादकत्वम्। अत्र तु व्यङ्ग्यस्य वाच्ये समर्थकपदार्थेऽन्वये, तस्यैव समर्थकत्वम् इति विशेषः। यतो हि 'सुधाशुं कलितोत्तंसः' इत्यादिपरिकरे विशेष्यशिवापेक्षयाऽपि विशेषणीभूतस्य व्यङ्ग्यस्य अमृतनिधित्वस्यैव तापहरणक्रियायामन्वयः।

---

१. कु.आ. पृ. १३७ २. तत्रैव

काव्यलिङ्गालङ्कारे तु मन्मथदाहकत्वविशिष्टहृदयगतत्रिलोचनसद्भावरूप-वाक्यार्थस्यैव जयोपपादकत्वेन साभिप्रायविशेषणस्य साक्षात्समर्थकत्वाभावात् परिकरात् काव्यलिङ्गस्य भेदः। काव्यलिङ्गे परिकरमुत्थापकमेव, न उत्थापितः परिकरः[1]।

एवञ्च परिकर इव काव्यलिङ्गे व्यङ्ग्यस्य सद्भावेऽपि, परिकरे साक्षात् व्यङ्ग्यस्य प्रकृतक्रियान्वयित्वम् अथवा विशेष्यमपि तत्र व्यङ्ग्यरूपेण परिणमय्य प्रकृतार्थोपयोगि भवति। काव्यलिङ्गे तु व्यङ्ग्यस्य मन्मथदाहकत्वादेः त्रिलोचनादिविशेष्यान्वयित्वेनैव अर्थात् विशेष्यस्य व्यङ्ग्ये मन्मथदाहकत्वे विलयनं विनैव विशेषणीभूतव्यङ्ग्यमन्मथदाहकत्वस्येव विशेष्यस्य त्रिलोचनपदार्थस्यापि मन्मथभयोत्पादकत्वेन प्रकृतजयोपपादकत्वात् वाच्यव्यङ्ग्ययोः समप्राधान्येन गुणीभूतव्यङ्ग्यत्वम्।

२. अनुमानालङ्कारः

व्याप्तिपक्षधर्मतादिविशिष्टो हेतुः कविव्यापारसंवलितश्चेत् अनुमानालङ्कारो भवति। अस्य च कुवलयानन्दे लक्षणं नोक्तम् । तथापि———

यथा रन्ध्रं व्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ।
यथा विद्युज्ज्वालोल्लसितपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः ।।[2]

इत्याद्यनुमानोदाहरणे **यथा तथा** इति पदयोः अनुमानवाचकत्वम्[3]। **'तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः'** इति श्लोकान्तपादे 'पथिकतरुखण्डः स्मरदवविशिष्टः' इत्यनुमितेः 'चलजलदधूमपूरितव्योम्नः' इत्यादिहेतुभिः साधनात् अनुमानालङ्कारः। विरहिविरहोद्दीपकवर्षर्तु-प्रभावस्य अनुमानभङ्गिम्ना वर्णनात् अनुमानालङ्कारः।

इदानीं वाक्यन्यायमूलकालङ्काराः निरूप्यन्ते।

---

१. कु.आ. पृ. १३९
२. कु.आ. पृ. १८७
३. कु.आ.अ.चं. पृ. १८७
यथाशब्दस्तु निर्दिष्टः तुल्ययोगानुमानयोः इति अलङ्कारचन्द्रिकाकारैः विश्वकोशोदाहरणात् ।

V. वाक्यन्यामूलकालङ्काराः

अस्मिन् वर्गे यथासङ्ख्यादयः समाध्यन्ताः अष्टौ अलङ्काराः भोलाशङ्कर-व्यासमहाशयसूचिताः अपि च कारकदीपकालङ्कारश्च अन्तर्भवन्ति। अर्थापत्तिः कुवलयानन्द-चन्द्रालोकक्रमानुसारेण अन्ते निवेश्यते। कारकदीपकञ्च समुच्चयादनन्तरं निवेश्यते। एवञ्च वाक्यन्यायमूलकाः नव अलङ्काराः विद्यन्ते ।

१. यथासङ्ख्यालङ्कारः

यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयः।
शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय।।[1]

वाक्यं नाम पदसमूहः। तत्र पदानां वाक्यस्थानाम् उद्देश्यविधेयादितत्तदर्थबोधकत्व-स्वाभाव्येन अवस्थितानां क्रमेण सम्बन्धे यथासङ्ख्यालङ्कारः। क्रमसन्निविष्टानां पदानां क्रमेण अन्वये यथासङ्ख्यम्। यथा— 'शत्रुं मित्रं विपत्तिञ्च' इत्यत्र 'शत्रुं जय, मित्रं रञ्जय, विपत्तिं भञ्जय' इत्येवम् उद्देश्यविधेयपदयोः क्रमेण अवस्थितयोः क्रमेण सम्बन्धे यथासङ्ख्यालङ्कारः। परमत्र अर्थबोधानुकूलतया पदानां क्रमसन्निवेशः यथासङ्ख्यात्मकशास्त्रीयुक्तिप्रयुक्तः केवलमत्र यथासङ्ख्याश्रवणेन किमपि सौन्दर्यं नास्तीति, यथासङ्ख्यस्य अलङ्कारत्वं कविव्यापारमन्तरा नास्ति। अत्र व्यङ्ग्यकृतं सौन्दर्यमपि नोपलक्ष्यते। अतः केवलमयम् एतादृशोदाहरणानुसारेण वाक्यन्यायमूलक एव गौणः अलङ्कारः। अयमेव **क्रमालङ्कारः** इति वामनेन संज्ञितः।

२. पर्यायालङ्कारः

अयञ्च पर्यायः द्विविधः ।

१. **पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः।**
पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा।।[2]

एकस्य क्रमेण अनेकाधारसंश्रयणं **प्रथमः पर्यायः**। यथा -**'पद्मं मुक्त्वा गता...'** इति पद्ये कामिनीवदनसादृश्यस्य प्रथमं पद्माश्रयणस्य, ततः तन्मुक्त्वा चन्द्राश्रयणस्य च वर्णनात् पर्यायालङ्कारः। अत्र च एकस्य आधेयस्य कामिनीवदनौपम्यस्य अतृप्ततां पुरस्कृत्य पद्मं मुक्त्वा चन्द्राश्रयणस्य प्रतिपादनात्, एकस्य पदार्थस्य कमेण अनेकाधारैः सम्बन्धलक्षणः व्यङ्ग्यस्पर्शशून्यः पर्यायालङ्कारः। पूर्वत्र यथासङ्ख्ये सम्बन्धिवाचकपदयोः अनेकयोर्मध्ये

१. कु.आ. पृ. १२८ २. कु.आ. पृ. १२६

एकतरस्य अन्यतरेण क्रमेण सम्बन्धः, अत्र तु एकस्यैव पदार्थस्य अनेकाधारात्मकपदार्थैः क्रमेण सम्बन्धः इति विशेषः ।

पर्यायालङ्कारस्य प्रदर्शितोदाहरणानुरोधेन उपमानविषयिणी असंतृप्तिः ध्वन्यते। तेन च कामिनीवदनस्य अन्येन साम्यं क्लेशतः उपपाद्यमिति अभिव्यज्यते। तस्य च पर्यायालङ्कारः उपस्कारकः । अपि च—

एकस्मिन् यद्यनेकं वा पर्यायः सोऽपि सम्मतः ।
अधुना पुलिनं तत्र यत्र स्रोतः पुराऽजनि ।।[१]

इति लक्षणेन लक्षिते **'अधुना पुलिनं तत्र ...'** इति कालप्रयुक्तप्रकृतिपरिणामवर्णनात्मके लक्ष्ये एकस्मिन्नेव आधारे स्रोतसि कालक्रमेण पुलिनस्रोतसोः वर्णनात् पर्यायालङ्कारः। अत्र तु द्वयोराधेययोः एकेन आधारेण कालक्रमेण सम्बन्धः। अत्रापि पदार्थसम्बन्धस्य वाक्यीयन्याय-प्रयुक्तत्वात् वाक्यन्यायमूलकता। व्यङ्ग्यस्य कस्यचित् स्फूर्तावपि अप्रस्तुतप्रशंसाभङ्गिम्नैव स्फुरणात् द्वितीयपर्यायप्रयोज्यं व्यङ्ग्यसौन्दर्यं नानुभूयते। अतः अत्रापि गौणालङ्कारता।

३. परिवृत्त्यलङ्कारः

परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः।
जग्राहैकं शरं मुक्त्वा कटाक्षात् स रिपुश्रियम्।।[२]

यत्र न्यूनेन अधिकस्य अधिकेन न्यूनस्य वा विनिमयः भवति, तत्र परिवृत्त्यलङ्कारः। वाणिज्यशास्त्रीयव्यवहारेषु 'माषान् दत्वा मुद्गानां, मुद्गान् दत्वा माषाणाञ्च' मिथः विनिमयस्य दर्शनात् परिवृत्त्यलङ्कारः वाणिज्यशास्त्रन्यायमूलकः। **'जग्राहैकं शरं मुक्त्वा...'** इत्युदाहरणे राजा कटाक्षपूर्वकशरात्मकं न्यूनं वस्तु दत्वा रिपुसम्पदम् अधिकं स्वीकृतवान् इति वर्णनात् परिवृत्त्यलङ्कारः। अयञ्चालङ्कारः राजगतविजयोत्साहपरिपोषकः।

४. परिसङ्ख्यालङ्कारः

परिसङ्ख्या निषिध्यैकमेकस्मिन् वस्तु यन्त्रणम्।
स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम्।।[३]

यत्र एकस्मिन् वस्तुनि एकं निषिध्य अन्यत्र तद्वस्तु नियन्त्रितं भवति तत्र परिसङ्ख्यालङ्कारः। इयं च परिसङ्ख्या न मीमांसाशास्त्रे प्रसिद्धा, परिसङ्ख्या। किन्तु

१. कु.आ. पृ. १३०   २. तत्रव   ३. कु.आ. पृ. १३१

बौद्धदर्शनेषु प्रसिद्धज्ञानसदृशी। यथा— **'नेदं रजतम्'** इत्यत्र रजते इदन्तायाः प्रतिषेधेन इदमि रजतैक्यं बाधितं सत् विज्ञानम् आश्रयतया अवलम्बते। अत एव रजते तन्मते विज्ञानधर्मः। एवमेव अत्रापि नतभ्रुवां स्वान्तेषु बाधितः स्नेहक्षयः प्रदीपेषु विश्राम्यति। एवञ्च 'नतभ्रुवः कदापि स्नेहक्षयशीलाः न' इति व्यङ्ग्यः अर्थः परिस्फुरति, स्नेहक्षयस्य आश्रयलाभात्। तदुपस्कारकत्वाच्च परिसङ्ख्यायाः अलङ्कारता।

५. विकल्पालङ्कारः

विरोधे तुल्यबलयोः विकल्पालङ्कृतिर्मता ।
सद्यः शिरांसि चापान्वा नमयन्तु महीभुजः ।।[१]

अयञ्च विकल्पः 'तुल्यबलयोः विरोधो विकल्पः' इति शास्त्रन्यायमूलकः। यदा हि—'अतिरात्रे षोडशिनं गृह्णाति' इत्यस्य प्रामाण्यं स्वीक्रियते, तदा 'नातिरात्रे षोडशिनं गृह्णाति' इत्यस्य प्रामाण्यं स्वीकर्तुं न शक्यते। अतः शाखाभेदेन तुल्यबलत्वात् केचित् षोडशिग्रहणम् अन्ये च तदभावम् अनुतिष्ठन्ति। एवमेव नीतिशास्त्रेऽपि 'युद्धाय गन्तव्यम्', उत 'युद्धान्निवर्तनीयम्' —इति सन्देहे प्रसक्ते **'समाक्रान्तो बलवता काङ्क्षन् अभ्रंशिनीं श्रियम् श्रयेत वैतसीं वृत्तिम्'**[२] इति प्रसिद्धनीतिशास्त्रानुसारेण युद्धात् निवृत्तिः 'समरमुखे करहाटवत् धनुर्वा' इति नयेन चापनमनं वा कर्तव्यमिति सन्देहे, द्वयोरपि नीतिबोधकत्वेन तुल्यप्रामाण्यात् आत्मनः शक्तिमनुसृत्य व्यवहारः कर्तव्यः इति नीतिशास्त्रमुपदिशति। एवञ्च **'सद्यः शिरांसि चापान् वा...'** इति विकल्पोदाहरणे शास्त्रमात्रप्रसिद्धविकल्परूपार्थोपनिबन्धात् सौन्दर्यहेतु-भूतार्थस्याभावात् गौणालङ्कारतैव।

६. समुच्चयालङ्कारः

१. **बहूनां युगपद्भावभाजां गुम्फः समुच्चयः।**
नश्यन्ति पश्चात् पश्यन्ति त्रस्यन्ति च भवद्द्विषः ।।[३]

इति समुच्चयलक्षणम्। यौगपद्यमापन्नानां बहूनामेकत्र निबन्धः समुच्चयः। यथा— **'नश्यन्ति पश्चात् पश्यन्ति...'** इत्युदाहरणे नाश-दर्शन-त्रासानां दर्शन-त्रास-नाशात्मना क्रमस्य सद्भावेऽपि, राज्ञः प्रतापातिशयविवक्षया अक्रमत्वेन यौगपद्येन नाश-दर्शन-त्रासानामुपनिबन्धात् समुच्चयालङ्कारः। अत्र च समुच्चयस्य ध्वन्यमानराजप्रतापातिशयोपस्कारकत्वात् अलङ्कारता।

१. कु.आ. पृ. १३१ २. चि.मी. पृ. २१० ३. कु.आ. पृ. १३२

२. अहं प्राथमिकाभाजामेककार्यन्वयेऽपि सः।
कुलं रूपं वयो विद्या धनञ्च मदयन्त्यमुम् ।।[१]

अहं प्राथमिकभावमापन्नानां पदार्थनां यत्र एककार्यान्वयः तत्र द्वितीयस्समुच्चयः ।१. यथा—'**कुलं रूपं वयो विद्या ...**' इति द्वितीयसमुच्चयोदाहरणे कुल-रूप-वयो-विद्या-धनानाम् अहमहमिकया मादकत्वेऽन्वयात् समुच्चयालङ्कारः। अत्र च मादकत्वसाम्यं वाच्यानां कुलादीनां व्यङ्ग्यम्। व्यङ्ग्यस्य च साम्यस्य वाच्यमादकत्वोपस्कारकत्वात् गुणीभूतव्यङ्ग्यत्वम्। समुच्चयस्य वाक्यन्यायमूलकत्वं प्रसिद्धमेव।

७. कारकदीपकालङ्कारः

क्रमिकैकगतानान्तु गुम्फः कारकदीपकम् ।
गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति ।।[२]

यत्र क्रमिकानाम् = क्रमसन्निविष्टानाम्, एकगतानाम्= एककारकगतानाम्, गुम्फः= निबन्धनं भवति, तत्र कारकदीपकालङ्कारः। यथा— '**गच्छत्यागच्छति पुनः...**' इति कारकदीपकोदाहरणे पान्थात्मक-एककारकगतत्वेन गमन-आगमन-दर्शन-प्रश्नरूपाणां क्रमसन्निविष्टानां क्रियाणां वर्णनात् कारकदीपकालङ्कारः। अयञ्च कारकदीपकालङ्कारः काव्यप्रकाशकृता दीपकप्रकरण एव उदाहृतः। एवं क्रमन्यायेन एककारकगतत्वेन क्रियाणामुपनिबन्धेऽपि तस्य कारकदीपकस्य लौकिकवार्तावत् अनलङ्कारतैव। यद्यत्रैव कविव्यापारः कश्चित् कल्प्येत अस्य अलङ्कारत्वं सुस्थमेव। एवं सति यथास्थितोदाहरणे व्यङ्ग्यम् आरदेव। यथासङ्ख्यन्यायस्य च वाक्यन्यायमूलत्वात् वाक्यन्यायमूलोऽयमलङ्कारः।

९. समाध्यलङ्कारः

समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः ।
उत्कण्ठिता च तरुणी जगामास्तञ्च भानुमान्।।[३]

इति समाधिलक्षमम्। सहकारिकारणसमवधानात् कार्यनिष्पादने अत्यन्तं सौकर्यम् इति तार्किकसमयः। ततश्च तर्कशास्त्रमूलः एष अलङ्कारः। यद्यपि पदार्थतत्त्वविवेचकं तर्कशास्त्रम्। तथापि वाक्यार्थज्ञानस्य पदार्थज्ञानाधीनत्वात् तर्कन्यायमूलकस्यापि वाक्यार्थन्यायमूलकत्वम्। '**उत्कण्ठिता च तरुणी**' इति समाध्युदाहरणे तरुणीगतोत्कण्ठायाः कार्यं तरुणसमागमः। तत्र

१. कु.आ. पृ. १३३   २. तत्रैव   ३. कु.आ. पृ. १३४

च सूर्यास्तमयस्य सहकारिकारणत्वेन उद्दीपनकारणत्वेन उपनिबन्धात् अयं समाच्चयलङ्कारः। अत्र च शृङ्गारं प्रति समाच्चयालङ्कारस्य उपस्कारकत्वात् अलङ्कारता।

९. अर्थापत्त्यलङ्कारः

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।
स जितस्त्वन्मुखेनेन्दुः, का वार्ता सरसीरुहाम्।।[१]

सामान्यतः अर्थापत्तिः नाम उपपाद्यज्ञानेन उपपादककल्पना । यथा— **'पीनो देवदत्तः ...'** इत्यादौ उपपाद्यपीनत्वज्ञानेन उपपादकरात्रिभोजनकल्पना । अयं काव्यार्थापत्त्यलङ्कारस्तु तदेकदेशभूतकैमुतिकन्यायेन अर्थसंसिद्ध्यात्मा। यथा— **'स जितस्त्वन्मुखेनेन्दुः'** इत्याद्युदाहरणे सरसीरुहविजेतुः इन्दोः जेतुत्वात् नायिकामुखस्य, कमलजेतृत्वम् **'किमुत'** इति न्यायसिद्धम्। न हि मुखेन चन्द्रे जिते कमलजयशक्तिं विना चन्द्रजेतुत्वं सिद्ध्यति। व्यापकशक्तौ व्याप्यशक्तेः अन्तर्भूतत्वात्। अतः अत्र एतादृशवाक्ययुक्त्या अर्थसाधनात् वाक्यन्यायमूलता अस्यालङ्कारस्य। अत्र च उदाहरणे जेतुः मुखस्य चन्द्रापेक्षया आधिक्यात् चन्द्रातिशायित्वरूपध्वन्यमानार्थं प्रति काव्यार्थापत्तेरुपस्कारकत्वात् अलङ्कारता ।।

अथ लोकन्यायमूलकालङ्काराः निरूप्यन्ते ।

१. कु.आ. पृ. १३६

VI. लोकन्यायमूलकालङ्काराः

भोलाशङ्करव्यासमहाशयेन दत्तायां लोकन्यायमूलकालङ्कारसूच्यां प्रत्यनीक-प्रतीप-मीलित-सामान्य-तद्गुण-अतद्गुण-उत्तराख्याः सप्तालङ्काराः सन्ति। तत्र प्रतीपस्य औपम्यवर्गे, उत्तरस्य गूढार्थप्रतीतिमूलकवर्गे च अन्तर्भावे पञ्चावशिष्यन्ते। लोकोक्त्य-लङ्कारश्च लोकन्यायमूलकवर्गे योज्यते। तदिह कुवलयानन्दक्रमेण प्रत्यनीक-तद्गुण-अतद्गुण-मीलित-सामान्य-लोकोक्त्याख्याः षट् अलङ्काराः निरूप्यन्ते व्यङ्ग्यानुशीलनाय।

१. प्रत्यनीकालङ्कारः

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ ।।[१]

यत्र स्वयं साक्षात् स्वप्रतिपक्षे किञ्चिदपि प्रतिकर्तुमशक्नुवानः प्रतिपक्षपक्षे पराक्रमं दर्शयति, तत्र प्रत्यनीकालङ्कारः । यथा- **'जैत्रनेत्रानुगौ...'** इत्यत्र नायिकायाः कर्णे उत्पले अलङ्कृते स्तः । उत्पले कर्णयोः उपरि-आभरणतया वर्तेते, कर्णे च अधःकृते स्तः इति सहजा स्थितिः । अत्र च उत्पलाभ्यां कर्णयोः अधःकरणे कारणं ब्रवीति कविः **जैत्रनेत्रानुगौ** -इति । उत्पलयोः सौन्दर्यातिशयेन नेत्रे प्रतिपक्षभूते आकर्णान्तायतलोचनत्वेन नायिकायाः कर्णे उत्पलप्रतिपक्षभूताभ्यां नेत्राभ्यां स्नेहं कुरुतः। अतः साक्षात् नेत्रे किमपि कर्तुमशक्नुवाने उत्पले, नेत्रपक्षीये कर्णे अलङ्कारव्याजेन तिरस्कुरुतः इति प्रतिपक्षे पराक्रमस्य अत्र वर्णनात् प्रत्यनीकालङ्कारः। अयञ्चालङ्कारः लोकन्यायमूलकः। अत्र उदाहरणानुसारेण नेत्रोत्पलयोः औपम्यमपि गम्यते । औपम्यस्य च वाच्योपस्कारकत्वम् ।

२. तद्गुणालङ्कारः

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ।।[२]

यत्र स्वगुणत्यागात् अन्यदीयगुणग्रहः वर्ण्यते तत्र तद्गुणालङ्कारः । **'पद्मरागायते...'** अत्र नासामौक्तिकेन स्वीयं श्वेतरूपं परित्यज्य अधरारुण्यस्य स्वीकारेण पद्मरागमणि-सदृशत्वस्य वर्णनात् तद्गुणालङ्कारः। अत्र च नासामौक्तिकेन अधरारुण्यस्वीकृतेः

१. कु.आ. पृ. १३५   २. कु.आ. पृ. १६०

नासामौक्तिकस्य पद्मरागसदृशत्वम् अस्तीति वाच्योऽर्थः। स्वच्छोपाधेः बिम्बग्राहित्वञ्च व्यङ्ग्यः अर्थः। तादृशव्यङ्ग्यसामान्याच्छादकत्वेन वाच्यस्य विशेषस्य चमत्कृतिजनकत्वात् अत्र अलङ्कारत्वम्। अयञ्च लोकन्यायमूलकः।

३. अतद्गुणालङ्कारः

सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।
चिरं रागिणि मच्चित्ते निहितोऽपि न रञ्जसि ।।[१]

अयञ्चालङ्कारः तद्गुणप्रतिपक्षभूतः सङ्गतान्यगुणानङ्गीकारस्वरूपः । **'चिरं रागिणि मच्चित्ते...'** अनुरागयुक्ते चित्ते निहितोऽपि नानुरक्तो भवसि इति नायिका नायकं प्रति ब्रूते । अत्र च रागिण्याः नायिकायाः चित्ते चिरमवस्थितेन नायकेन सानुरागेण भाव्यम् । तथापि नायकेन रागरूपगुणास्वीकारात् अतद्गुणालङ्कारः। अत्र च दुर्वारगाढनायकानुरागः नायिकागतः व्यङ्ग्यः तदुपस्कारकत्वाच्च अतद्गुणस्य अलङ्कारत्वम्। अयञ्चालङ्कारः लोकन्यायमूलकः।

४. मीलितालङ्कारः

मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ।
रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ।।[२]

यत्र सादृश्यात् द्वयोः वस्तुनोः भेद एव न लक्ष्यते, तत्र मीलितालङ्कारः। सहजारुणे चरणे लाक्षारसस्य अनुपलक्षितत्वेन वर्णनात् मीलितालङ्कारः। किं वा चरणारुण्यं किं वा लाक्षारुण्यम् – इति भेदस्य ग्रहीतुमशक्यत्वेन नायिकायाः पद्मिनीजातिसौन्दर्यञ्च ध्वन्यते । तदुपस्कारकत्वात् मीलितालङ्कारता । अयञ्चालङ्कारः लोकन्यायमूलकः।

५. सामान्यालङ्कारः

सामान्यं यदि सादृश्यात् विशेषो नोपलक्ष्यते ।
पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम् ।।[३]

यत्र द्वयोः पदार्थयोः सादृश्यात्= अत्यन्तसादृश्यात्, सत्यपि भेदे विशेषः= व्यावर्तकधर्मः नोपलक्ष्यते, तत्र सामान्यालङ्कारः। यथा– पद्मसरसि प्रविष्टानां कामिनीनां मुखस्य, पद्मस्य च स्वरूपतो भेदे सत्यपि कान्तिसौरभादिधर्मप्रयुक्तसादृश्यातिशयवशात्

१. कु.आ. पृ. १६२   २. कु.आ. पृ. १६३   ३. कु.आ. पृ. १६४

मुखत्वादेः अग्रहणात् सामान्यालङ्कारः। पूर्वत्र चरणसहजारुण्यापेक्षया यावकारुण्यस्य वस्त्वन्तरत्वेन अग्रहणात् भेदाग्रहणलक्षणमीलितालङ्कारः। सामान्यालङ्कारे तु यद्यपि पद्मानां मुखानाञ्च स्वरूपतः व्यक्त्यन्तरतया भानमस्ति, तथापि तयोः भेदस्य अतिरोधानेऽपि सादृश्यातिशयमहिम्ना मुखत्वपद्मत्वादिव्यावर्तकधर्मस्य अभानात् वस्तुनोः भेदतिरोधानम् । वस्तुनोः भेदतिरोधानाच्च मुखपद्मयोः अभेदस्य तात्पर्यविषयतया रूपकध्वनिः। तदुपस्कार-कत्वाच्च सामान्यालङ्कारता। अयञ्चालङ्कारः लोकन्यायमूलकः ।

६. लोकोक्त्यलङ्कारः

लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते ।
सहस्व कतिचिन्मासान् मीलयित्वा विलोचने ।।[१]

लोके विद्यमानस्य प्रवादस्य= जनमुखप्रहतस्य वचनस्य, अनुकरणं यत् सा लोकोक्तिः। **'शेषान् मासान् गमय चतुरो लोचने मीलयित्वा'**[२] इति वचनं लोकवादानु-कृतिरिति लोकोक्तिः। एषा च लोकोक्तिः दुस्सहस्यापि विप्रलम्भदुःखस्य अनायासेन सोढव्यताप्रकाशिका इति विप्रलम्भपरिपोषकत्वात् अलङ्कारः। लोकन्यायमूलकश्च ।

इत्थं तृतीयाध्याये निरूपणीयाः अलङ्काराः निरूपिताः ।

।। समाप्तोऽयं तृतीयोऽध्यायः ।।

---

१. कु.आ. पृ. १७४

२. का.ग्र.आ. (मेघसन्देशः) पृ. ६४

शापान्ते मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ।। १०८ ।।

।। श्रीः।।

चतुर्थोऽध्यायः

गूढार्थप्रतीतिमूलका अवर्गीकृतालङ्काराश्च

VII. गूढार्थप्रतीतिमूलकालङ्काराः

अध्यायेऽस्मिन् प्रतिज्ञानुसारेण गूढार्थप्रतीतिमूलकाः–१२, अवर्गीकृतालङ्काराः –२२, च निरूपयिष्यन्ते। तत्रादौ गूढार्थप्रतीतिमूलालङ्काराः निरूप्यन्ते। डा. भोळाशङ्कर-व्यासमहाशयेनह्नह्न १. सूक्ष्मम् , २. व्याजोक्तिः, ३. वक्रोक्तिः, ४. स्वभावोक्तिः, ५. भाविकम्, ६. संसृष्टिः, ७. सङ्करः ह्नह्नइति सप्त अलङ्काराः गूढार्थप्रतीतिमूलकाः अङ्गीकृताः। तत्र गूढार्थपदेन ध्वनिः अथवा गुणीभूतव्यङ्ग्यम् इति उभयमपि ग्रहीतुं शक्यते।

एवं सति एष्वलङ्कारेषु सूक्ष्मम्, व्याजोक्तिः इत्येतद्द्वयं ध्वनिरूपगूढार्थमूलकत्वेन प्रविष्टं भवति। ततः वक्रोक्तिः काक्वा अर्थान्तरपरिकल्पनात्मिकैव गूढार्थप्रतीतिमूला भवति, न श्लेषेण अर्थान्तरकल्पनात्मिका। तत्र शब्दशक्त्यैव अर्थान्तरस्य आवेदनात्। स्वभावोक्तिस्तु यद्यपि मृगबालादिविशेषस्वभाववर्णनात्मा व्यङ्ग्यतत्सामान्यस्वभावे पर्यवश्यति ह्नइति गूढार्थप्रतीतिमूलकत्वं तत्र युज्यते। किन्तु **'कुरङ्गैरुत्तरङ्गाक्षैः ...'** इति कुवलयानन्दस्थ-चन्द्रालोकोदाहरणे तु कुरङ्गसामान्यस्वभावस्यैव वाच्यवृत्त्या वर्णनात्, तत्र गूढार्थप्रतीति-मूलकत्वस्य नास्त्यवकाशः। भूतभव्यार्थसाक्षात्कारात्मके भाविकालङ्कारे तु रसादेः ध्वन्यमानत्वेऽपि साधारणालङ्कारवर्ग एव तस्य प्रवेशो न्याय्यः। इतः परं सङ्करसंसृष्ट्याख्यौ द्वावलङ्कारौ व्यासवर्गीकृतौ अवशिष्टौ। तत्र स्थालीपुलाकन्यायेन गूढार्थप्रतीतिरस्ति न वा ह्नह्नइति किञ्चित्परामृश्यते।

१. & २. सङ्कर-संसृष्ट्यलङ्कारौ

पूर्वोक्तानामलङ्काराणां मेलने लौकिकालङ्काराणां मेलन इव चारुत्वातिशययोगात् नरसिंहन्यायेन अनयोः पृथगलङ्कारता। तत्र तिलतण्डुलन्यायेन स्फुटगम्यभेदतया अलङ्कार-मेलने संसृष्टिः। नीरक्षीरन्यायेन अस्फुटभेदालङ्कारसम्मेलने सङ्करः। स च सङ्करः अप्पय्यदीक्षितेन ह्न

१. अङ्गाङ्गिभावसङ्करः, २. समप्रधानसङ्करः, ३. सन्देहसङ्करः, ४. एकवाचकानुप्रवेश-सङ्करः, ५. सङ्करसङ्करः इति पञ्चप्रभेदत्वेन निरूपितः[१] । शतालङ्कारान्तर्वर्त्येतद-लङ्कारविषये प्रत्येकपरिशीलना अत्र न क्रियते। किन्तु भोळाशङ्करव्यासोक्तदिशा संसृष्टिसङ्करयोः गूढार्थप्रतीतिमूलकत्वम् अस्ति न वेति सामान्यतः परिशील्यते । तत्रह्नह्न

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।।[२]

इत्युदाहरणे पूर्वचरणद्वये तमोव्यापने तमोलेपनस्य उत्प्रेक्षया उत्प्रेक्षालङ्कारः । "**असत्पुरुष-सेवेव ...**" इत्युत्तरचरणद्वये तु उपमालङ्कारः । द्वयोरपि तिलतण्डुलन्यायेन संसर्गः इति संसृष्ट्यलङ्कारः।

दीक्षितप्रदर्शितेऽस्मिन् संसृष्ट्युदाहरणे उत्प्रेक्षायां निमित्तं नभःप्रभृतिभूपर्यन्तसकल-वस्तुमलिनीकरणम्, यद्यपि व्यङ्ग्यम् । तथापि एतादृशव्यङ्ग्यस्य गूढार्थविच्छित्तिमूलकत्वे प्रायशः सर्वेषामेव अलङ्काराणां गूढार्थप्रतीतिमूलकत्वापत्तिः। अतः संसृष्ट्यलङ्कारस्य गूढार्थमूलकता संसृज्यमानालङ्कारविशेषवशादेव उन्नेया भवति । सङ्करालङ्कारविषये तु इमानि ध्वनिकारवचनानि स्मर्तव्यानि भवन्तिह्नह्न

"सङ्करालङ्कारेऽपि यदालङ्कारोऽलङ्कारान्तरच्छायामनुगृह्णाति, तदा व्यङ्ग्यस्य प्राधान्येनाविवक्षितत्वान्न ध्वनिविषयत्वम् । अलङ्कारद्वयसम्भावनायान्तु वाच्यव्यङ्ग्ययोः समं प्राधान्यम् । अथ वाच्योपसर्जनीभावेन व्यङ्ग्यस्य तत्रापि व्यवस्थानं तदा सोऽपि ध्वनिविषयोऽस्तु न तु स एव ध्वनिरिति वक्तुं शक्यम्, पर्यायोक्तनिर्दिष्टन्यायात् ।"[३]

प्रायशः सङ्करालङ्कारेषु व्यङ्ग्यस्य प्राधान्येन अविवक्षा, वाच्यव्यङ्ग्ययोः समप्राधान्येन वा ध्वनेर्नास्ति अवकाशः । किन्तुह्नह्न

भवति न गुणानुरागः खलानां प्रसिद्धिमात्रशरणानाम् ।
किल प्रस्नौति शशिमणिः चन्द्रे न प्रियामुखे दृष्टे ।।[४]

---

१. कु.आ. पृ.१९३-२०२.
२. कु.आ. पृ.१९३.
३. ध.आ. पृ. ४७-४९.
४. ध.आ.लो. पृ. ४९.

इति लोचनोदाहृतेह्नह्न **"हो इ ण..."** इत्यादिप्राकृतपद्यच्छायात्मके पद्ये पूर्वपादद्वयोक्तस्य **"भवति न गुणानुरागः..."** इत्यादिसामान्यांशस्य **"किल प्रश्नौति..."** इत्यादिविशेषांशेन समर्थनात् अर्थान्तरन्यासालङ्कारः । अत्रैव पूर्वचरणद्वये अर्थान्तरन्यासवचनेन खलानाम्= पामराणाम्, प्रसिद्धिमात्रशरणानां गुणानुरागः न भवति ह्नह्नइति अर्थान्तरन्यासावयवे सामान्यांशे वर्ण्यमाने, पामराणामनुरागस्य (द्रोहेषु) सत्त्वेऽपि, गुणेष्वनुरागः न भवति ह्नह्नइत्यर्थोपवर्णनेन **"पण्डितानान्तु गुणानुरागः भवति"** इति वैधर्म्यस्य ध्वनेः व्यतिरेकालङ्कारस्य ध्वनिः। उत्तरार्धे तु प्रियामुखे दृष्टेऽपि चन्द्रकान्तमणिः न स्रवति इति कामिकृतया निन्दया **"नेदं मुखम् अपि तु चन्द्रः"** इति अपह्नवस्य ध्वनिः। एवञ्चात्र अर्थान्तरन्यासस्य पक्षयोः सामान्यविशेषयोः क्रमेण व्यतिरेकापह्नवध्वनिभ्यां सङ्कीर्णत्वात् सङ्करालङ्कारः। अत्र च ध्वनिरूपगूढार्थस्य विच्छित्तेः सद्भावात्, सङ्करालङ्कारस्य गूढार्थप्रतीतिमूलकालङ्कारेषु स्थानकल्पना डा.व्यासमहाशयकृता समीचीनैव ।

एवञ्च भोळाशङ्करव्यासोक्तेषु सप्तसु अलङ्कारेषु साधारणवर्गप्रवेशनीयस्य भाविकालङ्कारस्य न्यूनीकरणे तदुक्ताः षट् गूढार्थप्रतीतिमूलकालङ्काराः पर्यवस्यन्ति ।

अपि च वस्तुतः गूढार्थप्रतीतिमूलकालङ्कारेषु प्रवेशनीयाः अपरेऽपि षडलङ्काराः सन्ति । ते च यथाक्रमेणह्नह्न १. उत्तरम्, २. पिहितम्, ३. गूढोक्तिः, ४. विवृतोक्तिः, ५. युक्तिः, ६. छेकोक्तिः इति।

'एष्वलङ्कारेषु गूढोत्तर-सूक्ष्म-पिहित-व्याजोक्त्युदाहरणेषु भावो न स्वोक्त्याविष्कृतः, किन्तु वस्तुसौन्दर्यबलाद्वक्तृबोद्धव्यविशेषविशेषिताद्गम्यः। तत्रैव वस्तुतो नालङ्कारत्वम् ध्वनिभावास्पदत्वात्'[१] इति कथयता अप्पय्यदीक्षितेन चतुर्णामलङ्काराणां ध्वनित्वमेव नालङ्कारत्वम् इति स्फुटं निवेदितमेव । गूढोक्ति-युक्ति-छेकोक्तीनामपि लक्षणोदाहरण-परिशीलनेन ध्वनित्वम्, विवृतोक्तेश्च व्यङ्ग्यस्य स्वोक्त्याऽऽविष्करणात्मिकायाः गुणीभूत-व्यङ्ग्यत्वमस्तीति तेषामप्यलङ्काराणां गूढार्थप्रतीतिमूलकवर्गेऽन्तर्भावः ।

तदिह नूतनतया गूढार्थप्रतीतिमूलकत्वेन सम्भावितानां व्यासमहाशयोक्तेषु षडलङ्कारेषु कुवलयानन्दक्रमेण योजने (12) द्वादशालङ्काराः गूढार्थप्रतीतिमूलकाः भवन्ति । तत्र च संसृष्टि-सङ्करालङ्कारयोःगूढार्थप्रतीतिमूलकत्वनिरूपणाय आदावेव सङ्क्षेपतो निरूपितत्वात्,

१. कु.आ. पृ.१७०.

उत्तरादयः स्वभावोक्त्यन्ताः दश गूढार्थप्रतीतिमूलकाः इदानीं निरूप्यन्ते । ते च क्रमेणह्ह ३. उत्तरम्, ४. सूक्ष्मम्, ५. पिहितम्, ६. व्याजोक्तिः, ७. गूढोक्तिः, ८. विवृतोक्तिः, ९. युक्तिः, १०. छेकोक्तिः, ११. वक्रोक्तिः, १२. स्वभावोक्तिः चेति ।

३. उत्तरालङ्कारः

१. किञ्चिदाकूतसहितं स्याद्गूढोत्तरमुत्तरम् ।
यत्रासौ वेतसी पान्थ ! तत्रेयं सुतरा सरित् ।।[१]

यत्र कस्यचित् प्रश्नस्य समाधानतया उच्यमानं किञ्चित् आकूतगर्भं भवति । "**यत्रासौ वेतसी पान्थ ! ...**" इत्युदाहरणे यत्र वेतसी लता, तत्र इयं नदी सुखेन तर्तुं शक्या= सुतरा इति वाच्यार्थे स्थिते, वेतसीनिकुञ्जे आवयोः स्वाच्छन्द्यम् इत्यभिप्रायः गर्भतया अस्ति । अर्थादत्र वेतसीस्थले नदी सुतरा इति वाच्यापेक्षया अपि, वेतसीनिकुञ्जे स्वाच्छन्द्यमिति व्यङ्ग्ये एव सौन्दर्यस्य सद्भावात्, "**यत्र वेतसी**" इति वाच्यस्य च तत्परत्वात् ध्वनित्वमेवात्र। गूढोत्तरस्य च तदुपस्कारकत्वात् उत्तरालङ्कारः । "**इति पृच्छन्तमध्वानं कामिन्याह ससूचनम्**"[२] ह्हइति स्वोक्त्याविष्कारे तु अत्र गुणीभूतव्यङ्ग्यत्वमेव इत्यपि दीक्षितेन आविष्कृतम् ।

३.२. चित्रोत्तरालङ्कारः

प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते ।
के–दारपोषणरताः, के खेटाः, किं चलं वयः ।।[३]

अत्र च लक्ष्यं चित्रमुत्तरम् । श्लोकार्धे **उत्तरं चित्रम्** इत्यत्र उत्तरपदस्य काकाक्षिन्यायेन लक्ष्येण लक्षणेन च सम्बन्धः। प्रश्नश्च उत्तरान्तरञ्च प्रश्नोत्तरान्तरे, ताभ्यामभिन्नम् इति विग्रहः। अभिन्नत्वस्य च काकाक्षिन्यायेन लक्षणवाक्यसम्बद्धे उत्तरे अन्वयः।

एवञ्च यत्र प्रश्नाभिन्नमुत्तरं भवति, यत्र च उत्तरान्तरेण= समाधानान्तरेण अभिन्नमुत्तरं भवति, तत्र चित्रोत्तरालङ्कारः। उत्तरान्तरेण अभिन्नमुत्तरम् इत्यस्य अयमर्थो भवति यत् द्वयोरपि प्रश्नयोः एकमेवोत्तरम् इति ।

के दारपोषणरताः ? (दारपोषणरताः के ?) इत्यत्र **केदारपोषणरताः** इति समाधानम्। क्षेत्रपोषणरताः इत्यर्थः। एवञ्च प्रश्नोत्तरयोः ऐक्यात् चित्रोत्तरालङ्कारः।

१. कु.आ. पृ.१६६. २. कु.आ. पृ.१७०. ३. कु.आ. पृ.१६७.

के खेटाः ?= आकाशचारिणः के ?, किं चलम् ? इति द्वयोः प्रश्नयोः **वयः**(पक्षिणः, यौवनम्) इति एकस्यैव समाधानस्य उत्तरत्वेन वर्णनात् द्वितीयः चित्रोत्तरालङ्कारः ।

अत्र च प्रश्नोत्तरयोः एकेनैव पदेन निरूपणात् न केवलं समाधातुः वैदग्ध्यातिशयः। अपि तु तादृशसमाधानकथनानुकूलतया कदाचित् प्रष्टुरपि वैदग्ध्यातिशयः व्यज्यते ।

एवं प्रश्नोत्तरान्तरे चित्रोत्तरे तु द्वयोः प्रश्नयोः एकपदेन समाधानम् अभिसन्धाय एव प्रष्टुः प्रश्नः समाधातुः समाधानञ्च प्रचलतीति तत्र नियततया प्रष्टृ–समाधात्रोः चातुर्यं व्यज्यते ।

न चात्रापि प्रष्टुः पूर्वोत्तरालङ्कार इव पाक्षिकमेव चातुर्यमिति वाच्यम्, द्वयोः प्रश्नयोः एकपदेन समाधातुः समाधानाशक्तौ, आरोपितसमाधानाशक्तौ वा, एकपदेन प्रश्नद्वयस्य उत्तरणीयतायां समापतितायां समाधातुरिव प्रष्टुरपि एकपदेन समाधानकथनाशक्तौ कथाप्रसङ्गे वैरस्यापत्तेः। तस्मात् द्वितीयस्मिन्नुत्तरे नैयत्येन द्वयोरपि चातुर्यं प्राधान्येन ध्वन्यते । तदुपस्कारकत्वाच्च चित्रोत्तरस्यालङ्कारत्वम्।

४. सूक्ष्मालङ्कारः

सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम् ।
मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ।।[१]

यत्र पराशयाभिज्ञस्य अन्यस्य अभिप्रायपूर्वकः चेष्टाविशेषः वर्ण्यते, तत्र सूक्ष्मालङ्कारः। “मयि पश्यति सति, सा= मत्कामिनी, केशैः उज्ज्वलसीमन्तमणिमावृणोत्” इति नायकस्य स्वमित्रं प्रति उक्तौ, नायिकायाः अभिप्रायगर्भचेष्टाविशेषस्य वर्णनात्, अत्र सूक्ष्मार्थप्रकाशनात्मा सूक्ष्मालङ्कारः। अत्र च नायिकया नायके पश्यति सति केशैः सीमन्तमणिसंवरणे कोऽभिप्रायः इत्युक्तेह्वह्व “नायकः ततः प्रागेव कदा अस्माकं सङ्केत–समयः ?” इति प्रश्नं पृष्टवान् स्यात् । तत्समाधानतया नायके पश्यति सति नायिकया केशैः सीमन्तमण्यावरणं कृतम् । अस्तङ्गते सूर्ये अन्धकारमावृते जगति अस्माकं समागमः ह्वह्वइति तस्याः चेष्टितस्य अभिप्रायः । अयञ्च वाच्यात् प्राधान्येन तात्पर्यविषयतया सुन्दरतया च प्रकाशनात् ध्वनिपदव्यपदेश्यः। तदुपस्कारकश्च साकूतचेष्टितात्मा सूक्ष्मालङ्कारः। न चात्र वाच्यसिद्ध्यङ्गत्वम्, व्यङ्ग्येन वाच्यस्य अनुपपादनात्। नापि स्वोक्त्या आविष्कारात् गुणीभूतव्यङ्ग्यभेदः। साकूतादिपदैः कविना तन्निबद्धेन पात्रेण वा अर्थान्तरस्य स्वोक्त्या आविष्काराभावात् ।

१. कु.आ. पृ.१६८.

५. पिहितालङ्कारः

पिहितं परवृत्तान्तज्ञातुस्साकूतचेष्टितम् ।
प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत् ।।[१]

पूर्वं चेष्टया पराशयं ज्ञात्वा समाधानाय साकूतचेष्टितं सूक्ष्मं प्रतिपादितम् । इदानीन्तु परवृत्तान्तज्ञातुः साकूतचेष्टितं पिहितालङ्कारः ह्नह्नइति प्रतिपाद्यते । प्रातः प्रिये गृहागते सति कान्तया तल्पकल्पनं कृतम् । अत्र परवृत्तान्तज्ञातुः साकूतचेष्टितस्य वर्णनात् नायककृता-पराधस्य नायिकाकृततल्पकल्पनेन पिधानात् पिहितालङ्कारः । अत्र च अकल्पयत् इति भूतकालोपयोगेन नायककृतसपत्नीगृहदीर्घजागरणं नायिकया पूर्वमेव ज्ञातमिति ज्ञायते ।

अत एव तदागमनात् प्रागेव तल्पकल्पनं सम्पन्नम् । अतः "सपत्नीगृहे कृतजागरणेन श्रान्तोऽसि" इति अभिप्रायस्य नायिकाकृततल्पकल्पनेन प्रख्यापनात्, वाच्यतल्पकल्पनापेक्षया व्यङ्ग्यस्य सुन्दरत्वात् अत्र व्यङ्ग्यस्य ध्वनित्वमेव । किन्तु रसिकरञ्जन्युदाहृते "रात्रिजागर-खिन्नस्त्वमिति कथयन्ती तल्पमकल्पयत्"[२] इति पद्ये तु स्वोक्त्याविष्कारात् तादृशपिहिता-लङ्कारे गुणीभूतव्यङ्ग्यत्वमेव ।

६. व्याजोक्त्यलङ्कारः

व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ।
सखि ! पश्य गृहारामपरागैरस्मि धूसरा ।।[३]

यत्र अन्यकारणोक्त्या विद्यमानस्य स्वरूपस्य गोपनं व्यक्तीभवति, तत्र व्याजोक्ति-रलङ्कारः । अत्र च "सखि ! गृहारामपरागैः मलिनिता अस्मि पश्य" इति सखीं प्रति नायिकावचने आत्मकृतचौर्यरतसङ्केतभूपृष्ठलुण्ठनलग्नधूलिजालस्य गृहारामपरागैः मलिनितत्वेन गोपनं क्रियते इति व्याजोक्तिरलङ्कारः । इदञ्च नायकं प्रति आत्मनः उपपतिकृतचौर्यरत-गोपनपरं वचनम् ।

अत्र च नायिकायाः धूसरितत्वं प्रति गृहारामपरागाणां हेतुत्वप्रतिपादनेन चौर्यरतकृत-सङ्केतभूपृष्ठलुण्ठनलग्नधूलिजालस्य गोपनं क्रियते । तादृशगोपनमेव अत्र व्यङ्ग्यार्थः । तस्य च गृहारामपरागरूपवाच्यापेक्षया आस्वादपात्रत्वात् सुन्दरत्वात्, नायिकावाक्यतात्पर्य-विषयत्वाच्च प्राधान्येन व्यङ्ग्यत्वमिति ध्वनित्वम् । तदुपस्करकत्वाच्च व्याजोक्तेरलङ्कारत्वम्।

१. कु.आ. पृ.१६८. २. कु.आ.र.रं. पृ.२४०. ३. कु.आ. पृ.१६९

७. गूढोक्त्यलङ्कारः

गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते ।
वृषाऽपेहि परक्षेत्रादायाति क्षेत्ररक्षकः ।।[१]

यत्र अन्योद्देश्यम् अन्यं प्रति वक्तव्यम्, अन्यं प्रति कथ्यते तत्र गूढोक्तिरलङ्कारः। यथाह्लह्ल "**वृषाऽपेहि परक्षेत्रात्...**" इत्याद्युदाहरणे वृषशब्दस्य वीर्यसेचकः, वृषभः इत्यर्थद्वयम्; क्षेत्रशब्दस्य सस्यादिः, कलत्रम् चेति अर्थद्वयञ्च श्लेषेण शब्दशक्त्या एव समर्प्यते । अतः अत्र कञ्चित् उपपतिं प्रति नायिकायाः सख्या नायकासंज्ञानपूर्वकमेवं प्रत्यपादिह्लह्ल "वीर्यसेचक! कलत्ररक्षकः आयाति, अतः सद्यः परक्षेत्रात् गच्छ" इति अन्यस्मिन्नर्थे प्रतिपादनीये "वृषभ! क्षेत्रात् गच्छ क्षेत्ररक्षकः आयाति (त्वां नूनं ताडयिष्यति)" इत्यर्थः उद्देश्यान्तरम् अन्यैः मा ज्ञायी इति धिया श्लेषमहिम्ना "**वृषापेहि...**" इत्यादिवाक्येन प्रतिपादितः। अतः गूढोक्त्यलङ्कारः ।

न चात्र अप्रस्तुतप्रशंसा, कार्यकारणादिव्यङ्ग्यत्वाभावात् । नापि श्लेषमात्रम् । वीर्यसेचके वृषभस्य उपमानतया प्रकृताप्रकृतश्लेषोदाहरणे समुद्रस्येव प्रकृते सेनापतौ अप्रकृतस्य अन्वयविवक्षायाः अभावात् । केवलं परवञ्चनार्थम् अन्यैः मा ज्ञायि इति धिया द्वितीयोऽप्यर्थः उपात्तः । ततश्च अप्रकृतार्थस्य श्लेषेण शब्देनैव उपस्थापितत्वेऽपि इतरवञ्चनस्य व्यङ्ग्यत्वात् तात्पर्यविषयत्वात् अत्र ध्वनित्वमेव । वक्तृवैदग्ध्यातिशयोऽत्र व्यङ्ग्यतया अर्थशक्तिमूलः जागर्त्येव ।

८. विवृतोक्त्यलङ्कारः

विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि ।
वृषापेहि परक्षेत्रादिति वक्ति ससूचनम् ।।[२]

यत्र श्लिष्टगुप्तम्= श्लेषेण गुप्तं वस्तु, कविना आविष्क्रियते तत्र विवृतोक्त्यलङ्कारः। अयञ्च गूढोक्तिप्रतिपक्षभूतः। "वीर्यसेचक ! परकलत्रात् अपसर" इति गुप्तस्य वस्तुनः, "वृषभ ! परक्षेत्रात् अपेहि" इति वाच्यवस्तुपरेण "वृषापेहि..." इत्यादिवचनेन गोपनेऽपि, गुप्तस्यार्थस्य "इति वक्ति ससूचनम्" इति स्वोक्त्याविष्करणात् विवृतोक्त्यलङ्कारः ।

---

१. कु.आ. पृ.१७०. २. कु.आ. पृ.१७१.

अत्र च अर्थद्वयस्य श्लेषेण शब्दशक्त्या एव समर्पणेऽपि, परवञ्चनारूपव्यङ्ग्यार्थः अस्त्येव। तस्य च "इति वक्ति ससूचनम्" इति स्वोक्त्याऽऽविष्कारात्, स्वोक्त्याऽऽविष्काररूपे वाच्ये व्यङ्ग्यस्य गुणीभावात् गुणीभूतव्यङ्ग्यत्वमेव, न ध्वनित्वम्।

९. युक्त्यलङ्कारः

युक्तिः परातिसन्धानं क्रियया मर्मगुप्तये।
त्वामालिखन्ती दृष्ट्वाऽन्यं धनुः पौष्पं करेऽलिखत्॥[1]

यत्र कयाचित् क्रियया स्वानुरागादिरूपमर्मगोपनार्थं परातिसन्धानम्= परवञ्चनं क्रियते, तत्र तादृशक्रिया एव युक्तिः। दूत्याः नायिकानुरागप्रकाशनपरे "त्वामालिखन्ती" इत्यादिवचनेह्नह्न नायिकाकर्तृकया पौष्पधनुर्लेखनक्रियया "अयं मन्मथः एव" इत्यर्थज्ञापनेन, वस्तुतः कामितनायकस्यापि "नायं मया कामितः नायकः" इति द्रष्टृपुरुषान्तरातिसन्धानद्वारा स्वानुरागरूपमर्मगोपनात्, तदौपयिकी पुष्पधनुर्लेखनक्रिया अत्र युक्तिः।

अत्र नायकचित्रलेखनकालीनप्रसक्तान्यपुरुषदर्शनप्रयुक्तलिख्यमाननायककरा-धिकरणकनायिकाकर्तृकधनुःपौष्पलेखनक्रिया एव वाच्या। तत्र च परातिसन्धानम्= वञ्चनम् इति व्यङ्ग्यमेव न वाच्यम्। यद्यपि विशिष्टपौष्पधनुर्लेखनं मर्मगोपनमेवेति वक्तव्यम् तादृश-लेखनस्य एव गोपनत्वात् तथापि स्वानुरागरूपमर्मणः वाचकशब्दानां श्लोके अनुपादानात् परातिसन्धानवाचकशब्दस्यापि अत्र अभावात्, व्यञ्जनया एव अर्थान्तरव्यक्तेः तस्य च प्राधान्येन अभिव्यक्तेः अत्र ध्वनिरेव न गुणीभूतव्यङ्ग्यम्।

१०. छेकोक्त्यलङ्कारः

छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता।
भुजङ्ग एव जानीते भुजङ्गाचरणं सखे !॥[2]

छेकाः= विदग्धाः तेषाम् उक्तिः छेकोक्तिः इति व्युत्पत्तिः। यत्र लोकक्षुण्णस्य वचनस्य (लोकोक्तेः) अर्थान्तरगर्भितत्वं भवति तत्र छेकोक्तिरलङ्कारः। यथाह्नह्न "भुजङ्ग एव जानीते..." इत्यादिलोकोक्तेः "धनार्जनादिव्यापारे इमौ सहचारिणौ" इति लक्ष्यार्थे प्रतीयमाने ततः "रहस्ये अनङ्गव्यापारेऽपि तस्यायं सहचरः" इति अर्थान्तरं ध्वन्यते। तद्गर्भतया तस्याः उक्तेः छेकोक्तित्वम्। एवञ्चात्र ध्वन्यमानार्थगर्भितत्वात् लोकोक्तेः

१. कु.आ. पृ.१७३.
२. कु.आ. पृ.१७४.

छेकोक्त्यलङ्कारः। यदि चात्र भुजङ्गशब्दस्य कुटिलवर्त्मा विटः शक्यार्थः, "विटाचरणं विट एव जानाति" इति अभीष्टगूढार्थस्य च शक्त्या एव उपपादनात् अयं न ध्वनिः स्यात्, तर्हि वाच्यालङ्कार एव ।

११. वक्रोक्त्यलङ्कारः

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् ।
मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके ।।[१]

यत्र श्लेषेण काक्वा वा अर्थान्तरपरिकल्पनं भवति तत्र वक्रोक्तिरलङ्कारः। मानिनी–मानापाकरणेच्छया प्रेयस्यनुनयपरे वाक्ये नायकेन मुञ्च मानं(कोपम्) दिनं प्राप्तम् इत्युपक्रान्ते सति, नायिकया मुञ्च मा+नन्दिनम्= वृषभं प्राप्तम् इत्यर्थं कल्पयित्वा "नेह नन्दी अपि तु हरान्तिके" इति समाधानात्मके वचने उक्ते सति, नायिकोक्तस्य वचनस्य श्लेषेण अर्थान्तर–प्रकल्पनात् वक्रोक्त्यलङ्कारः । अत्र च अर्थान्तरपरिकल्पनं सभङ्गश्लेषेण शब्दशक्त्या एव भवतीति व्यञ्जनायाः अवकाशाभावात् वक्रोक्तेः अलङ्कारत्वम् । व्यङ्ग्यवक्तृवैदग्ध्यादिकं पुरस्कृत्य ध्वनित्वं भवतीति अन्यदेतत् । एवम् अभङ्गश्लेषात् वक्रोक्तिरप्युदाहरणीयः ।

असमालोच्य कोपस्ते नोचितोऽयमितीरिता ।
नैवोचितोऽयमिति तं ताडयामास मालया ।।[२]

अत्र नायकेन नायिकाह्नह्न "असमालोच्य ते कोपः नोचितः" इत्युक्ता सती "नैवोचितोऽयम् ह्नइति मालया ताडयामास" इति वाक्यार्थे स्थितेह्नह्न "नैवोचितोऽयम्" इत्यत्र नञि काक्वा वाक्यस्य प्रश्नपर्यवसायित्वेन किं नैवोचितः ? इति प्रश्नार्थकत्वेन "नैवोचितः इति न" इत्यर्थे पर्यवसानात् स्वरेण नञन्तरकल्पनात् "उचित एव" इति अबाधितार्थस्य व्यङ्ग्यतया भानात्, तस्य च काक्वाक्षिप्तरूपगुणीभूतव्यङ्ग्यत्वम् । "नैवोचितः" इति वाच्यस्य नायिकोक्तस्य यथातथं ग्रहणे नायकेन उक्तस्य "नोचितस्ते कोपः, नैवोचितः" इति अनयोः वाक्यार्थयोः पौनरुक्त्यापत्तेः नायिकोक्तवाक्ये एवकारस्य वैयर्थ्यापत्तेः च। तस्मादत्र नञि काक्वा नञन्तरकल्पनेन "कोपः उचितः एव" इति नायिकोक्तवाक्यार्थतया कल्पनं वरम् । तच्चात्र नञर्थाध्याहारलभ्यत्वेन वाच्यकल्पमिति अस्य अलङ्कारत्वमपि सिद्धम् । वाच्यव्यङ्ग्ययोश्चात्र व्यतिरेकसम्बन्धः ।

१. कु.आ. पृ.१७५.
२. कु.आ. पृ.१७६. अत्र नैवोचितोऽयमिति काकुस्वरविकारेणोचित एवेत्यर्थान्तरकल्पनम् ।

१२. स्वभावोक्त्यलङ्कारः

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम् ।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते ।।[1]

यत्र जात्यादिषु विद्यमानस्य स्वभावस्य वर्णनं क्रियते, तत्र स्वभावोक्त्यलङ्कारः । यथाह्नह्न "**कुरङ्गैरुत्तरङ्गाक्षैः...**" इत्युदाहरणे तरङ्गायमाननेत्रशोभितैः स्तब्धकर्णैः इक्ष्यते ह्नइति मृगाणां स्वाभाविकभीतभीतेक्षणशोभायाः, प्रशान्तानन्दमयस्थितिसंसूचकस्तब्ध-कर्णत्वस्य वर्णनात् अत्र स्वभावोक्त्यलङ्कारः। अत्र चह्नह्न व्यङ्ग्यस्पर्शः लेशतो विद्यमान एव । उदाहरणान्तरे तु गूढार्थप्रतीतिमूलकत्वं गवेषणीयम् ।

तदित्थं गूढार्थप्रतीतिमूलकाः द्वादशालङ्काराः निरूपिताः। अथ साधारणवर्गीयाः अलङ्काराः निरूप्यन्ते ।।

VIII. अवर्गीकृतालङ्काराः

उपक्रमाध्याये (पृ.२२) प्रौढोक्त्यादीनां हेत्वन्तानां भोळाशङ्करव्यासमहाशयेन अवर्गीकृतानाम् (२२) द्वाविंशत्यलङ्काराणां सूची दत्ता । तदनुसारेण तत्क्रमेण इदानीं प्रौढोक्त्यादयः अवर्गीकृतालङ्काराः निरूप्यन्ते ।

१. प्रौढोक्त्यलङ्कारः

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम् ।
कचाः कलिन्दजातीरतमालस्तोममेचकाः ।।[2]

कार्यातिशयाहेतौ कार्यातिशयहेतुत्वप्रकल्पनं प्रौढोक्तिः । यथाह्न "**कचाः कलिन्दजा तीर...**" इत्याद्युदाहरणे तमालगतनैल्यातिशय~~हेतौ~~ यमुनातटारोहणे तद्धेतुत्वस्य प्रकल्पनात् उत्कर्षाहेतौ हेतुत्वकल्पनात्मकः प्रौढोक्त्यलङ्कारः। अत्र च हेतूत्प्रेक्षालङ्कारध्वनिः। कविव्यापारस्य प्रौढोक्तेः तत्परत्वात् । अतः हेतूत्प्रेक्षा ध्वन्युपस्कारकत्वेन प्रौढोक्तेरलङ्कारता।

---

१. कु.आ. पृ.१७६.
२. कु.आ. पृ.१४५.

२. सम्भावनालङ्कारः

"सम्भावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।"[१]

अन्यस्य सिद्धये यदीत्थमिति ऊहः सम्भावना । तदुदाहरणे चह्नह्न **"यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव"** इत्यत्र वर्णनीयराजगतबहुवचनोपात्तसकलगुणकथन-सिद्धये सहस्रमुखः शेषः(आदिशेषः) यदि वक्ता स्यात् ह्नह्नइति अभ्यूहस्य क्रियमाणत्वात्, तेन च सहस्रमुखव्याख्येयत्वेन गुणानाम् अपरिच्छिन्नत्वप्रतीतेः व्यङ्ग्यस्य अपरिच्छिन्नत्वस्य च वाच्यगुणेषु अन्वयात् **व्यङ्ग्यगर्भालङ्कारः** ।

३. मिथ्याध्यवसित्यलङ्कारः

किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।
मिथ्याध्यवसितिर्वेश्यां वशयेत् खस्रजं वहन् ।।[२]

कस्यचित् मिथ्यात्वसिद्ध्यर्थं मिथ्याभूतार्थान्तरकल्पनात्मा मिथ्याध्यवसित्यलङ्कारः अपि व्यङ्ग्यगर्भः । यथाह्न **"वेश्यां वशयेत् खस्रजं वहन्"** इत्यत्र वेश्यावशीकरणगतासम्भा-वितत्त्वसिद्धये गगनकुसुममालिकाधारणरूपार्थान्तरस्य कल्पनात् मिथ्याध्यवसितिः । अत्र च वेश्यावशीकरणनिष्ठम् अत्यन्तासम्भावितत्त्वं व्यङ्ग्यार्थः। तस्य च **"वेश्यां वशयेत् खस्रजं वहन्"** इति वाच्यापेक्षया न तथा सौन्दर्यम् । अतः व्यङ्ग्यस्य असुन्दरत्वेन गुणीभूतव्यङ्ग्यत्वमेव। तत्रापि **"वाणीरकुञ्जोड्डीन..."**[३] इत्यादिकाव्यप्रकाशोदाहृतासुन्दर-गुणीभूतव्यङ्ग्ये दत्तसङ्केतः कश्चित् आगतः इति व्यङ्ग्यस्य वध्वङ्गकार्श्यरूपवाच्यार्थसिद्धौ अङ्गत्वमिव, वाच्यसिद्ध्यङ्गत्वम् अत्र नास्ति । अत्यन्तासम्भवित्वस्य व्यङ्ग्यस्य "खस्रजं वहन्" इति वाच्यसिद्धौ वा, **"वेश्यां वशयेत्"** इति वाच्यसिद्धौ वा अङ्गत्वाभावात् ।

एवञ्च इदं प्रसिद्धासुन्दरगुणीभूतव्यङ्ग्यविलक्षणम् असुन्दरमेव गुणीभूतव्यङ्ग्यम् । यद्यपि व्यङ्ग्यस्य अत्यन्तासम्भवित्वस्य वाच्यं प्रति अप्रधानत्वभावेन प्राधान्यम्, बाधित-वाच्यार्थापेक्षया अबाधितात्यन्तासम्भवित्वे व्यङ्ग्ये तात्पर्यविषयत्वञ्च अस्तीति प्राधान्य-तात्पर्यविषयत्वाभ्यां व्यङ्ग्यस्य ध्वनित्वमेव युक्तम् । तथापि अत्यन्तासम्भावित्वरूपव्यङ्ग्य-तात्पर्यकोऽयं वेश्यावशीकरणरूपवाच्यार्थः इत्यर्थस्य स्वीकारात् असम्भावितस्यापि वाच्यस्य कियताचिदंशेन उपपत्तेः व्यङ्ग्यस्य वाच्याङ्गत्वमिति गुणीभूतव्यङ्ग्यमेव ।

---

१. कु.आ. पृ.१४५ २. कु.आ. पृ.१४६. ३. का.प्र.(वासुदेवशास्त्री अभ्यङ्कर) पृ.२०४.

४. प्रहर्षणालङ्कारः

१. **उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ।**
तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ।।[१]

उत्कण्ठितार्थस्य यत्नं विनापि सिद्धिः प्रहर्षणम् । **"तामेव ध्यायते..."** इत्याद्युदाहरणे नायकसुखास्वादविषयत्वेन उत्कण्ठितार्थस्य दूत्याः, नायिकया सम्प्रेषणेनैव नायकस्य संसिद्धेः प्रहर्षणालङ्कारः । अत्र आलम्बनदूत्याः अयत्नसिद्ध्या शृङ्गाररसः आभासात्मा व्यज्यते तं प्रति प्रहर्षणस्य उपस्कारकत्वेनैव अङ्गत्वात् न वाच्यगर्भालङ्कारप्रवेशः ।

२. **वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्णम् ।**
दीपमुद्योजयेद्यावतावदभ्युदितो रविः ।।[२]

"दीपमुद्योजयेत्..." इत्यादिद्वितीयप्रहर्षणोदाहरणे अपि अधिकप्रकाशलाभरूप-व्यङ्ग्यस्य आश्रयत्वसम्बन्धेन रवौ अन्वये अधिकप्रकाशविशिष्टो रविः इति वाक्यार्थबोधः यदा, तदा इष्टप्रकर्षप्राप्तिजनितहर्षस्य भावस्य व्यङ्ग्यत्वेन, तं प्रति वाञ्छितादधिकप्राप्ति-लक्षणस्य प्रहर्षणस्य उपस्कारकत्वात् व्यङ्ग्यभावोपस्कारकत्वेन अलङ्कारत्वम् ।

३. **यत्नादुपायसिद्ध्यर्थात् साक्षाल्लाभः फलस्य च ।**
निध्यञ्जनौषधीमूलं खनता साधितोऽपि निधिः ।।[३]

"निध्यञ्जनौषधीमूलम्..." इति उपायसिद्ध्यर्थयत्नात् साक्षात् फललाभात्मक-तृतीयप्रहर्षणेऽलङ्कारेऽपि हर्षभावोपस्कारकत्वात् प्रहर्षणस्य अलङ्कारत्वम् ।

५. विषादनालङ्कारः

इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम् ।
दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः ।।[४]

अत्र इष्यमाणविरुद्धार्थसम्प्राप्तिलक्षणः विषादः व्यङ्ग्यविषादस्य सञ्चारिभावस्य उपस्कारकः ।

---

१. कु.आ. पृ.१५०.
२. कु.आ. पृ.१५०.
३. कु.आ. पृ.१५१.
४. कु.आ. पृ.१५२.

६. उल्लासालङ्कारः

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि ।
अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी ।।[1]

यत्र १.कस्यचित् गुणेन अन्यस्य गुणः, २. कस्यचित् दोषेण अन्यस्य दोषः ३.कस्यचित् गुणेन दोषः, ४. कस्यचित् दोषेण गुणो वा वर्ण्यते तत्र उल्लासालङ्कारः ।

१. **"अपि मां पावयेत्..."** इत्युदाहरणे साध्वीगतपवित्रतागुणेन (तदीयस्नानतः) गङ्गायाः पावनत्वगुणः वर्ण्यते इति गुणेन गुणस्य उल्लासः । अत्र च साध्व्याः पतितपावन्याः गङ्गायाः अपि पावकत्वेन अतिशयः द्योत्यते। तस्य च व्यङ्ग्यस्य पवित्रतातिशयस्य साध्वीविशेषणभूतस्य गङ्गागतपावनेच्छायाः पोषकत्वेन वाच्यस्य उपपादकत्वात् अलङ्कारत्वम्, वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यत्वञ्च ।

२. **काठिन्यं कुचयोः स्रुष्टं वाञ्छन्त्यः पादपद्मयोः**[2] इत्यादिद्वितीयोदाहरणे राज्ञः धाटीषु पलायमानानामरियोषितां पादयोः काठिन्यमसृज्य धावनपरिपन्थिमार्दवदोषेण साकं तत्कुचयोः व्यर्थं काठिन्यं सृष्टवतः विधातुः निन्द्यत्वदोषस्य उल्लासात् तस्य च प्रकृतराजसम्बन्धि-शत्रुविजयकारकप्रतापातिशयव्यञ्जकत्वात् तद्ध्वनिं प्रति द्वितीयोल्लासस्य उपस्कारकत्वम्।

३. **"तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम्"**[3] इति पद्यभागे तृतीये उदाहरणे सज्जनमहिमगुणेन धनस्य तदनाश्रयणं दोषत्वेन वर्ण्यत इति तृतीयः उल्लासः । अत्र च प्रीणनहेतु-भूतस्यापि धनस्य सज्जनानाश्रयणस्य दोषत्वेन प्रतिपादनात् **महोन्नतव्यक्तित्वशाली सज्जनः धनादप्यतिरिच्यते** इति सर्वोत्तमव्यक्तित्वस्य व्यङ्ग्यस्य सज्जने अन्वितत्वात् तादृशसज्जनस्य च धनकर्तृकानाश्रयणगताभाग्यत्वोपपादनाय तादृशविशिष्टसज्जनस्य अनाश्रयणप्रतियोग्याश्रयणे कर्मतया अन्वय एव परिपुष्टेः वाच्योपपादकगुणीभूतव्यङ्ग्यत्वम्।

४. "लाभोऽयमेव भूपाल! सेवकानां न चेद्वधः ।"[4] इति चतुर्थोदाहरणे तु राज्ञः क्रौर्यदोषेण सेवकानां वधं विना विनिर्गमनं गुणत्वेन वर्णितम् । यद्यपि सेवकानां वधः दोषः, अवधस्तु न गुणः, तथापि राज्ञः क्रौर्यदोषं पुरस्कृत्य सेवकानाम् अवधस्य लाभत्वेन= गुणत्वेन वर्णनात्, अवधोऽपि गुणः राज्ञः क्रौर्यसमवधाने, तेन च सामान्यस्थितेरपि गुणत्वेन

१. कु.आ. पृ.१५२.
२. कु.आ. पृ.१५२.
३. कु.आ. पृ.१५२.
४. कु.आ. पृ.१५२.

सेवकैः सम्भावनात् राज्ञः क्रौर्यातिरेकः व्यज्यते । स च अवधगतलाभस्य परिपोषकत्वात् वाच्योपपादको भवति ।

७. अवज्ञालङ्कारः

ताभ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा ।
स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरम् ।।
मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः ।[1]

गुणदोषाभ्यां गुणदोषौ यदि न स्यातां तर्हि अवज्ञालङ्कारः। **"स्वल्पमेवाम्बु लभते ..."** इत्युदाहरणे अत्र सागरगतेन अधिकजलवत्त्वरूपगुणेनापि प्रस्थेन स्वल्पाम्बुन एव लाभादधिकाम्बुप्रप्तिरूपगुणस्य अलाभादयं गुणेन गुणाभाववर्णनात्मकः अवज्ञालङ्कारः।

१. अत्र च "महागुरुसन्निधिं प्राप्तेनापि अल्पप्रज्ञेन शिष्येण स्वल्पा एव विद्या आप्ता" इति व्यङ्ग्यस्य "समुद्रं प्राप्तेनापि प्रस्थेन स्वल्पमेवाम्बु लभ्यते" इति वाच्यस्य च मध्ये व्यङ्ग्यगुरुमन्दप्रज्ञशिष्यवृत्तान्तापेक्षया तदाच्छादके परिमितशक्तिशाली अचेतनप्रस्थसमुद्र-वृत्तान्ते अरुन्तुदताशून्यत्वेन सौन्दर्यस्य सद्भावात् व्यङ्ग्याच्छादकवाच्यवृत्तान्तस्य प्राधन्यमिति वाच्यप्राधान्यात् अलङ्कारत्वम् ।

२. **"मीलन्ति यदि पद्मानि..."** इत्यादिद्वितीयोदाहरणे तु पद्मसङ्कोचरूपदोषे सत्यपि उदितचन्द्रे दोषाभावस्यैव वर्णनात् द्वितीयः अवज्ञालङ्कारः । अत्रापि पूर्ववत् महापुरुषाभ्युदयम-सहमानानां कापुरुषाणां वृत्तान्तस्य व्यङ्ग्यस्यापि वाच्यचन्द्रपद्मवृत्तान्तोपस्करणेनैव शोभा इति अलङ्कारस्यैवायं विषयः न ध्वनेः ।

८. अनुज्ञालङ्कारः

दोषस्याभ्यर्थनाऽनुज्ञा तत्रैव गुणदर्शनात् ।
विपदः सन्तु नः शश्वद्यासु सङ्कीर्त्यते हरिः।।[2]

दोषे एव गुणदर्शनात् दोषस्य अभ्यर्थना अनुज्ञा । यथाह्व्ह्व **"विपदः सन्तु..."** इत्यादौ हरिसङ्कीर्तनशालिन्यः विपदः अस्माकं नित्यमभिलषणीयाः ह्व्ह्वइति शोधितवाक्य-वाच्यार्थः। हरिसङ्कीर्तनशून्याः सम्पदः नित्यमनभिलषणीयाः ह्व्ह्वइति पूर्वोक्तादेव वाक्यात्

१. कु.आ. पृ.१५४.	२. कु.आ. पृ.१५५.

व्यङ्ग्यार्थः समुल्लसति। तत्र अनयोः वाक्यार्थयोर्मध्ये कस्य वा चमत्कारित्वम् इति विचिकित्सायां सञ्जातायां दुःखसाधनत्वेन प्रसिद्धासु विपत्सु अभिलषणीयत्वस्य वाच्यस्य बाधिततया स्वतः अचमत्कारित्वात् व्यङ्ग्यभगवदानन्दसंवलितत्वेन विपदामप्यभिलषणीयत्वं सिद्धम् । एवं सम्पदां सुखहेतूनाम् अनभिलषणीयत्वं व्यङ्ग्यभूतं भगवदानन्ददूरत्वेन व्यङ्ग्यान्तरेण उपपाद्यमिति व्यङ्ग्यवाक्यार्थोऽपि व्यङ्ग्यान्तरोपपाद्यः।

एवञ्च वाच्यव्यङ्ग्ययोर्द्वयोरपि वाक्यार्थयोः भगवदानन्दतदभावात्मकपदार्थीभूत-व्यङ्ग्यान्तरोपपाद्यत्वात् वाच्यव्यङ्ग्ययोः चमत्कारित्वमपि व्यङ्ग्यान्तरमुखप्रेक्षणेनेति समप्राधान्यरूपगुणीभूतव्यङ्ग्यत्वमेव अत्र अलङ्कारस्य अनुसन्धेयम् । पदार्थभूतव्यङ्ग्यदृष्ट्या तु वाच्यस्य उपपादने वाच्यसिद्ध्यङ्गत्वञ्च ।

९. लेशालङ्कारः

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् ।
अखिलेषु विहङ्गेषु हन्त ! स्वच्छन्दचारिषु ।।
शुक ! पञ्जरबन्धस्ते मधुराणां गिरां फलम् ।[1]

यत्र दोषस्य गुणत्वेन गुणस्य दोषत्वेन कल्पना क्रियते तत्र लेशालङ्कारः । यथा– **"अखिलेषु विहङ्गेषु..."** इत्यत्र सर्वे विहङ्गाः स्वच्छन्दचारिणः, शुकस्तु पञ्जरबद्धः । एतच्च बन्धनं शुकस्य मधुरवचसां फलम् ह्व्हइति वाक्यस्य शोधितः वाच्यार्थः। अनेन च वाक्यार्थेन अन्ये राजाश्रिताः विरामदिवसेषु स्वच्छन्दं सञ्चरन्ति, विद्वान् चिरप्रोषितः मत्पुत्रस्तु राजास्थाने एव बद्धः । एतत्तु मम पुत्रस्य मधुरवचसां फलम् इति पितुः दुःखसंवलितः व्यङ्ग्यः वाक्यार्थः।

अत्र च **"अखिलेषु विहङ्गेषु..."** इत्यादिप्रथमार्धेन विहङ्गानाम् अवक्तृत्वदोषस्य स्वच्छन्दसञ्चरणानुकूलतया गुणत्वेन कल्पनम् । शुकस्य तु मधुरवाग्मित्वस्य गुणस्यापि स्वेच्छासञ्चारप्रतिकूलत्वेन दोषत्वेन वर्णनम् इति लेशालङ्कारसमन्वयः ।

अत्र च मम पुत्रस्य मधुरवाग्मित्वस्य एतत् फलम् इति आयुष्मति पुत्रे पित्रा मधुरवाग्मित्वाविष्कारापेक्षया शुकबन्धनं तस्य(शुकस्य)मधुरवचसां फलम् इति वाक्यवाच्यार्थे सौन्दर्याधिक्यदर्शनात् वाच्यसौन्दर्येण अलङ्कारत्वम् ।

१. कु.आ. पृ.१५५.

१०. मुद्रालङ्कारः

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ।
नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा ।।[१]

यत्र प्रकृतार्थबोधनपरैः पदैः सूच्यार्थस्य सूचनं क्रियते तत्र मुद्रालङ्कारः । अत्र नितम्बगुर्वी तरुणी दृग्युग्मेन विपुला च ह्रह्रइति वाक्यार्थे अवस्थिते प्रकृतश्लोकछन्दसः युग्मविपुलाख्यानुष्टुप्त्वेन अत्र प्रकाशनात् सूच्यार्थसूचनेन मुद्रालङ्कारः। लक्षणशास्त्रे छन्दसोऽपि प्रकृतत्वात्। अत्र च व्यङ्ग्यस्य छन्दोविशेषस्य प्रकृतश्लोकप्रतिपाद्यवाच्यार्था-नन्वयित्वात् स्वतन्त्रतयैव व्यङ्ग्यस्य प्रकाशनात् तस्य च असुन्दरत्वात् गुणीभूतव्यङ्ग्यत्वम्।

यदि च युग्मविपुलाछन्दः प्रकाश्यसौन्दर्यवती दृग्युग्मविपुलातरुणी इति वाक्यवाच्यार्थे उपपाद्यते, तर्हि वाच्योपस्कारकगुणीभूतव्यङ्ग्यत्वमेव ।

उदयनवेन्दुसवर्णा वासवदत्ताबलौ बलस्य त्वम् ।
पद्मावतीर्णपूर्णौ वसन्तकं रौ भुजौ पाताम् ।।[२]

इति स्वप्नवासवदत्तप्रारम्भे पद्ये तु वासवदत्तापद्मावतीरूपपात्रसूचनात् तस्य प्राधान्येन प्रकाशनात् ध्वनित्वमेव न गुणीभूतव्यङ्ग्यत्वम्। एवम् **"ये द्वे कालं विधत्तः..."**[३] इत्यादिकालिदास-नाटकप्रारम्भपद्यभागेऽपि शकुन्तलादुष्यन्तप्रेमकथासूत्रधारिण्योः अनसूया-प्रियंवदयोः प्राधान्येन व्यङ्ग्यतया प्रकाशनात् सत्यपि मुद्रालङ्कारे व्यङ्ग्यस्य ध्वनित्वमेव ।

११. रत्नावल्यलङ्कारः

क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः।
चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ! ।।[४]

प्रकृतपदार्थानां क्रमसन्निविष्टः यः विन्यासः सैव रत्नावळी । अत्र क्रमेण चतुरास्य-लक्ष्मीपति-सर्वज्ञ-परमशिव-विन्यसनानन्तरं चतुर्थस्य राज्ञः विन्यासात्, तेन च राज्ञः एतत्त्रयानन्तरगणनीयलोकोत्तरमहत्त्वस्य अभिव्यक्तेः रत्नावळ्यलङ्कारः ।

एवञ्चात्र महीपतिघटितस्य वाच्यस्य पदार्थविन्यासस्य व्यङ्ग्यावद्योतितत्वात् अत्र गुणीभूतव्यङ्ग्यत्वम् ।

---

१. कु.आ. पृ.१५८.
२. स्व.वा. (प्रथमः श्लोकः) पृ.१.
३. अ.भि. (प्रारम्भश्लोकः) पृ.१.
४. कु.आ. पृ.१५८.

१२. पूर्वरूपालङ्कारः

पुनः स्वगुणसम्प्राप्तिः पूर्वरूपमुदाहृतम् ।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ।।[१]

अयञ्चालङ्कारः व्याकरणशास्त्रे प्रतिप्रसवन्यायेन निष्पन्नः। केनचित् सूत्रेण कस्मिंश्चित् कार्ये विहिते, अन्येन च प्रतिषिद्धे पुनर्विधाने प्रतिप्रसवः। एवमेव पूर्वं स्थितस्य पश्चात् केनचित् हेतुना अदृष्टस्य गुणस्य पुनः सम्प्राप्तौ पूर्वरूपम् ।

"हरकण्ठांशुलिप्तोऽपि..." इत्यत्र आदिशेषः सहजश्वेतः स च गरळकण्ठ-विषकान्तेः नीलः सञ्जतः। सो ऽपि पुनः वर्णनीयराजयशसा सितत्वमापादितः। अत्र च वर्णनीयराजयशसः हरकण्ठगरळेन हृतश्वेतिमवतः शेषस्य पुनः श्वेतिमसम्पादकत्वात् महाप्रभावशालि यशस्सम्पन्नत्वं व्यज्यते यच्च अद्भुतपरिपोषकम् । महायशस्सम्पन्नत्वस्य च व्यङ्ग्यस्य वाच्यस्य वाच्योपस्कारकत्वात् गुणीभूतव्यङ्ग्यत्वम् ।

२. **पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि ।**
दीपे निर्वापितेऽप्यासीत् काञ्चीरत्नैर्महन्महः ।।[२]

यत्र वस्तुनि विकृते सति पूर्वावस्थानुवृत्तिः तत्र द्वितीयं पूर्वरूपम् । सुरतसमये दीपे निर्वापिते सति तेजोरूपं वस्तु तमोरूपेण परिणतम् । सद्य एव काञ्चीरत्नैः महातेजसः सृष्टेः वर्णनात् द्वितीयपूर्वरूपोदाहरणे लक्षणसमन्वयः। अत्र दीपनिर्वापणानन्तरं सञ्जातेऽपि तिमिरे काञ्चीरत्नैः उज्ज्वलितस्य कान्तिसृष्टेः द्वितीयपूर्वरूपम् । तस्य च शृङ्गारध्वन्युपस्कारकत्वेन अलङ्कारत्वम् ।

१३. अनुगुणालङ्कारः

प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः ।
नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ।।[३]

यत्र परसन्निधेः प्राक्सिद्धस्वगुणोत्कर्षः वर्ण्यते तत्रानुगुणालङ्कारः । **"नीलोत्पलानि दधते..."** अत्र नीलोत्पलानां सहजगुणं नैल्यं प्रति कटाक्षाणामत्यन्तनीलकान्तिमतामनु-कूलत्वात् अनुगुणालङ्कारः। नीलोत्पलेष्वपि नैल्यासञ्जकेषु तत्सन्निहितवर्तिषु कटाक्षेषु वर्ण्यमानः अतिनीलताख्यः गुणोत्कर्षः तादृशकटाक्षाश्रयभूतायां नायिकायां सौन्दर्यातिशयं ध्वनयति। अतश्च अनुभाव(कटाक्ष)सौन्दर्येण विभाव(नायिका)सौन्दर्यस्य अत्र ध्वनिः।

१. कु.आ. पृ.१६१. २. कु.आ. पृ.१६१. ३. कु.आ. पृ.१६३

१४. & १५. उन्मीलित–विशेषकालङ्कारौ

भेदविशेषयोः अग्रहणे क्रमेण मीलितं सामान्यञ्च । वस्तुनोः भेदविशेषयोश्च ग्रहणे तु क्रमेण उन्मीलितालङ्कारः विशेषालङ्कारश्च ।

भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ ।
हिमाद्रिं त्वद्यशो मग्नं सुराः शीतेन जानते ।।
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ।[१]

इत्यत्र भेदवैशिष्ट्ययोः ग्रहणात्मकौ उन्मीलितविशेषकौ तदग्रहणात्मकमीलितसामान्य–प्रतिपक्षभूतौ। अत्यन्तश्वैत्यात् हिमाद्रि–राजयशसोः अन्यतरानिर्धरणे प्रसक्ते शैत्येन हिमाद्रिनिश्चयस्य वर्णनात् उन्मीलितालङ्कारः । एवम्ह्ह **"लक्षितान्युदिते चन्द्रे..."** इत्याद्युदाहरणान्तरे अपि मुखपद्मयोः अन्यतरानिर्धरणे प्रसक्ते चन्द्रोदयेन तयोः विशेषपरिज्ञानात् विशेषकालङ्कारः। एतदलङ्कारद्वयेऽपि पूर्वावस्थायां सन्देहः उत्तरावस्थायां निश्चयश्च ध्वन्यते।

तद्यथाह्ह **"नेदं त्वद्यशः अपि तु हिमाद्रिः"** इति व्यतिरेकार्थः उन्मीलिते ध्वन्यते । विशेषके तु **"नेदं पद्मम् अपि तु मुखम्"** इति व्यतिरेकार्थः ध्वन्यते । न चात्र स्थलद्वयेऽपि अपह्नवालङ्कारध्वनिरिति वाच्यम्, प्रथमस्थले राजयशसः विषयस्य निषेधे सत्यपि अन्यारोपस्य अभावात्। न हि हिमाद्रित्वमारोप्यते विद्यमानस्य तस्य स्वरूपमाविष्क्रियते।

द्वितीये तु **नेदं पद्मम्** इत्यत्र विषयनिषेधः नास्ति । न वा मुखत्वारोपः अस्ति, किन्तु मुखस्वरूपमाविष्क्रियते। तस्मात् पद्मस्य विशेषत्वाभावात् नात्र अपह्नवालङ्कारध्वनिः। अपि तु व्यतिरेकार्थध्वनिः। अत्र वैधर्म्यञ्च प्रथमस्थले शैत्यम्, (शीतलत्वम्) द्वितीयस्थले च पद्मगतः व्याकोचधर्मः। अत्र च "इदं त्वद्यशः अयं तु हिमाद्रिः, इदं पद्मम् इदं मुखम्" इत्यादिकन्तु शोधितवाक्यवाच्यार्थ एव, न व्यङ्ग्यार्थः। अर्थात् तात्पर्यविषयीभूतः वाच्यार्थः इत्यनुसन्धेयम् ।

---

१. कु.आ. पृ.१६५

१६. भाविकालङ्कारः

भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनम् ।
अहं विलोकयेऽद्यापि युद्ध्यन्तेऽत्र सुरासुराः ।।[१]

यत्र भूतस्य भाव्यर्थस्य च साक्षात्कारः वर्ण्यते तत्र भाविकालङ्कारः। "**अहं विलोकयेऽद्यापि...**" इत्याद्युदाहरणे अद्यापि "सुरासुराणां मध्ये प्रचलन्तं युद्धम् अहं विलोकये" इति भूतार्थस्य भाव्यर्थस्य च साक्षात्क्रियमाणत्वेन वर्णनात् भाविकालङ्कारः । अत्र च एतादृशप्रत्यक्षायमाणयुद्धस्थितिवर्णनेन स्थानभीषणत्वोद्भावनं ध्वन्यते। तदुपस्कार-कत्वाच्च वाच्यस्य अलङ्कारता ।

१७. उदात्तालङ्कारः

उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम् ।
सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः ।।[२]

यत्र ऋद्धं चरितम्, श्लाघ्यं चरितं वा, अन्योपलक्षणम्= अन्याङ्गम्, वर्ण्यते तत्र उदात्तालङ्कारः । "**सानौ यस्याभवत् युद्धम्...**" इति उदात्तोदाहरणे यस्य हिमालयस्य सानौ धूर्जटिकिरीटिनोः तत्= प्रसिद्धं युद्धं प्रचचाल इति वाक्यवाच्यार्थः । अत्र धूर्जटिकिरीटिनोः श्लाघ्ययुद्धचरितवर्णनस्य ध्वन्यमानहिमालयप्रभावातिशयाङ्गत्वात् श्लाघ्यचरितवर्णनात्मकः उदात्तालङ्कारः ।

रत्नस्तम्भेषु सङ्क्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ।।[३]

अत्र "रत्नस्तम्भेषु सङ्क्रान्तैः प्रतिबिम्बशतैः वृतः लङ्केश्वरः आञ्जनेयेन महता कष्टेन तत्त्वतः प्रत्यभिज्ञातः" इति ऋद्धरावणचरितवर्णनात् रावणस्य ऐश्वर्यातिशयः ध्वन्यते । तत्र च द्वितीयः उदात्तालङ्कारः ।

१. कु.आ. पृ.१७७.
२. कु.आ. पृ.१७७.
३. कु.आ. पृ.१७८.

१८. अत्युक्त्यलङ्कारः

अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।
त्वयि दातरि राजेन्द्र ! याचकाः कल्पशाखिनः ।।[१]

यत्र अद्भुतस्य अतथ्यस्य शौर्य–औदार्यादेः वर्णनं क्रियते तत्र अत्युक्त्यलङ्कारः। "**त्वयि दातरि...**" इत्याद्युदाहरणे "राजनि सति सर्वस्यापि दातारः कल्पवृक्षाः याचकाः संवृत्ताः" इत्यर्थवर्णनेन अद्भुतस्य अतथ्यस्य औदार्यस्य वर्णनात् अत्युक्त्यलङ्कारः । अत्र च दातुः निस्सीमदातृत्वं ध्वन्यते ।

१९. निरुक्त्यलङ्कारः

निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ।
ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ।।[२]

यत्र योगशक्त्या नाम्नाम् अन्यार्थत्वप्रकल्पनं क्रियते, तत्र निरुक्तिर्नाम अलङ्कारः। एतादृशैः चरितैः यथार्थतः दोषाकरः त्वम् आसीः इति कस्याश्चित् विरहिण्याः वचनेह्न

१. "दोषा = रात्रिसमयं करोतीति दोषाकरः" इति व्युत्पत्त्या, रात्रियापकत्वरूपार्थस्य,

२.दोषाकरपदेन विरहिजनानाम् अत्यन्तबाधनेन "दोषाकरः" इति अन्यस्य वाच्यार्थस्य "दोषाणाम् आकरः" इति, व्युत्पत्तिबलाच्च प्रतीतेः, प्रथमस्य वाच्यस्य अत्र अवयवशक्त्यैव प्रतीतेः दोषाकरपदनिरुक्तेश्च विप्रलम्भाङ्गभूतचन्द्रोपालम्भद्वारा विप्रलम्भपरिपोषणात् अत्र निरुक्त्यलङ्कारः ।

२०. प्रतिषेधालङ्कारः

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम् ।
न द्यूतमेतत्कितव ! क्रीडनं निशितैः शरैः ।।[३]

प्रसिद्धस्य निषेधस्य अनुकीर्तनं प्रतिषेधः। "**न द्यूतमेतत्कितव !...**" इति पद्ये युद्धसन्दर्भे यद्यपि युद्धं न द्यूतम्, किन्तु निशितैः शरैः क्रीडनमेव तथापि "हे कितव! नेदं द्यूतम्" इति न प्रतिषेद्धव्यम्, युद्धे द्यूतनिषेधस्य स्वत एव सिद्धत्वात्। तथापि "**न द्यूतमेतत् कितव !**" इति वक्तव्यतावश्यकतारहितेन निषेधेन "तव द्यूत एव प्रागल्भ्यम् न युद्धे" इत्युपहासः व्यङ्ग्यतया प्रतिभाति ।

---

१. कु.आ. पृ.१७८.　　२. कु.आ. पृ.१७९.

अयञ्च विषयः **कितव!** इति सम्बोधनेन आविष्कृतः। अतश्च व्यङ्ग्यस्यार्थस्य वाच्यकितवत्त्वोपपादकत्वात् वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यत्वम्।

२१. विध्यलङ्कारः

सिद्धस्यैव विधानं यत्तमाहुर्विध्यलङ्कृतिम्।
पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्॥[1]

यथा सिद्धस्यैव निषेधस्य अनुकीर्तने प्रतिषेधः, तथा सिद्धस्यैव विधेः अनुकीर्तने विध्यलङ्कारः। यथाह्नह्न **"पञ्चमोदञ्चने काले ..."** इत्युदाहरणे पञ्चमस्वरालापवति पञ्चमस्वराभिव्यक्तिमति काले **"कोकिलः कोकिलोऽभवत्"** इति प्रसिद्धकोकिले कोकिलत्वं विधीयते। विधिश्च मानान्तराप्राप्तौ सामान्यतः अङ्गीकर्तव्य इति मीमांसासम्प्रदायः।

एवञ्चात्र कोकिलत्वविधानस्य प्राक्सिद्धौ, पुनः कोकिलत्वविधानं प्रशस्त-कोकिलत्वे पर्यवस्यति। अयमेव **अर्थान्तरसंक्रमितवाच्यध्वनिः** इति प्राचीनैः परिभाषितः। विधिनिषेधयोः द्वयोरपि प्रमाणान्तराप्राप्तिप्राप्तिपूर्वकयोः एव शास्त्रेण प्रतिपादनीययोः, अलङ्कारशास्त्रे काव्येषु च तद्विना एव कथनम्, विधिनिषेधयोः अलङ्कारजीवातुभूत-विच्छित्तिवैचित्र्यप्रकाशनार्थम्।

२२. हेत्वलङ्कारः

१. **हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते।**
असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम्॥[2]

अयञ्च द्विविधः। यत्र हेतोः कार्येण सह वर्णनं भवति तत्र हेत्वलङ्कारः। यथा- **"असावुदेति शीतांशुः"** सुभ्रुवां कोपोच्छेदाय शीतांशुः उदेति ह्नह्नइति कार्यस्य मानिनी-मानोच्छेदस्य, कारणस्य शीतांशूदयस्य च वर्णनात् अयं हेत्वलङ्कारः। अत्र मानिनीमान-च्छेदस्य शृङ्गाररसस्फूर्तिसंवलितत्वेन कार्यकारणयोः उपनिबन्धे अपि अलङ्कारत्वम्।

---

१. कु.आ. पृ.१८०.
२. कु.आ. पृ.१८१.

२. हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः ।।[१]

हेतुहेतुमतोः ऐक्यमपि द्वितीयः हेत्वलङ्कारः। अत्र उदाहरणश्लोके कटाक्षाः वस्तुतः विदुषां लक्ष्मीविलासान् प्रति हेतवः, तथापि हेतुहेतुमतोः कार्यकारणभावसम्बन्धं पुरस्कृत्य रूपकालङ्कारे सादृश्यसम्बन्धं पुरस्कृत्य विषयविषयिणोरिव ऐक्यारोपात् अपरः हेत्वलङ्कारः। अत्र च हेत्वलङ्कारः कविगतभगवद्वेङ्कटेशविषयकभक्तिभावाङ्गभूतः इति अलङ्कारता।

तदित्थं साधारणवर्गीयाः द्वाविंशतिरलङ्काराः निरूपिताः ।

।। समाप्तोऽयं चतुर्थोऽध्यायः।।

१. कु.आ. पृ.१८१.

पञ्चमोऽध्यायः

रसवदाद्यलङ्काराः, प्रबन्धोपसंहारश्च

१. रसवदलङ्काराः

अध्यायेऽस्मिन् आदौ यथाप्रतिज्ञं रसवदाद्यलङ्काराः निरूप्यन्ते। ते च **सप्त** इति प्रागुक्तमेव।

१. तत्र विभावानुभावव्यभिचार्यभिव्यञ्जितस्य रतिहासशोकादेः स्थायिभावस्य प्रधानतया व्यज्यमानत्वे **ध्वनिः**। तस्यैव वाच्यव्यङ्ग्याद्यपराङ्गत्वे **रसवदलङ्कारः**।

२. विभावानुभावाभ्याम् अभिव्यञ्जितस्य निर्वेदादेः त्रयस्त्रिंशदन्यतमस्य भावस्य अथवा देवादिविषयकभावस्य अपराङ्गत्वे **प्रेयोऽलङ्कारः**।

३. अ. औचित्यमपि उल्लङ्घ्य प्रवृत्तानामत एव अनिवार्यबलवेगानाम् अनुचितानां रत्यादीनां निबन्धे **रसाभासः**।

आ. तादृशानामेव भावानां निबन्धे भावाभासः अनयोः द्वयोरेव **ऊर्जस्वित्** इति नाम।

४. भावस्य प्रशमावस्थायाः अपराङ्गत्वेन निबन्धे **समाहितम्**।

५. भावोद्गमावस्थायाः अपराङ्गत्वेन निबन्धे **भावोदयः**।

६. द्वयोर्विरुद्धयोः भावयोः परस्परस्पर्धाभावः **भावसन्धिः**।

७. बहूनां भावानां पूर्वपूर्वोपमर्देन उत्पत्तिः **भावशबलता**।

एतेषां त्रयाणामङ्गत्वे भावोदयादीनामपि अलङ्कारता। तदित्थं रसवदादयः **सप्त** सङ्क्षेपतः निरूपिताः। इदानीं लघुनिबन्धः उपसंह्रियते।

२. प्रबन्धोपसंहारः

भूमिकायाम् – कुवलयानन्दस्थचन्द्रालोकः कथं वा जयदेवचन्द्रालोकात् भिद्यते ? इति सविस्तरं निरूपितम्। ततः प्राक् गुणालङ्कारयोः पारस्परिकः भेदः सयुक्तिकं विचारितः। लघुनिबन्धस्य उद्देश्यम्, नामौचित्यम्, स्वरूपम् इत्यादिकञ्च सर्वं विवृतम्।

ततः **प्रथमाध्याये –** अलङ्कारेषु गुणीभूतव्यङ्ग्यरूपाणां ध्वनिरूपाणाञ्च केषञ्चित् अलङ्काराणां दर्शनात्, ध्वनित्वप्रयोजकानि गुणीभूतव्यङ्ग्यत्वप्रयोजकानि अष्टविधगुणीभूत-व्यङ्ग्याविर्भावप्रक्रिया च अत्र आदौ निरूपिता । तत्र च आक्षिप्त एवालङ्कारः इति ध्वनिकारोक्तनियमस्यह्न **'दृष्ट्या केशव !...'** इत्यादिपद्ये वाच्यव्यङ्ग्ययोः उपमानोपमेयभावस्य व्यङ्ग्यत्वाभावे निदानतया वाक्यीय समस्यापरिष्कारोपयोगिस्वोक्त्याऽऽविष्कारात्मकः सलेशत्वादिः युक्तितया प्रतिपादितः। सलेशत्वादेः वाच्यस्य व्यङ्ग्येन नियततया आकाङ्क्षितत्वात् व्यङ्ग्यस्य पदार्थीभूतसलेशत्ववाच्य एव अन्वयेन वाच्यवाक्यार्थेन अन्वयाभावात्।

एवमेव अन्यत्रापि अर्थशक्तिमूलस्थलेऽपि स्वोक्त्याऽऽविष्कारे गुणीभूतव्यङ्ग्यत्वमेव। वाच्यस्य सुन्दरत्वे, व्यङ्ग्यस्य असुन्दरत्वे, व्यङ्ग्यस्य अन्योपपादकत्वे अन्योपस्कारकत्वे वा वाच्यसिद्ध्यङ्गत्वम् इत्यादिकं सर्वं ध्वन्यालोक-लोचन-काव्यप्रकाशादिभ्यः क्रोडीकृत्य उट्टङ्कितम्। व्यङ्ग्यसौन्दर्यं तस्य तात्पर्यविषयत्वम्, प्राधान्यं च ध्वनित्वप्रयोजकम्ह्न इति निरूपितम्।

एवं भेदाभेदप्रधानेषु अलङ्कारेषु उपमायाः प्रथमपद्यगतायाः भक्तिभावोपस्करकत्वम्, लुप्तोपमाभेदानां सर्वेषामाहत्य रसाभासोपस्कारकत्वम् अथवा रसोपस्कारकत्वं समर्थितम्। अनन्वय-उपमेयोपमयोः कवितात्पर्यं पुरस्कृत्य द्वितीयसदृशवस्तुव्यवच्छेदादेः ध्वनित्वम्, तदुपस्कारकत्वात् अनन्वयस्य अलङ्कारकत्वम् इति निर्णीतम्। अथ प्रतीपे पञ्चसु भेदेषु ह्न अधिक्य-विप्रलम्भ-अत्यन्तप्रमादकारित्ववर्ण्यमुखोत्कर्षाद्युपस्कारकत्वात् अलङ्कारत्वम् इति उदाहरणानुरोधेन समर्थितम्। कैमर्थ्यप्रतीपे तु वाच्यसिद्ध्यङ्गत्वम्। ततः स्मरणे सादृश्यस्य व्यङ्ग्यत्वम्।

अथ आरोपमूलकाभेदादिप्रधानेषु रूपके षड्विधे लक्षणशरीरदृष्ट्या व्यङ्ग्य-सम्भावनायाः अवकाशाभावेन भक्तिभाव-शृङ्गारध्वन्याद्युपस्कारकत्वं षड्विधरूपकाणामुक्तम्।

परिणामे तु व्यङ्ग्यविकासादिधर्मस्य वाच्यदृगब्जादौ आश्रयत्वसम्बन्धेन अन्वयः। एवम् उल्लेख-भ्रन्तिमत्-सन्देह-अपह्नवेषु ध्वन्युपस्कारकत्वेनैव अलङ्कारयोः उत्प्रेक्षायां साध्याध्यवसान-प्रधानत्वम्, क्वचित् भेदे वाच्योपस्कारकत्वम्, अन्यत्र ध्वन्युपस्कारकत्वम्; अष्टविधाति-शयोक्तिप्रभेदेषु अपि अधिकतया तत्तद् ध्वन्युपस्कारकत्वञ्च प्रतिपादितम्।

अथ **द्वितीयाध्याये** गम्यौपम्यमूलकेषु अलङ्कारेषु तुल्ययोगिता-दीपक-आवृत्तिदीपकेषु प्राधान्येन चमत्कारी साधारणो धर्म एव अलङ्कारः। तत्र च व्यङ्ग्यं सादृश्यं वाच्यं साधर्म्यमुपस्करोति। साम्यस्य साधर्म्योपस्कारकत्वं नाम समानधर्मस्य प्रायशः जडतया तदुपस्कारकत्वस्याभावात् समानधर्माश्रयधर्म्युपस्कारकत्वमेव ग्राह्यम्। एवञ्च व्यङ्ग्यसंस्कृतस्य वाच्यस्य तत्र अलङ्कारत्वम्।

एवं प्रतिवस्तूपमायां दृष्टान्ते च व्यङ्ग्यस्य औपम्यस्य यथायथं वाच्य-वस्तु-प्रतिवस्तु-भाव-बिम्ब-प्रतिबिम्बभावोपस्कारकत्वं ग्राह्यम्। वाक्यार्थवृत्तिनिदर्शनायां धर्मिणोः ऐक्यस्य आरोपेण कनीयसापक्षेण तयोः सादृश्यस्य सिद्धिः **रुग्णपथ्यभिषग्व्यवहार**न्यायेन व्याख्याता। पदार्थवृत्तिनिदर्शनायां बोधननिदर्शनायाञ्च प्रत्येकशः औपम्यव्यङ्ग्यत्वनिरूपणार्थं समीक्षा प्रपञ्चिता। **पल्लवतः कल्पतरोः ...** इत्यादिव्यतिरेकविशेषोदाहरण एव व्यङ्ग्यौपम्यं न तु **शैला इव ...** इत्यादाविति प्रतिपादितम्। एवं सहोक्तौ दूरव्याप्तिरूपैकक्रियाऽन्वीय-मानयोः कीर्तिप्रत्यर्थिनोः औपम्यस्य व्यङ्ग्यत्वे प्रतिपादितम्।

ततः विनोक्तौ वैधर्म्येण साधर्म्यनिरूपणपरायाः उपमायाः व्यङ्ग्यत्वं प्रतिपादितम्, समासोक्तौ दीक्षितमतानुसारेण बोधप्रक्रियानिरूपणपुरस्सरं व्यङ्ग्यस्य वाच्यवृत्तान्ते अन्वयेन वाच्यस्य च प्रकृते धर्मिणि आरोपेण अन्वयेन च समासोक्तेः अलङ्कारत्वं समर्थितम्। ततः परिकरव्यङ्ग्यस्य वाच्योपपादकता निरूपिता। पश्चात् परिकराङ्कुरे विशेष्यस्यैव कथं साभिप्रायत्वं तस्य च वाच्योपस्कारकत्वं कथमिति च निरूपितम्। तदनु उपमायाम् अङ्गीकृतेति, तस्याश्च उपमायाः स्वमते गूढश्लेषत्वमेवेति सिद्धान्तः आविष्कृतः। आक्षेपकस्य सद्भावे तु आक्षिप्तश्लेषः इत्युक्तम्।

किन्तु **उच्चरत् भूरिकीलालः...** इत्यादिप्रकृताप्रकृतश्लेषोदाहरणे किमाक्षिप्तश्लेषः दीक्षितमते उत गूढश्लेषः? इति सन्देहे ह्व **शुशुभे** इति प्रकृताप्रकृतयोः औपम्यगमकस्य साधर्म्यस्य उपादानात् प्रकृताप्रकृतश्लेषस्थले दीक्षितमतेन **आक्षिप्तश्लेष** एव अदृतो भवतीति लघुनिबन्धेऽस्मिन् निरूपितम्।

अप्रस्तुतप्रशंसायान्तु साधर्म्यमूलकायामेव सादृश्यस्य व्यङ्ग्यत्वे तस्य तात्पर्यवशात् ध्वनित्वं गुणीभूतव्यङ्ग्यत्वं वेति निर्णयः कर्तव्य इति निरूपितम्। एवं पर्यायोक्त–व्याजस्तुति–व्याजनिन्दा–आक्षेप–ललित–अर्थान्तरन्यास–विकस्वरेष्वपि वाच्यव्यङ्ग्ययोः सम्बन्धपरामर्शः अत्र विहितः । तत्र च मुख्यतया कृते विचारे ध्वनिसिद्धान्तसम्बन्धी कश्चित् विज्ञेयो विषयः नूतनाविष्काररूपेण इत्थमायाति। यत्र वाच्यम् असम्भाविततया अन्येन केनचित् विशिष्टेन प्रकारेण अनुपपन्नं सत् व्यङ्ग्यं बोधयति तत्र व्यङ्ग्यतात्पर्यकत्वात् वाच्यस्य व्यङ्ग्येन पश्चादागत्य संस्क्रियमाणत्वाच्च, तत्र गुणीभूतव्यङ्ग्यत्वमेव अथवा अलङ्कारत्वमेव न ध्वनित्वम् । यत्र तु व्यङ्ग्यं व्यङ्ग्यान्तरं प्रत्येवानुधावति न चागच्छति पश्चात् वाच्योपपादनाय तत्र ध्वनित्वमेव इति फलितम्। एतच्च **लावण्यद्रविणव्ययः** ... इत्याद्युदाहरणसन्दर्भे **कः स्वर्धुनि** ... इति व्याजस्तुत्युदाहरणसन्दर्भे च निरूपितं प्राक्।

अथ **तृतीयाध्याये –** विरोधगर्भाः अलङ्काराः विरोधाभासप्रभृतयः व्याघातान्ताः त्रयोदश निरूपिताः। एतेषामलङ्काराणां विरोधमूलकत्वेन विरोधस्य च अद्भुतसृष्टौ उपयोगित्वेन अद्भुतरसोपस्कारकत्वम्, विरोधस्य च अद्भुतसम्बद्धशृङ्गारादिरसोपस्कारकत्वम् अथवा अद्भुतसम्बद्धशृङ्गारादिरसोपस्कारकत्वं सामन्यतः निरूपितम्। एषु समालङ्कारः विषमप्रतिपक्षभूतः एतद्वर्गानन्तर्भूतः प्रासङ्गिकः। विरोधतत्परिहारविषये द्वादशस्वप्यलङ्कारेषु उपायचिन्तनं विहितम्। विरोधतत्परिहारयोः मध्ये विरोधस्यैव प्रथमतः भाने वाक्यन्यायो निरूपितः। विरोधस्य सर्वात्मना परिहारः आंशिकपरिहारो वेति मतभेदेन च निरूपितम्।

ततः शृङ्खलामूलकेषु अलङ्कारेषु चतुर्षु व्यङ्ग्यसौभाग्यम् उदाहरणस्वाभाव्येनैव व्यवस्थितम्, नालङ्कारशरीरप्रयुक्तम्।

तदनु तर्कन्यायमूलकयोः काव्यलिङ्गानुमानयोः अपि पार्थक्यम्, कविव्यापारसम्बन्धेन तयोः चमत्कारित्वञ्च निरूपितम्।

ततः वाक्यन्यायमूलकेषु नवसु अलङ्कारेषु यथासङ्ख्ये विकल्पे कारकदीपके विवक्षितव्यङ्ग्यस्पर्शः न दृश्यते। अन्येषु अलङ्कारेषु तु अधिकतया ध्वन्युपस्कारकत्वं द्वितीयसमुच्चयोदाहरणे गुणीभूतव्यङ्ग्यत्वञ्च समर्थितम्।

लोकन्यायवर्गे विद्यमानेषु प्रत्यनीकादिलोकोक्त्यन्तेषु षट्सु अलङ्कारेषु अधिकतया वस्तुध्वनयः, लोकोक्तौ विप्रलम्भध्वनिः, सामान्ये रूपकध्वनिश्च इति विचिन्त्यात्र निरूपितम्।

अथ **चतुर्थाध्याये –** आदौ सूक्ष्म–व्याजोक्ति–वक्रोक्ति–स्वभावोक्ति–भाविक–संसृष्टि–सङ्कराख्याः गृहीताः सप्त गूढार्थप्रतीतिमूलाः व्यासमहाशयोक्ताः अलङ्काराः। प्रकृतनिबन्धकारेणापिह्व उत्तर–पिहित–गूढोक्ति–वक्रोक्ति–युक्ति–छेकोक्तिसंज्ञानां षण्णां गूढार्थप्रतीतिमूलकत्वम् आविष्क्रियते। तत्र किमिदं गूढत्वम् इत्युक्तेह्व न अस्फुटत्वम्, अपि तु ध्वनि–स्फुटगुणीभूत–व्यङ्ग्यान्यतरत्वम्। तत्र ध्वनिरूपत्वम्ह्व गूढोत्तर–सूक्ष्म–पिहित–व्याजोक्तिषु चतुर्षु अप्पय्यदीक्षितेनैव स्वयमभ्युपगतम्। वस्तुदृष्ट्या गूढोक्ति–युक्ति–छेकोक्तिनाम्नाम् अन्येषां त्रयाणामपि उदाहरणानुरोधेन ध्वनित्वं दृश्यते। तदित्थं ध्वन्यात्मकगूढप्रतीतिमूलाः।

एतेषां वस्तुतः ध्वनित्वमेव, किन्तु स्वोक्त्याऽऽविष्कारे , अलङ्कारत्वमिति सम्भाव्य अलङ्कारेषु योजना कृता। भाविकस्य गूढार्थप्रतीतिमूलकत्वं लक्षणशरीरदृष्ट्या नानुभूयते। संसृष्टौ संसृज्यमानालङ्कारान्तराधारेण गूढार्थप्रतीतिमूलकत्वम्। सङ्करे तु लोचनकारोदाहृतेह्व **भवति न गुणानुरागः ...** इत्यत्र अर्थान्तरन्यासस्य व्यतिरेकापह्नुतिभ्यां ध्वनिरूपाभ्यां कथं वा सम्मिश्रणमिति उपपादितम्। स्वभावोक्तेः उदाहरणानुसारेण गूढार्थप्रतीतिमूलकत्वं निर्णेयं भवति। काकुवक्रोक्तौ काक्वाक्षिप्तगुणीभूतव्यङ्ग्यप्रभेदः कथमिति सयुक्तिकं निरूपितः। विवृतोक्तौ तु गुणीभूतव्यङ्ग्यत्वं स्फुटमेव ।

तदित्थं **गूढार्थप्रतीतिमूलकेषु** द्वादशसु व्यङ्ग्यवैभवं वर्णितम्।

अथ अस्मिन्नेवाध्याये भोलाशङ्करव्यासेन प्रकृतनिबन्धकारेण वा **अवर्गीकृतेषु** (२२) द्वाविंशतिषु अलङ्कारेषु अमी विशेषाः व्यङ्ग्यार्थसम्बन्धेन दृश्यन्ते।

प्रौढोक्त्यलङ्कारे हेतूत्प्रेक्षा ध्वनिः, उन्मीलित–विशेषालङ्कारयोस्तु व्यतिरेकार्थ–ध्वनिः, न तु अपह्नवालङ्कारध्वनिः ह्वइति स युक्तिकं निरूपितम्। प्रहर्षणविषादनयोः अलङ्कारयोः यथाक्रमं हर्षविषादभावोपस्कारकत्वम्, द्वितीयहेत्वलङ्कारे भगवद्वेङ्कटेश्वर–स्मरणसुन्दरे भक्तिभावोपस्कारकत्वञ्च निरूपितम्।

अथ मिथ्याध्यवसिति–द्विविधावज्ञा–लेश–मुद्रालङ्कारेषु असुन्दरगुणीभूत–व्यङ्ग्यप्रभेदत्वं समर्थितम्। मिथ्याध्यवसित्यलङ्कारे च वाच्यस्य असम्भवित्वेऽपि व्यङ्ग्यात्यन्तासम्भवित्वतात्पर्यकत्वेन अंशतः उपपत्तिः प्रदर्शिता। यादृशस्थले वाच्यार्थानुपपत्तौ

सत्याम्, लक्षणाङ्गीकारेऽपि न निस्तारः; तादृशस्थले वाच्यार्थस्य व्यङ्ग्येन यथाकथञ्चिदुपपत्तिः विज्ञेया इति मिथ्याध्यवसित्यलङ्कारे निरूपितम्।

भाविक–उदात्त–अत्युक्त्यलङ्कारेषु ध्वन्यमानवस्तूपस्कारकत्वं निरूपितम्। निरुक्ति–प्रथमहेत्वलङ्कारोदाहरणेषु रसोपस्कारकत्वम्। उल्लास–सम्भावना–रत्नावली–प्रथमपूर्वरूप–विध्यलङ्कारेषु पञ्चसु वाच्यसिद्ध्यङ्गत्वम् अथवा वाच्योपस्कारकाङ्गत्वं निरूपितम्। अनुज्ञालङ्कारोदाहरणे समप्राधान्यगुणीभूतव्यङ्ग्यत्वं विशिष्य विचिन्त्य निरूपितम्। एवमन्येष्वपि साधारणवर्गपतितेषु अवर्गीकृतेषु अलङ्कारेषु तत्तदुपस्कारत्वं प्रत्यपादि।

पञ्चमाध्याये – आदौ रसवदादिस्वरूपञ्च निरूपितः।

एवमुपपादिताः भगवत्कण्ठहारत्वेन समर्पिताः अलङ्काराः चन्द्रालोके विराजन्ताम्।।

जयतु गणेशो दीक्षितरूपः सुजयतु जयदेवसौमित्रिः।
पण्डितकुवलयनन्दी चद्रालोकश्चिरं जयतु ।।

इति चन्द्रालोकालङ्कारेषु व्यङ्ग्यानुशीलनम्
इति ग्रन्थोपसंहारः।।

परिशिष्टम्

आधारग्रन्थसूची (BIBLIOGRAPHY)

क्र	ग्रन्थनाम	ग्रन्थकर्ता	संस्कर्ता	प्रकाशितसंस्थानाम	वर्षः
१.	**अलङ्कारसर्वस्वम्**	रुय्यकः, मङ्खः	डा. रेवाप्रसाद द्विवेदी	चौखाम्बा संस्कृतसीरीज्, वाराणसी	१९७१
	टीका, विमर्शनी	जयरथः	डा. रेवाप्रसाद द्विवेदी	चौखाम्बा संस्कृतसीरीज्, वाराणसी	१९७१
२.	**उपनिषत्सङ्ग्रहः**	भगवान् व्यासः	पण्डितजगदीशशास्त्री	मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली	१९९८
३.	**कालिदासग्रन्थावलिः**	महाकविकालिदासः	डा. रेवाप्रसादद्विवेदी	काशीहिन्दूविश्वविद्यालयः, वाराणसी	१९८६
४.	**काव्यप्रकाशः**	मम्मटाचार्यः			
	टीका, बालबोधिनी	वामानाचार्य झल्कीकर्	रघुनाथदामोदरकरमकर	भण्डार्कर् ओरियण्टल् रीसर्च इन्स्टिट्यूट्, पूना	१९६५
	विस्तारिका.भा.१	परमानन्दचक्रवर्ती	डा. गौरीनाथशास्त्री	सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः–वाराणसी	१९७६
	सारबोधिनी	श्रीवत्सलाञ्छनः	डा. गोपराजुरामा	केन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः	१९७६
	प्रदीपप्रद्योतप्रभासहितः	प्रो.विश्वनाथभट्टाचार्य	प्रो.जयशङ्करत्रिपाटी	काशीहिन्दूविश्वविद्यालयसंस्कृतग्रन्थमाला	२००३
	उद्द्योतप्रदीपसहितः	नागोजीभट्टः,गोविन्दठक्कुरः	वासुदेवशास्त्री अभ्यङ्कर	चौखम्भाविद्याभवन, वाराणसी	१९९४
	प्रथमः भागः	ज्योत्स्ना मोहन		नागप्रकाशक, दिल्ली	१९९५
५.	**काव्यादर्शः**(प्रकाशसंस्कृतटीका)	आचार्य दण्डी	रामचन्द्रमिश्रः	चौखम्बाविद्यभवन, वाराणसी	१९७२
	शशिप्रभा(सं.हि)	डा.जमुना पाठक्	डा.जमुना पाठक्	चौखम्बाकृष्णदास् अकाडमी, वाराणसी	२००५

क्र ग्रन्थनाम	ग्रन्थकर्ता	संस्कर्ता	प्रकाशितसंस्थानाम	वर्षः
६. काव्यालङ्कारः	भामहः	पि.वि.नागनाथशास्त्री	मोतीलाल बनारसीदास, दिल्ली	१९७०
		डा.रमणकुमारशर्मा	विद्यानिधिप्रकाशन्, दिल्ली	१९९४
७. काव्यालङ्कारः	रुद्रटः	पं. दुर्गाप्रसादः	निर्णयसागरप्रेस्, बोम्बाई	१९२८
८. काव्यालङ्कारसङ्ग्रहः	उद्भटः	मङ्गेशरामकृष्णतैलङ्ग	निर्णयसागरप्रेस्,	१९२८
टीका, लघुवृत्तिः	प्रतीहारेन्दुराजः			
९. काव्यालङ्कारसूत्राणि	वामनः	डा. बेचन् झा	चौखम्बासंस्कृतसंस्थान्, वाराणसी	१९७६
१०. कुवलयानन्दः	अप्पय्यदीक्षितः		निर्णयसागरप्रेस्	१९५५
टीका, अलङ्कारचन्द्रिका	वैद्यनाथतत्सत्			
११. कुवलयानन्दः (हिन्दी)	अप्पय्यदीक्षितः	डा.भोळाशङ्करव्यासः	चौखम्बा संस्कृतसंस्थान, वाराणसी –	१९६६
१२. चन्द्रालोकः	जयदेवः			
टीकाः शरदागमः	प्रद्द्योतनभट्टाचार्यः	खिस्ते नारायणशास्त्री		
आलोकवर्धिनी (सं .हि)	डा. गङ्गासागररायः	डा. गङ्गासागररायः	चौखम्बासंस्कृतसंस्थान् , वाराणसी	२००३
पौर्णमासी, कथाभट्टीया (सं .हि.)	कथाभट्टः	श्री नन्दकिशोरशर्मा	चौखम्बासंस्कृतसीरीज्, वाराणसी	१९७९
विमला, सुधा (सं .हि.)		डा. श्रीकृष्णमणित्रिपाठी	चौखम्बासुरभारतीप्रकाशन्, वाराणसी	१९८४
राकागमा (प्राक्कथन)	गागाभट्ट(श्री बटुकनाथशर्मा)			
भूमिका	अनन्तरामशास्त्री वेताल		चौखम्बासंस्कृतसीरीज आफिस्, बनारस् सिटी, वि.सं.	१९९५

क्र	ग्रन्थनाम	ग्रन्थकर्ता	संस्कर्ता	प्रकाशितसंस्थानाम	वर्षः
१३.	**चित्रमीमांसा**(टीका–सुधा)	अप्पय्यदीक्षितः	(धरानन्दः) कालिकाप्रसादशुक्ल	वाणीविहार्, वाराणसी	१९६५
१४.	**ध्वन्यालोकः**	आनन्दवर्धनाचार्यः	म.मा. पं. दुर्गाप्रसादः		
			काशीनाथ पाण्डुरङ्गपरब	मुन्शीराममनोहरलालपब्लिशर्स(प्रा.लि)	
१५.	**नाट्यशास्त्रम्**	भरतमुनिः	पण्डित केदारनाथः	भरतीयविद्याप्रकाशन्, नई दिल्ली	२००३
१६.	**न्यायसिद्धान्तमुक्तावली** कारिकावली	विश्वनाथपञ्चानन भट्टाचार्यः	हरिरामशुक्लशास्त्री	चौखम्बासंस्कृतसीरिज, वाराणसी	१९४६
१७.	**प्रतापरुद्रीयम्**	विद्यानाथः	डा. वि. राघवन्	दि सांस्क्रिट् सोसैटी, मद्रास्	१९७०
१८.	**रसगङ्गाधरः**(गुरुमर्मप्रकाशः)	पण्डितराजजगन्नाथः	पं. दुर्गाप्रसादः	निर्णयसागरप्रेस्	१९३०
	प्रथमोभागः		मधुसूदनशास्त्री(मर्मप्रकाश–मधुसूदनी–बालक्रीडा)	काशीहिन्दूविश्वविद्यालयः	वि.सं.२०२०
	चन्द्रिका (संस्कृत–हिन्दी)		पं. श्रीमदनमोहन झा		वि.सं.२०१४
१९.	**वैयाकरणसिद्धान्तकौमुदी** (मूलमात्रम्)	महर्षिपाणिनिः	श्रीगोपालदत्तपाण्डेयः	चौखम्बा विद्याभवन, वाराणसी	१९९३
२०.	**श्रीमदप्पय्यदीक्षितेन्द्रकृतयः**	अप्पय्यदीक्षितः	डा.कम्भम्पाटि सीतारामाञ्जनेयुलु	श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिप्रकाशन्, हैदराबाद्	१९९८
२१.	**श्लेषालङ्कारविमर्शः**	प्रो.श्रीपादसत्यनारायणमूर्तिः			१९९९

क्र ग्रन्थनाम	ग्रन्थकर्ता	संस्कर्ता	प्रकाशितसंस्थानाम	वर्षः
२२. **साहित्यदर्पणम्**	विश्वनाथकविराजः			
व्याख्या–लक्ष्मी	आचार्यकृष्णमोहनशास्त्री		चौखम्भासंस्कृतसंस्थान्, वाराणसी	१९९६
मञ्जू (संस्कृत–हिन्दी)	आचार्य लोकमणि दाहल, डा.त्रिलोकीनाथ द्विवेदी		चौखम्बा सुरभारती प्रकाशन, वाराणसी	२००१
२३. **स्वप्नवासवदत्तम्**	महाकविभासः	गङ्गासागररायः	चौखम्भा संस्कृत संस्थान, वाराणसी	१९९८

अनुशीलितानुसन्धानग्रन्थौ

१. **अप्पय्यदीक्षितस्य साहित्यशास्त्रीयकृतीनां विमर्शात्मकमध्ययनम्** डा. लक्ष्मीनारायणभट्टः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

२. **अलङ्काराणां क्रमिको विकासः** डा. के.के. षैन्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

अनुशीलिताङ्ग्लग्रन्थः

1. History of Sanskrit Poetics P.V. Kane Motilal Banarasidass, Delhi 1971

अनुशीलितान्ध्रग्रन्थौ

१. **चन्द्रालोकमु** (तेलुगु अनुवादसहितमु) जयदेवः डा.बुलुसुवेङ्कटसत्यनारायणमूर्ति रोहिणिपब्लिकेषन्स्, राजमण्ड्रि

२. **संस्कृतसाहित्येतिहासः** डा.मुदिगण्टिगोपालरेड्डि, सुजातारेड्डि पोट्टिश्रीरामुलु विश्वविद्यालयमु, हैदराबाद् २००२

ग्रन्थपरिचयः

१. अलङ्कारशास्त्रेऽलङ्काराणां स्वरूप-उदाहरणजिज्ञासूनां कुवलयानन्दस्थः चन्द्रालोकाख्यः ग्रन्थः हस्तपुस्तकायमानः यत्र शताधिकानामलङ्काराणां स्वरूपं सोदाहरणं सम्यक् प्रपञ्चितम्।

२. **अव्यङ्ग्यन्त्ववरं स्मृतम्** इति कथयता मम्मटेनालङ्कारेषु केषुचित् अस्फुटव्यङ्ग्यं न्यरूपि।

३. **अतादृशिगुणीभूतव्यङ्ग्यम्** इत्यादिना च स्फुटप्रतीयमानाख्यभासुराणामन्येषामलङ्काराणां स्वरूपं मध्यमकाव्यरूपेण प्रादर्शि।

४. निबन्धकारः आलङ्कारिकः **डा. पठान् वलि साहेब्** महोदयः अलङ्काराणां लक्षणकथनेन निष्पन्नस्य अलङ्कारशरीरस्य दृष्ट्या क्वचित् वाच्यव्यङ्ग्ययोः स्थानम्, क्वचित् उदाहरणश्लोके सन्दर्भपर्यालोचनेन, क्वचिच्च कवेः तात्पर्यपर्यालोचनेन च वाच्य-व्यङ्ग्ययोः स्थानम् अत्यन्तसुन्दरतया निरणैषीत्।

५. व्यङ्ग्यस्य स्वोक्त्या आविष्कारे ध्वनिर्न भवति अलङ्कार एव इति ध्वनिकाराभ्युपगतनियमस्य किम् आलङ्कारिकशपथैकवेद्यत्वम्? उत काऽप्यत्र युक्तिरस्ति? इति स्वयं विचार्य व्यङ्ग्यगोपिकाकर्मक-आलम्बनवृत्तान्तस्य वाच्ये सलेशत्वेऽन्वयात् वाच्य-व्यङ्ग्ययोः अन्वयः उपपद्यत एवेति, **दृष्ट्या केशव ...** इत्यादिपद्ये शक्तिलक्षणाभ्यामेव वाक्यीयसमस्या परिष्कारे सुलभे कृतं वाक्यसमस्यापरिष्काराय व्यञ्जनाश्रयणम् इति सुनिपुणं शोधकः प्राचीनोक्तेषु युक्तिं निरूपितवान्।

६. अयञ्च शोधप्रबन्धः चन्द्रालोकान्तर्गतालङ्कारान् आलङ्कारिकसम्मतवर्गीकरणोपायानु-सन्धानपुरस्सरं विभजन् तत्रालङ्कारेषु व्यङ्ग्यस्य स्थानं कीदृशमिति सुस्पष्टं विवेचयति।

७. आलङ्कारिकं प्रौढज्ञानं, सरला लक्षणसमन्वयदृष्टिः, लक्षणवाक्यगतकतिपयपदानाम् अत्यन्तव्याख्यासापेक्षाणाम् अर्थप्रदर्शनम्, लक्षणसमन्वये कर्तव्ये तत्तदलङ्कारेषु व्यङ्ग्यस्य स्थाननिर्णये च कर्तव्ये शोधकेन दर्शिता श्रद्धा नान्यतो दर्शनीया।

८. शतालङ्कारेषु व्यङ्ग्यामृतस्य आविष्कारेऽद्भुतप्रयत्नरूपेण आलङ्कारिकाणां छात्राणां च अयं ग्रन्थः अत्यन्तोपयोगी इत्युक्तिः नात्युक्तिः।।

– डा. श्रिष्टि लक्ष्मीकुमारशर्मा